गृहाणार्घ्यं मया दत्तं बलेन सह केशव ॥

इदमर्घ्यम् ।

अद्य स्थित्वा निराहारः श्वोभूते परमेश्वर ।

भोक्ष्यामि देवदेवेश अर्पयामि जनार्दन ॥

उपवाससमर्पणम् ।

---

No. **8275.** कृष्णजयन्तीव्रतकल्पः.

KṚṢṆAJAYANTĪVRATAKALPAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 10*a* of the MS. described under No. 8258.

Complete.

Similar to the above.

**Beginning:**

अतसीपुष्पसङ्काशं चतुर्बाहुविशोभितम् ।

देवक्या सहितं कृष्णं कलये गरुडध्वजम् ॥ ध्यानम् ।

आगच्छ जगदाधार कारुण्यामृतसागर ।

सत्याय सत्यपतये गोविन्दाय नमो नमः ॥ आवाहनम् ।

**End:**

परित्राणाय साधूनां . . . . . . स्वयम् ।

गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरे ॥

देवकीसहिताय श्रीकृष्णाय नमः—इदमर्घ्यम् ॥

No. 8276. कृष्णजयन्तीव्रतार्घ्यश्लोकाः.
KṚṢṆAJAYANTĪVRATĀRGHYAŚLOKĀḤ.

Page, 1. Lines, 4 on a page.

Begins on fol. 1a of the MS. described under No. 5773.

Complete.

On the offering of oblations of water in propitiation of Śrī Kṛṣṇa, on the anniversary day of his birth

**Beginning** and **End**:

कृष्णजयन्तीउपोष्या(न्त्युपवासा)ङ्गार्घ्यप्रदानङ्करिष्ये ।
जातः कंसवधार्थाय भूभारोत्तारणाय च ।
दानवानां विनाशाय दैत्यानां निधनाय च ॥
गृहाणार्घ्यं मया दत्तं रोहिण्या सहितो हरे ।
पाण्डवानां हितार्थाय धर्मसंस्थापनाय च ॥
कौरवाणां विनाशाय वसुदेवकुलोद्भव ।
गृहाणार्घ्यं मया दत्तं रोहिण्या सहितो हरे ॥
रोहिणीसहिताय कृष्णाय इदमर्घ्यम् ॥

---

No 8277. कृष्णजयन्तीव्रतार्घ्यश्लोकाः.
KṚṢṆAJAYANTĪVRATĀRGHYAŚLOKĀḤ.

Page, 1. Lines, 4 on a page.

Begins on fol. 78a of the MS. described under No. 430, wherein this is called Jayantyarghyam.

Complete.

Similar to the above.

**Beginning**:

जातः कंसवधार्थाय भूभारोत्तारणाय च ।
दानवानां विनाशाय दैत्यानां निधनाय च ॥

**End:**

क्षीरोदार्णवसम्भूत अत्रिनेत्रसमुद्भव ।
गृहाणार्घ्यं मया दत्तं रोहिणीसहितश्शशिन् ॥
रोहिणीसहितचन्द्रमसे नमः इदमर्घ्यं समर्पयामि ॥

---

No. 8278. केदारव्रतकल्पः.

KEDĀRAVRATAKALPAḤ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 26a of the MS. described under No. 3105.

Complete.

On the Vrata which consists in the worship of Śiva on the 8th day of the bright fortnight in the month of Bhādrapada. The observance of this Vrata is considered to have the power of enabling one to obtain prosperity in life and salvation after death. A story illustrating the religious importance of the Vrata is also given.

**Beginning:**

शुद्धस्फटिकसंकाशं व्याघ्रचर्माजिनाम्बरम् ।
बिभ्राणं परशुं हस्ते मृगाभयवरं तथा ॥
प्रसन्नं पञ्चवदनं त्रिनेत्रं शशिशेखरम् ।
पद्मासनसुखासीनं पद्मासनकृतस्तवम् ॥
पार्वतीवदनाम्भोजविकासनवभास्करम् ।
स्कन्दनन्दिगणेशाद्यैः सेवितं पार्वतीसखम् ॥
एवंविधं महादेवं ध्यायेत् केदारनायकम् ॥ ध्यानम् ॥
सदाशिव नमस्तुभ्यं दयापर हर प्रभो ।
गृहाणेमां कृतां पूजामागच्छ शशिशेखर ॥ आवाहनम् ॥

* * * *

प्रदक्षिणनमस्कारः । मन्त्रहीनमिति चार्चनम् ॥

**Colophon:**

इति पूजाविधिः ।

कथाश्रवणम् । सूत उवाच—

यस्य प्रसादात्सञ्जातं भुवनं सचराचरम् ।
तं प्रणम्य महादेवं भगवन्तं सदाशिवम् ॥
केदारव्रतमाहात्म्यं सर्वकल्याणकारिणम् ।
प्रवक्ष्यामि जगद्भूतौ मुनिप्रवरसम्मतम् ॥

* * * *

मासि भाद्रपदेऽष्टम्यां शुक्लपक्षे समाहितः ।
क्षौमैः कार्पासजैर्वापि पाद्मैर्वापि यथाशुचि ॥
हस्ते बद्ध्वा प्रतिसरमेकविंशतिसूत्रकैः ।
उपोष्य रजनीं तां च कृत्वा ब्राह्मणभोजनम् ॥

**End:**

प्रार्थयेदिदमाकाङ्क्षी व्रतमेतत्समादिशेत् ।
महतीं सम्पदं प्राप्य शिवसायुज्यमाप्नुयात् ॥

**Colophon:**

इति श्रीस्कान्दपुराणे केदारव्रतकल्पकथा सम्पूर्णा ॥

---

No. **8279.** केदारव्रतकल्पः.
KĒDĀRAVRATAKALPAḤ.

Pages, 13. Lines, 4 on a page.

Begins on fol. 27*a* of the MS. described under No. 8178.
Complete.
Similar to the above.

**Beginning:**

महिषां (ष्या) वृषभारूढं जटामकुटधारिणम् ।
चतुर्बाहुसमार(मुदारा)ङ्गं व्याख्यामुद्राक्षधारिणम् ॥

घुटिकापुस्तकंवारं(कवरं) सर्वाभरणभूषितम् ।
दक्षिणाग्रकरे वामं ध्यायेदेवं सदाशिवम् ।

**End:**

सर्वपापविनिर्मुक्तस्सर्वसौभाग्यसंव(वर्ध)नम् ।
केदारव्रतमेतत्तु उमादेवीप्रकाशितम् ॥

**Colophon:**

इति ब्रह्माण्डपुराणे ब्रह्मसनत्कुमारसंवादे केदारव्रतकल्पस्सम्पूर्णः ॥

---

No. 8280. केदारेश्वरव्रतकल्पः.

KEDAŚEŚVARAVRATAKALPAḤ.

Pages, 26. Lines, 4 on a page.

Begins on fol. 10a of the MS. described under No. 3055.

Complete.

Similar to the above. The Vrata-katha also is given.

**Beginning:**

चतुर्भुजं वृषारूढं न्यासमुद्राक्षधारिणम् ।
घुटिकापुस्तकधरं सर्वाभरणभूषितम् ॥
दक्षिणामूर्तिमीशानं ध्यायेद्देवं सदाशिवम् । केदारध्यानम् ।

शशिभूषणाय नमः, गौर्यै नमः आवाहनम् । त्र्यम्बकाय नमः आसनम् गणपतिपूजां कृत्वा देवस्य दक्षिणभागे मण्डूकमावाहयेत् कालाग्निरुद्रञ्च मध्ये ।

* * * *

विरूपाक्षाय नमः नमस्कारः ।

नमश्शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ।
प्राणभृतन्तु जन्तूनां सूत्रन्ते धारयाम्यहम् ॥

सूत्रधारणमन्त्रः ।

कथा सनत्कुमार उवाच—

श्रृणु व्यास परं गुह्यं क्षेत्रमैशानमुत्तमम् ।
हिमवद्गिरिमूर्ध्न्येकं तटस्थं सुमनोहरम् ॥
क्षेत्राणामपि षष्टीनां मध्ये संख्यातमुत्तमम् ।
केदारमिति विख्यातं नाम्ना त्रैलोक्यपूजितम् ॥

**End:**

केदारेशकथां पुण्यामिमां यः श्रृणुयात्कथाम् ॥
सर्वपापविनुर्मुक्तो भुक्त्वा भोगान् यथेप्सितम् ।
अन्ते जगाम परममीश्वरस्यैव मन्दिरम् ॥

**Colophon:**

इति स्कान्दे पुराणे केदारेश्वरव्रतकल्पं सम्पूर्णम् ॥

---

No. 8281. केदारेश्वरव्रतकल्पः.

KĒDĀRĒŚVARAVRATAKALPAḤ.

Substance, palm-leaf. Size, 11 × 1⅜ inches. Pages, 27. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are **Varalakṣmivratakalpa** 15*a*, Kēdārēśvaravratakalpa 21*a*.

Complete.

Similar to the above. The story given here is the same as that in the above.

**Beginning:**

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ . . . . . . .
केदारेश्वरपूजाङ्करिष्ये । तदङ्गं कलशपूजाङ्करिष्ये ॥ . . . . .

वटमूलस्थितन्देवं पञ्चास्यं पार्वतीप्रियम् ।
वरदाभयहस्तञ्च सर्वाभरणभूषितम् ॥

व्याघ्रचर्मधरन्देवं तारकासुरसंहरम् ।
एवं ध्यायेन्महादेवं सर्वकामफलप्रदम् ॥
अत्रागच्छ जगद्वन्द्य सुरराजार्चितेश्वर ।
अनाथनाथ सर्वज्ञ गीर्वाणपरिपूजित ॥
केदारेश्वराय नमः—आवाहनम् ।

**End:**

तैलञ्च लवणञ्चापि वर्जयित्वा व्रतञ्चरेत् ।
आदौ मध्ये तथा चान्ते कुर्यादुद्यापनं सुधीः ॥

**Colophon:**

पूजाविधानं सम्पूर्णम् ॥

---

No. **8282.** केदारेश्वरव्रतकल्पः.

KEDĀREŚVARAVRATAKALPAḤ.

Pages, 18. Lines, 5 on a page.

Begins on fol. 1a of the MS. described under No. 8197.

Complete. From Bhaviṣyōttarapurāṇa.

Similar to the above.

**Beginning:**

महेशं वृषभारूढं विश्वमूर्तिं सदेविकम् ।
अथवा दक्षिणामूर्तिं चतुर्बाहुं त्रिलोचनम् ॥
गोक्षीरधवळाकारं जटाखण्डेन्दुशेखरम् ।
वरदाभयहस्तञ्च स्पृशन्तं शैलनन्दनाम् ॥
देवदेव महादेव पार्वतीप्राणनायक ।
त्वां ध्याये मनसा देवं पाहि मां परमेश्वर ॥ ध्यानम् ।
सदाशिव नमस्तेऽस्तु शर्वाणिहृदयेश्वर ।
इमां मया कृतां पूजां गृहाण करुणानिधे ॥ आवाहनं समर्पयामि ।

* * * *

नमस्ते देवदेवेश नमस्ते जगतां प्रभो ।
गौरीनाथ नमस्तुभ्यं केदारेश्वर ते नमः ॥ प्रतिग्रहमन्त्रः ।

**Colophon:**

इति भविष्योत्तरपुराणे केदारेश्वरपूजाविधानं समाप्तम् ॥

कथा युधिष्ठिर उवाच—

धर्मा बहुविधाः प्रोक्तास्त्वयान्वितफलान्विताः ।

इदानीं श्रोतुमिच्छामि व्रतं सम्पत्करं प्रभो ॥

श्रीकृष्ण उवाच—

शृणु राजन् प्रवक्ष्यामि केदारव्रतमुत्तमम् ।

आधारं सर्वजन्तूनां सदाविजयकारणम् ॥

* * * *

युधिष्ठिर उवाच—

देवदेव महादेव त्वया सम्यगुदीरितः ।

केन वा कथितं पूर्वं केन वाचरितं पुरा ॥

**End:**

येनेदं व्रतमाहात्म्यं कथितं येन वा श्रुतम् ॥

तयोस्तु त्रिषु लोकेषु दुर्लभं नात्र किञ्चन ।

किं मन्त्रव्रततः कृत्वा न लभ्यं भुवनत्रये ॥

**Colophon:**

इति भविष्योत्तरपुराणे केदारेश्वरव्रतं सम्पूर्णम् ॥

---

No. 8283. केदारेश्वरव्रतकल्पः.

KEDĀREŚVARAVRATAKALPAḤ.

Pages, 19. Lines, 6 on a page.

Begins on fol. 55*b* of the MS. described under No. 5765, and not on 53*a* as shown therein.

Complete.

Similar to the above.

**Beginning:**

देवदेवमहिराजिभूषणं पार्वतीवदन(पद्म)षट्पदम् ।

जन्ममृत्युजरनाशनं परं चिन्तयाम्यखिललोकनायकम् ॥ इति ध्यानम् ।

केदारदेव देवेश वृषवाहन शाश्वत ।
आगच्छ प्रतिमां श्रीमन् गुणालय नमोऽस्तु ते । आवाहनम् ।

**End :**

केदारदेवो भगवान्महेशः प्रतिग्रहीता च स एव शम्भुः ।
तस्मात्तया दत्तमिदञ्च सर्वं प्रतिगृहीतं हि मया विभाव(व्य)म् ॥

**Colophon :**

इति पूजाविधानम् ॥

---

## No. 8284. केदारेश्वरव्रतकल्पः.
## KEDĀREŚVARAVRATAKALPAḤ.

Substance, palm-leaf. Size, 12 × 1⅜ inches. Pages, 30. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 5*a*. The other work herein is Ganapatipūja 1*a*.

This is taken from Bhaviṣyōttarapurāṇa.

Stated to have been transcribed on the twelfth day of the dark fortnight in the year Kīlaka.

Complete.

Similar to the above.

**Beginning :**

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ . . . . . . .
श्रीकेदारेश्वरप्रीत्यर्थं श्रीकेदारेश्वरपूजां करिष्ये, तदङ्गकलशपूजां करिष्ये । पीठपूजां कुर्यात् ।

हेमरत्नमयं दिव्यं दोरकं तत्स्वरूपकम् ।
स्थापयामि महादेव केदारवासिने नमो नमः ॥

**End :**

स्त्रीणां च लभते पुण्यं धनधान्यसमृद्धिदम् ।
पुत्रैश्च परिवृत्तोऽन्ते शिवलोके महीयते ॥

**Colophon:**

इति भविष्योत्तरपुराणे केदारव्रतकल्पं सम्पूर्णम् ॥

---

No. 8285. केदारेश्वरव्रतकल्पः.

KEDĀREŚVARAVRATAKALPAḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 15*a* of the MS. described under No. 8178.

Incomplete.

Similar to the above.

**Beginning:**

हिमाद्रिमध्यसंलग्नं जटामकुटमण्डितम् ।
पञ्चवक्त्रं दशभुजं त्रिणेत्रं चन्द्रशेखरम् ॥
शुद्धस्फटिकसङ्काशं पार्वतीप्रियमुत्तमम् ।
एतत्स्वरूपं सञ्चिन्त्य पूजयेत्परमेश्वरम् ॥ ध्यानमन्त्रः ।
आराधितो नमस्कृत्य सिद्धैर्देवासुरादिभिः ।
आराधयामि भक्त्या त्वामागच्छ परमेश्वर ॥ आवाहनमन्त्रः ।

**End:**

कर्पूरादिसुगन्धाद्यैर्नागवल्लीदलैरपि ।
पूगीफलैश्च संयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥
ताम्बूलं पश्चाद्धूपदीपौ पूर्वोक्तमन्त्राभ्याम् ॥

---

No. 8286. केदारेश्वरव्रतकल्पः.

KEDĀREŚVARAVRATAKALPAḤ.

Pages, 16. Lines, 6 on a page.

Begins on fol. 58*a* of the MS. described under No. 2907.

Complete.

Similar to the above.

**Beginning:**

त्रिलोचनं चतुर्बाहुं स्फुरच्चन्द्रार्धशेखरम् ।
उमालिङ्गितवामाङ्गं वृषभोपरिसंस्थितम् ॥

हेमकूटाद्रिमध्यस्थं ध्यायेत्सर्ववरप्रदम् । ध्यानम् ।
आगच्छ देवदेवेश वृषभोपरिसंस्थित ।
केदारदेव सर्वेश सर्वकामफलप्रद ॥ आवाहनम् ।

**End:**

य इदं कीर्तयेन्मर्त्यश्शृणुयाद्यश्च भक्तितः ।
तावुभौ पापनिर्मुक्तौ सर्वसौभाग्यसंयुतौ ॥
पुत्रपौत्रैः परिवृतौ भुक्त्वा भोगांश्च वाञ्छितान् ।
अन्ते च व्रजतो मुक्तिं केदारस्य प्रसादतः ॥

**Colophon:**

इति भविष्योत्तरपुराणे कृष्णयुधिष्ठिरसंवादे केदारव्रतकल्पस्सम्पूर्णः ॥

---

## No. 8287. केदारेश्वरव्रतकल्पः.

## KEDĀREŚVARAVRATAKALPAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 21*a* of the MS. described under No. 8281.

Complete

Similar to the above.

**Beginning:**

पूर्वोक्तएवङ्गुणविशेषणविशिष्टायां शुभतिथौ . . . . . .
. . . केदारेश्वरमुद्दिश्य केदारेश्वरप्रीत्यर्थं केदारेश्वरपूजाङ्करिष्ये । केदारेश्वराय नमः ध्यानं समर्पयामि । आवाहनं समर्पयामि ।

**End:**

एकविंशत्यपूपानि भक्ष्यक्रमुक[फल]पूर्णकैः ।
अर्पितं वायनदानं तुभ्यमहं प्रतिगृह्यताम् ॥
केदारेश्वररूपमहेश्वराय वायनदानं तुभ्यमहं सम्प्रददे न मम ।

एतद्दानसाद्गुण्यार्थं दक्षिणाताम्बूलदानं तुभ्यमहं सम्प्रददे न मम ।
केदारेश्वरदेवतार्पणमस्तु ॥

**Colophon:**

इति पूजाविधानं सम्पूर्णम् ॥

---

No. 8288. केदारेश्वरव्रतकल्पः.

KĒDĀREŚVARAVRATAKALPAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 19a of the MS. described under No. 2488, wherein it is called Kēdāragaurīvrata.

Incomplete.

Similar to the above.

**Beginning:**

शुद्धस्फटिकसङ्काशं व्याघ्रचर्माजिनाम्बरम् ॥

* * * *

एवंविधं महादेवं ध्यायेत्केदारनायकम् ॥ ध्यानम् ।

सदाशिव नमस्तुभ्यं दयापर वरप्रभो ।
गृहाणेमां कृतां पूजामागच्छ शशिशेखर ॥ आवाहनम् ॥

**End:**

नाळिकेराम्रपनसैः पूगपुन्नागचम्पकैः ।
एतैश्चान्यैश्च तरुभिः शोभितं पुण्यकाननम् ॥
तत्तस्य मध्यशिखरे योगिवृन्दनिषेविते ।
यक्षगन्धर्वकिंपुरुषयोगिवृन्दनिषेविते ॥

---

No. 8289. गजगौरीव्रतकल्पः.

GAJAGAURĪVRATAKALPAḤ.

Pages, 11. Lines, 16 on a page.

Begins on fol. 33a of the MS. described under No. 3846.

Complete. From Skandapurāṇa

On the Vrata which consists in the worship of the image of Gauri as seated on an elephant. This Vrata is observed with a view to obtain worldly prosperity and also salvation. This is begun on the day when th : sun enters the asterism Hasta.

**Beginning:**

पुष्पाक्षतान् गृहीत्वा—

तुहिनाद्रिसुतान्देवीं गजपृष्ठागतां शुभाम् ।
सर्वसौख्यप्रदां भद्रां ध्यायामि वरदां शुभाम् ॥
श्रीगजगौर्यै नमः ध्यानं समर्पयामि ।

आवाहयामि कल्याणीं भक्तानुग्रहकारिणीम् ।
तारिणीं दुर्गसंसारात्करिणीं जयमङ्गलम् ॥ आवाहनम् ॥

**End:**

चकार विधिवत्कुन्ती व्रतं षोडशवार्षिकम् ।
तस्यास्तद्व्रतमाहात्म्याचनया लोकविश्रुताः ॥

आसान्निरुपमासाध्यलक्ष्मीराज्यमकण्टकम् ।

राजश्रियं सुखमनुत्तममाशु मोक्तु-
मिच्छन्ति ये तदनु मोक्षसुखं स(च)मर्त्य(ा): ।

ते शङ्करप्रणयिनीं वरद(ान) हस्ति-
कुम्भोपरिस्थितवतीं परिपूजयन्ति ॥

**Colophon:**

इति स्कान्दपुराणे गजगौरीव्रतं संपूर्णम् ॥

---

No. **8290.** गोपद्मव्रतकल्पः.
GOPADMAVRATAKALPAḤ.

Pages, 3. Lines, 6 on a page.
Begins on fol. 70*a* of the MS. described under **No. 2907.**
Complete. From Skāndapurāṇa.

This Vrata consists in decorating a cowshed and in worshipping Śrī Kṛṣṇa conceived as being present in that shed. This is observed on the twelfth day of the bright fortnight in the month of Āṣāḍha.

**Beginning:**

सूत उवाच—

श्रृणुध्वं मुनयस्सर्वे सर्वपापप्रणाशनम् ।
सर्वसम्पत्प्रदं स्त्रीणां पतिपुत्रात्ममोक्षदम् ॥
गोपद्मव्रतमाख्यातं तच्छृणुष्व समाहितः ।

* * * *

श्रीकृष्ण उवाच—

आषाढे शुक्लपक्षे तु द्वादश्याश्च विशेषतः ।
गोपद्मव्रतमाख्यातं तद्विधानं वदामि ते ॥

**End:**

यः पठेदिदमाख्यानं श्रृण्वन्ति श्रद्धयान्विताः ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

**Colophon:**

इति स्कान्दपुराणे गोपद्मव्रतकल्पं सम्पूर्णम् ॥

---

No. 8291. गोपद्मव्रतकल्पः

GŌPADMAVRATAKALPAḤ.

**Pages**, 3. Lines, 8 on a page.

Begins on fol. 366 of the MS. described under No. 8177.

Complete. From Padmapurāṇa.

Similar to the above.

**Beginning:**

पद्मपुराणे—ब्रह्मविष्णुमहेशाना ऋषयश्च तपोधनाः ।
दिक्पाला द्वादशादित्या वसवः काल एव च ॥
चित्रगुप्तश्च गन्धर्वाः कृष्णव्यासौ च नारदः ।
अन्ये देवा महात्मानः पुराणस्मृतिपारगाः ॥

एते चान्ये च बहवः तस्थुस्सर्वे समान्तरे ।

* * * *

एतद्वचस्ततः श्रुत्वा सुभद्रा प्राह केशवम् ।
विधानं कीदृशं तत्र कः पूज्यः किं हि तत्फलम् ॥
एतत्सर्वं समाचक्ष्व सोदर्याः प्रियकारणात् ।

श्रीकृष्ण उवाच —

गोविन्दे शयनं प्राप्ते एकादश्यामुपोष्य च ॥
समालिप्य च गोस्थानं नीलपीतसितासितैः ।
वर्णैस्तत्र त्रयस्त्रिंशत्पद्मानि च यथाविधि ॥

**End:**

तत्पिष्टं त्रिविधं कृत्वा कृष्णायैकं प्रदापयेत् ।
एकं सदक्षिणन्दद्याद्विप्रायाध्यात्मवेदिने ॥
स्वयमेकन्तदैवाद्याद्ब्राह्मणान् भोजयेत्ततः ।
एवं कुर्यात्पञ्चवर्षमुद्यापनमथाचरेत् ॥
आदौ मध्ये तथा चान्ते व्रतोद्यापनमुच्यते ।

---

## No. 8292. गोपद्मव्रतकल्पः.
## GOPADMAVRATAKALPAḤ.

Pages, 3. Lines, 6 on a page.
Begins on fol. 14*a* of the MS. described under No. 8179.
Complete. From Pādmapurāṇa.
Same as the above.

---

## No. 8293. गोपद्मव्रतकल्पः.
## GOPADMAVRATAKALPAḤ.

Pages, 4. Lines, 5 on a page.
Begins on fol. 25*a* of the MS. described under No. 2907.
Complete.

Similar to the above.

For the beginning, see under the previous number.

**End:**

ये कुर्वन्ति व्रतमिदं लभन्ते फलमुत्तमम् ।
इह भुक्त्वा सुखं चान्ते विष्णुसायुज्यमाप्नुयात् ॥

**Colophon:**

इति श्रीपद्मपुराणे सुभद्राकृष्णसंवादे गोपद्मव्रतकल्पं सम्पूर्णम् ॥

---

No. 8294. गोपद्मव्रतकल्पः.

GOPADMAVRATAKALPAḤ.

Pages, 18. Lines, 5 on a page.

Begins on fol. 13*a* of the MS. described under No. 8196.

Complete. From Bhaviṣyōttarapurāṇa.

Similar to the above.

**Beginning:**

कस्मिन्मासि सिते पक्षे एकादश्यामुपोषितः ।
स्नात्वा पद्मादिरचनां कृत्वा श्रुत्वा कथामिमाम् ॥
पूर्ववन्नियमं कृत्वा हलिं संपूज्य यत्नतः ।
कुर्याज्जागरणं तत्र द्वादश्यां प्रातरुत्थिता ॥
कृतनिश्च . . मातत्र शृणुयाद्द्विजमुत्तमम् ।
प्रस्थमात्रेण पिष्टेन गोधूमेन विशेषतः ॥

**End:**

दृता दृष्ट्वा महाश्चर्यं दर्शितन्तु सुभद्रया ।
इदं हुतमयं गाव पुत्रेण सहितान्तथा ॥
तया प्रोक्तन्तु सर्वासां स्त्रीणां लोकहिताय च ।
व्रतस्यास्य प्रभावेण नरकं नैव गच्छति ॥

* * * *

मुनयस्सनकाद्यास्तु संवादं यमकृष्णयोः ॥

**Colophon:**

इति श्रीभविष्योत्तरपुराणे कृष्णयमसंवादे गोपद्मव्रतकल्पः समाप्तः ।

No. 8295. गोपद्मव्रतकल्पः.
GOPADMAVRATAKALPAḤ.

Pages, 9. Lines, 5 on a page.

Begins on fol. 8*a* of the MS. described under No. 8196.

Complete.

Similar to the above.

**Beginning:**

एवङ्गुणतिथौ . . . . . . . . . . . . . . . . भविष्योत्तरपुराणोक्तगोपद्मव्रतकल्पोक्तसंपूर्णसकलफला- वाप्त्यर्थं क्षीराब्धिशयनश्रीलक्ष्मीनारायणमुद्दिश्य श्रीलक्ष्मीनारायणप्रीत्यर्थं गोपद्मव्रतपूजाङ्करिष्ये । आदौ गणपतिं प्रार्च्य पुण्याहं कुर्यात् ॥

**End:**

अर्घ्यं गृहाण देवेश वासुदेव श्रिया सह ।
ईप्सितम्मे वरन्देहि श्रियं मोक्षञ्च शाश्वतम् ॥ अर्घ्यम् ।

वेदाह—स्ते । नमो ब्रह्मण्यदेवाय—स्मापणम् । मूले कल्पतरोः । पद्मप्रिये । ततो नृत्यगीतवाद्यच्छत्रचामरराजोपचारान् समर्पयामि । यस्य स्मृत्या च । एवञ्चतुर्यामपूजा ॥

---

No. 8296. गोपद्मव्रतकल्पः.
GOPADMAVRATAKALPAḤ.

Pages, 16. Lines, 5 on a page.

Begins on fol. 19*a* of the MS. described under No. 8195.

Complete. From Bhaviṣyōttarapurāṇa.

Similar to the above.

**Beginning:**

एवङ्गुणेत्यादि इह जन्मनीत्यादिमनोवाक्कायकर्मेन्द्रियव्यापारैः रहसि प्रकाशे च ज्ञानतोऽज्ञानतश्च संभावितानां पापानां . . . . . . . . . . . . भविष्योत्तरपुराणोक्तप्रकारेण शुभ-

द्राषाचरितगोपद्मव्रतोद्यापनं(नं)करिष्ये । ततः कलशपूजाङ्करिष्ये । कलशस्य मुखे विष्णुरिति कलशपूजां शङ्खपूजां ब्राह्मणपूजाञ्च कृत्वा गोपालकृष्णपूजाङ्कुर्यात् ।

पीताम्बरधरन्देवं तप्तचामीकरप्रभम् ।
विचित्रमौलिरत्नाढ्यं ध्यायामि यमसादनम् ॥ ध्यानम् ।

**End:**

कृत्वा महद्व्रतं सम्यक दर्शितञ्च सुभद्रया ।
साधु साध्विति तां नत्वा ययुर्दूता यथागताः(तम्) ॥
व्रतस्यास्य प्रभावेण नरको नैव देहिनाम् ।

* * * *

ते सर्वे पापनिर्मुक्ता विष्णुसायुज्यमाप्नुयुः ॥

**Colophon:**

इति भविष्योत्तरपुराणे यमकृष्णसंवादे गोपद्मव्रतकल्पं सम्पूर्णम् ॥

---

## No. 8297. गोपद्मव्रतकल्पः.
## GŌPADMAVRATAKALPAḤ.

**Pages**, 10. Lines, 5 on a page.

Begins on fol. 6*b* of the MS. described under No. 3375.
Complete.
Similar to the above.

**Beginning:**

शृणुध्वमृषयस्सर्वे सर्वपापप्रणाशनम् ।
सर्वसम्पत्करं नृणां पतिपुत्रान्नमोक्षदम् ॥
आषाढे शुक्लपक्षे तु एकादश्यामुपोष्य च ।
द्वादश्यां प्रातरुत्थाय नदीं गत्वा समुद्रगाम् ॥
स्नात्वा धौताम्बरधृतां गन्धमाल्यादिभूषणैः ।
गोष्ठे वाथ नदीतीरे गोमयालेपितस्थले ॥

* * * *

उपायनं गृही पात्र(ह्रण त्वं) सर्वोपस्करसंयुतम् ।
संसारार्णवमग्नोऽहं पाहि देवकिनन्दन ॥ दानमन्त्रः ।

इत्यर्चनविधिः ॥

कथा च सूत उवाच—

शृणुध्वमृषयस्सर्वे सर्वपापप्रणाशनम् ।
सर्वसंपत्करं नृणां पतिपुत्रात्ममोक्षदम् ॥

**End:**

यः पठेदिदमाख्यानं शृण्वन्ति(णोति) श्रद्धयान्वितः ।
स याति पापनिर्मुक्तो विष्णुलोकं निरामयम् ॥

**Colophon:**

इति श्रीपद्मपुराणे गोपद्मव्रतं संपूर्णम् ॥

---

## No. 8298. गोपद्मव्रतकल्पः.

## GŌPADMAVRATAKALPAḤ.

**Pages, 5.** Lines, 5 on a page.

Begins on fol. 17*b* of the MS. described under No. 2908.

Complete.

Same as the above.

**Colophon:**

इति गोपद्मविधिः समाप्तः ॥

---

## No. 8299. गोपद्मव्रतोद्यापनम्.

## GŌPADMAVRATŌDYĀPANAM.

**Pages, 4.** Lines, 6 on a page.

Begins on fol. 71*a* of the MS. described under No. 2907.

Complete. From Skāndapurāṇa.

On the manner of completing the Gōpadmavrata. The Vrata is usually observed for five years.

**Beginning:**

एवङ्गुणाविशेषणविशिष्टायां तिथौ श्रीकृष्णमुद्दिश्य श्रीकृष्णप्रीत्यर्थं स्कान्दपुराणोक्तगोपद्मव्रतोद्यापनं करिष्ये । इति सङ्कल्प्य चतुरश्रमात्रं गोमेयनोपलिप्य रङ्गवल्लया त्रयस्त्रिंशत्पद्मानि लिखित्वा ।

सुवर्णप्रतिमां कृत्वा सलक्ष्मीकचतुर्भुजम् ।
सुवर्णमतसीपत्रं पद्मं रजतमेव वा ॥

**End:**

गवामङ्गेषु गोदानमन्त्रः—

सवत्सप्रतिमां गावं आचार्याय च दीयताम् ।
बन्धुभिः सह भुञ्जीत ब्राह्मणानां स्वशक्तितः ।
आशिषश्च गृहीत्वाथ व्रतमेतत्समर्पयेत् ॥

**Colophon:**

इति श्रीस्कान्दपुराणे गोपद्मव्रतोद्यापनं नामाष्टत्रिंशोऽध्यायः ॥

---

## No. 8300. गोपद्मव्रतोद्यापनम्.
## GOPADMAVRATODYĀPANAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 15*a* of the MS. described under No. 8179.
Complete. From Skandapurāṇa.
Similar to the above.

**Beginning:**

सूत उवाच—

शृणुध्वमृषयस्सर्वे सर्वपापप्रणाशनम् ।
सर्वसंपत्करं नृणां पतिपुत्रादिमोक्षदम् ॥
गोपद्मव्रतमाख्यातं तच्छृणुष्व समाहितः ।
पुरा वै द्वापरस्यान्ते वनं प्राप्नोति पाण्डवः ॥

कृष्णदेवं समाहूय द्रौपद्या पाण्डवो भुवि ।
कृष्ण कृष्ण कृपालुस्त्वमगतीनां गतिर्भव ॥
व्रतमेतत्पञ्चवर्षं कुर्यादुद्यापनं ततः ।
सुवर्णप्रतिमां कृत्वा सलक्ष्मीकं चतुर्भुजम् ॥

**End:**

कृष्णधेनुं सवत्सां च वस्त्रालंकारवेष्टनैः ।
एवं कृते द्रौपदी तु साम्राज्यश्रियमाप्नुयात् ॥

**Colophon:**

इति श्रीस्कन्दपुराणे गोपद्मव्रतोद्यापनं संपूर्णम् ॥

---

## No. 8301. गोमयव्रतकल्पः.
## GŌMAYAVRATAKALPAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 456 of the MS. described under No. 5765, wherein it is included in Gōmayavrata.

Complete. From Bhaviṣyōttarapurāṇa.

This Vrata consists in the worship of the Sun, of Yama the god of death and of Citragupta. The use of cowdung forms one of the details relating to this Vrata which is to be observed in one of the six months—Māgha, Phālguna, Vaiśākha, Jyēṣṭha, Śrāvaṇa and Kārtika. This Vrata is considered to have the power of enabling one to get rid of sins.

**Beginning:**

ब्रह्मोवाच—

धर्मा[न्]: बहुविधान्(:)प्रोक्तास्त्वयानन्तफलप्रदाः ।
इदानीं श्रोतुमिच्छामि प्रयत्नेन तु नारद ॥
गोमयव्रतमाहात्म्यं जातं सर्वसुविस्तरम् ।
सर्वदुःखोपशमनं सर्वकामफलप्रदम् ॥

* * * *

पितामह उवाच—

श्रृणु वत्स यथापूर्वमृषिपत्नी चकार ह ।
गोमयेनानुलिप्याथ मुख्यमादी(मङ्गा)नि विन्यसेत् ॥
गोसूक्तिपठनं कुर्यात् स्नात्वा विधिवदाचरेत् ।
एवं द्वादशभिस्स्थानैर्धौतवासांसि धारयेत् ॥
गतपापविशुद्ध्यर्थं गोशकृद्भक्षमाचरेत् ।
माघे फाल्गुनवैशाखे ज्येष्ठे श्रावणकार्तिके ॥
एतेषु षट्सु मासेषु पौर्णमास्यां व्रतञ्चरेत् ।

**End :**

य इदं श्रृणुयान्नित्यं यश्चापि (इच्छंस्तु) परमां गतिम् ।
ते सर्वे (स सर्व) पापनिर्मुक्तस्सूर्यलोके महीयते ॥

**Colophon :**

इति भविष्योत्तरपुराणे ब्रह्मनारदसंवादे गोमयव्रतकल्पं सम्पूर्णम् ॥

---

No. **8302.** गोमयव्रतोद्यापनकल्पः.

GŌMAYAVRATŌDYĀPANAKALPAḤ.

Pages, 14. Lines, 6 on a page.

Begins on fol. 39*a* of the MS. described under No. 5765, wherein it is called Gōmayavrata.

Complete. From Bhaviṣyōttarapurāṇa.

On the manner of completing the Gōmayavrata described under the previous number.

**Beginning :**

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ मम अस्याः गोमयव्रतोद्यापना-
ख्यकल्पेन पूर्वेद्युस्सायंकाले पुण्याहवाचनं कृत्वा पूर्वदिग्भागे मण्टपं कारयित्वा

. . . . . . . . . . . . . कृष्णाङ्गारकचतुर्दश्यां वा मकरसङ्क्रान्तौ वा माघे वा कुर्यात्। एवङ्गुणतिथौ . . . . . यथासंभवं ध्यानावाहनादिषोडशोपचारैर्यमपूजां तदङ्गधेनुपूजां च आचार्यर्त्विग्वरणपूर्वकं पाठपूजापुरस्सरं स्कान्दपुराणोक्तप्रकारेण गोमयोद्यापनङ्करिष्ये । . . . . . . . . . . . . . . .

जन्मप्रभृति यत्किंचित्पातकञ्चोपपातकम् ।
तत्सर्वं नाशनं यातु धर्मराज नमोऽस्तु ते ॥

अस्मै ब्राह्मणाय स्वर्णस्वर्चितवस्त्रद्वयकलशान् श्रीमते नामधेयाय तुभ्यमहं संप्रददे न मम । अनेन यमस्वरूपमण्टपदानेन गोदानेन धर्मराजस्सुप्रीतो वरदो भवतु ॥

इति पूजाविधानं सम्पूर्णम् ॥

कथा श्यामिलोवाच—

स्त्रीणां रजस्वलाज्जातं ज्ञानाज्ञानकृतं . . . ।
संस्पृष्टास्पृष्टदोषे च भाण्डस्पर्शनकिल्बिषम् ॥
ज्ञानाज्ञानकृतश्चैव प. तच्चविनाशनम् ।
पुत्रैश्च पुत्रिकाभिश्च सह भोजनकिल्बिषम् ॥

* * * *

यम उवाच—

शृणु कल्याणि वक्ष्यामि व्रतानामुत्तमं व्रतम् ।
गोमयाख्यं व्रतं ख्यातं स्त्रीणां पापहरं परम् ॥

**End:**

य इदं शृणुयान्नित्यं भक्तियुक्तेन चेतसा ।
पठित्वा तु नरो देवि स्वर्गलोके महीयते ॥

**Colophon:**

इति भविष्योत्तरपुराणे श्यामलायमसंवादे गोमयव्रतोद्यापनकल्पः सम्पूर्णः ॥

## No. 8303. गोमयव्रतोद्यापनकल्पः.

## GŌMAYAVRATŌDYĀPANAKALPAḤ.

Pages, 15. Lines, 5 on a page.

Begins on fol. 2a of the MS. described under No. 5773, wherein it is called Gōmayabhakṣaṇavratakalpa.

Complete. From Bhaviṣyōttarapurāṇa.

Similar to the above.

**Beginning:**

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ . . . . . . . . एवं साङ्गोपाङ्गकल्पोक्तमार्गेण गोमयभक्षणव्रतोद्यापनं करिष्ये । आचार्य-वरणं कृत्वा पुनः प्राणानायम्य पूर्वोक्ततिथौ मम समस्तपापक्षयार्थं श्री-सूर्ययमचित्रगुप्तानुद्दिश्य. श्रीत्यर्थं गोमयभक्षणव्रतोद्यापनाङ्ग . . . प्रथमयामादौ यथासंभवषोडशोपचारपूजाङ्करिष्ये । ततः कलशपूजां पीठ-पूजाश्च कुर्यात् ।

* * * *

इति पूजाविधानम् ॥

कथा—

यादवाम्भोनिधेः कृष्णं नीलजीमूतसन्निभम् ।
कदाचिदागतं कृष्णं पाण्डुपुत्रः प्रणम्य वै ॥

* * * *

इतिहासकथाः पुण्याः कथयन्तं बलानुजम् ।
आगत्य द्रौपदी तस्मै साष्टाङ्गं प्रणिपत्य च ॥

द्रौपद्युवाच—

त्रिकालजनितं घोरं स्त्रीणामज्ञानसंभवम् ।
पातकं त्रिविधञ्चैव मनोवाकायसंभवम् ॥
त्रिगुणात्मन् त्रिलोकेश पापानां मोक्षदायकम् ।
ब्रूहि मे व्रतमद्यैव मम प्रीत्या महाविभो ॥

श्रीकृष्णः —

यन्मां पृच्छ          स्त्रीणां पापप्रणाशनम् ।
पापसंभवरूपाणि वक्ष्ये तव सतां स्वतः ॥

* * * *

सर्वपापविशुद्ध्यर्थं स्त्रीणां वक्ष्ये महद्व्रतम् ।
रहस्यं व्रतसद्धेतु तव प्रीत्या वरानने ॥

* * * *

श्रीकृष्णः—

मार्गशीर्षे तथा माघे वैशाखे श्रावणेऽपि वा ।
कार्त्तिके वा रवेर्वारे दन्तधावनपूर्वकम् ॥

**End:**

होमः पूर्णाहुतेः पश्चात् प्रतिमादानमाचरेत् ।
स्वर्णभागसमायुक्तप्रतिमादानमाचरेत् ॥
गोदानञ्च ततः कुर्याद्व्रतसम्पूर्तिकारकम् ।
ब्राह्मणान् भोजयेत्पश्चाद्बन्धुभिः सह भोजयेत् ॥
दीनान्धकृपणानाथ दानं शक्त्यनुसारतः ।
कुर्वन्ति ये व्रतं सम्यग्यावद्भक्तिसमन्विताः ॥
व्रतमेतत्प्रकुर्वन्ति तेषां पुण्यफलं शृणु ।

* * * *

कल्पकोटिसहस्राणि सूर्यलोके महीयते ॥

**Colophon:**

इति भविष्योत्तरपुराणे श्रीकृष्णद्रौपदीसंवादे गोमयभक्षणव्रत(तोद्यापन)कल्पं संपूर्णम् ॥

---

No. **8304.** चतुर्दशीव्रतोद्यापनम्.

CATURDAŚĪVRATŌDYĀPANAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 70a of the MS. described under No. 3055.

Incomplete.

On the manner of completing the Vrata which consists in the worship of Śiva on the 14th day of the bright and dark fortnights in every lunar month. This Vrata is generally observed for a period of fourteen years.

**Beginning:**

ध्यानम्—

ओं नमः पञ्चवक्त्राय दशबाहुत्रिणेत्रिणे ।
महावृषाधिरूढाय शेषाभरणभूषिणे ॥
उमादेहार्धसंयुक्त सर्वमूर्ते नमोऽस्तु ते ।

* * * *

चतुर्दशानामब्दानां कृत्वोद्यापनकर्मकृत् ।
चतुर्दश्यामुपोष्यैवं पौर्णमास्यां समापयेत् ॥
आदौ मध्ये तथा चान्ते व्रतोद्यापनमाचरेत् ।
पूजां कृत्वा तु कुर्वीत पूर्वाह्णे चापराह्णिके ॥

**End:**

चतुर्दशग्रन्थियुक्तं सौवर्णं शुभलक्षणम् ।
आचार्याय प्रकुर्वीत प्रत्येकश्च यथाम(ति) ॥

---

## No. 8305. चन्द्रदीपदानम्.
## CANDRADĪPADĀNAM.

**Pages, 2.** Lines, 7 on a page.

Begins on fol. 2*b* of the MS. described under No. 8233.

Complete. From Viṣṇudharmōttara.

This Vrata consists in the worship of Viṣṇu and in the giving away of a lamp as gift and is performed with a view to expiate certain sins which are enumerated in the extract below.

**Beginning:**

देशकालौ सङ्कीर्त्य मम अकालशयनप्रातःसंबद्धप्रलापजउत्कृशौचाक-
रणदेवब्राह्मणदूषणदेवब्रह्मस्वहरणसञ्जातराज्यरक्षणोपेक्षासंभूतकुमारीगर्भसं-
बन्धपतितसम्पर्कपाषण्डजनसंभाषणाकार्यकरणसञ्जातपापक्षयार्थं . .

. . . . . . . . . . . . . . विष्णुधर्मोत्तर-

पुराणोक्तचन्द्रदीपदानङ्करिष्ये । नाममन्त्रेण विष्णुपूजाङ्कृत्वा ब्राह्मणं वि-

ष्णुस्वरूपं गन्धमाल्यादिभिरभ्यर्च्य दद्यात् । दानमन्त्राः—

आदिदेवेश लोकेश लक्ष्मीनारायण प्रभो ।

अकालशयने प्रासमसंबद्धप्रलापतः ॥

उक्तशौचाचकरणाद्देवब्राह्मणदूषणात् ।

End:

इमं चन्द्रदीपं पूर्वोक्तफलं कामयमानस्तुभ्यमहं संप्रददे न मम॥

इति दद्यात् ॥

Colophon:

इति विष्णुधर्मोत्तरे चन्द्रदीपदानम् ॥

लक्ष्मीनारायणानन्त देवदेव जगत्पते ।

चन्द्रदीपप्रदानेन लक्ष्मीमायुश्च वर्धय ॥

---

No. **8306.** चातुर्मास्यव्रतकल्पः.

CATURMĀSYAVRATAKALPAḤ.

Pages, 20. Lines, 5 on a page.

Begins on fol. 178*a* of the MS. described under No. 2745.

Complete.

This is a portion of the Bhaviṣyōttarapurāṇa.

This Vrata consists in the worship of Viṣṇu on all days of religious importance from the month of Āṣāḍha for four months.

**Beginning:**

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ मम समस्तपापक्षयार्थं पुत्र-

पौत्राभिवृद्ध्यर्थमिह जन्मनि जन्मान्तरे च बाल्ययौवनकौमारवार्धकेषु जाग्र

त्स्वप्नसुषुप्त्यवस्थासु मनोवाक्कायकृतमहापातकनिवृत्त्यर्थं वन्ध्यादिचतुष्टय-

निवृत्त्यर्थमिह लोके सकलफलावाप्त्यर्थं परलोके वैकुण्ठप्राप्त्यर्थं . .

. . . . . . . . . . . . . . लक्ष्मीनारायण-

मुद्दिश्य लक्ष्मीनारायणप्रीत्यर्थं चातुर्मास्यव्रतोद्यापनाङ्गत्वेन लक्ष्मीनारायण-प्रीत्यर्थं . . . . . . . . . . . . षोडशोपचारपूजां करिष्ये । तदङ्गमाचार्यब्रह्मऋत्विग्वरणं कुर्यात् । गोमयेन मण्डलं कृत्वा ।

**End:**

सूतः—

एवमुक्त्वा तु सा देवी पतिना शम्भुना तदा ।
चातुर्मास्यव्रतं सम्यक् चकार विधिवत्तदा ॥
स्वस्याग्रजस्य विष्णोश्च भ्रातृपत्न्याश्च तुष्टये ।
लोकानाञ्च हितार्थाय चकार गिरिजा तदा ॥
एतद्व्रतं श्रोत्रमनोहरं परं (?)
साक्षाच्छिवेन कथितं गिरिकन्यकायै ।
साक्षाच्छिवेन कथितं मम भाग्यवृद्ध्यै
विष्णुप्रियं सकलकल्मषनाशनञ्च ॥
एतद्व्रतप्रभावोऽयं मया समुपवर्णितः ।
यूयं ब्रुवन्तु कुर्वन्तु फलमिच्छथ चेद्यदि ॥

**Colophon:**

इति श्रीभविष्योत्तरपुराणे पार्वतीश्वरसंवादे चातुर्मास्यव्रतकल्पं संपूर्णम् ॥

---

## No. 8307. चातुर्मास्यव्रतकल्पवल्ली.

## CĀTURMĀSYAVRATAKALPAVALLĪ.

Substance, palm-leaf. Size, 14¾ × 1¾ inches. Pages, 370. Lines, 5 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Incomplete.

Similar to the above. This contains further a collection from various Purāṇas of passages giving all details connected

with the Vrata: by Virūpākṣa, son of Rāghavārya and a minister of Harihara.

**Beginning:**

मार्कण्डेय उवाच—

अथ स्वपिति धर्मान्ते देवदेवो जनार्दनः ।
लक्ष्मीसहायः सततं शेषपर्यङ्कमास्थितः ॥
एकादश्यामाषाढस्य शुक्लपक्षे जनार्दनम् ।
देवाश्च ऋषयश्चैव स्तुवन्ति दिनपञ्चकम् ॥

* * * *

चातुर्मास्यव्रतं चीर्णं कार्तिके शुक्लपक्षके ।
द्वादश्यां वाथ कार्तिक्यां पञ्चम्यां वा समापयेत् ॥
अष्टम्यां वा कृष्णपक्षे वृश्चिके वाथ सङ्क्रमे ।

* * * *

**Colophon:**

इति श्रीराजाधिराजराजपरमेश्वरश्रीवीरहरिहरमहाराजस्य महामात्येन श्रीराघवार्यतनयेन श्रीविरूपाक्षेण विरचितायां श्रीचातुर्मास्यव्रतकल्पवल्ल्यां प्रतिपदादितिथिदानव्रतानि ।

**End:**

ब्रह्मकैवर्ते—

आषाढादिचतुर्मासान् . . . यो नरः ।
पायसं स्वर्णसंयुक्तं ब्राह्मणाय निवेदयेत् ॥

* * * *

व्यतीपाते वैधृतौ च आषाढादिचतुष्टये ।
स्नानं कृत्वा प्रयत्नेन . . . . . . ॥

No. 8308. चित्रगुप्तव्रतम्.
CITRAGUPTAVRATAM.

Pages, 4. Lines, 4 on a page.

Begins on fol. 27a of the MS. described under No. 8197.

Incomplete.

On the Vrata which consists in the worship of Citragupta on the seventh day of the dark fortnight in the month of Māgha. The observance of this Vrata is considered to have the power of removing sins and diseases.

**Beginning:**

यम उवाच—

श्रुतानि देवदेवेश व्रतानि विविधानि च।
साम्प्रतं मे समाचक्ष्व व्रतानामुत्तमं व्रतम् ॥

ब्रह्मोवाच—

शृणु वत्स प्रवक्ष्यामि व्रतानामुत्तमव्रतम्।
चित्रगुप्तव्रतं भक्त्या सर्वपापप्रणाशनम् ॥
माघमासे च सप्तम्यां मकरे च दिवाकरे।
सप्तम्यां प्रातरुत्थाय दन्तधावनपूर्वकम् ॥
शीतोदकेन सुस्नानं व्रतं नियमपूर्वकम्।
चित्रगुप्तं यमं सूर्यं तत्तन्मन्त्रेण पूजयेत्।

**End:**

यमश्च चित्रगुप्तश्च आदित्यश्च प्रयत्नतः।
पञ्चप्रस्थप्रमाणेन कलशान् वस्त्रसंयुतान् ॥

---

No. 8309. जीववारैकादशीव्रतकल्पः.
JĪVAVĀRAIKĀDAŚĪVRATAKALPAḤ.

Pages, 12. Lines, 5 on a page.

Begins on fol. 13a of the MS. described under No. 8195.

Complete. From Bhaviṣyōttarapurāṇa.

This Vrata consists in the worship of the Sun with a view to get rid of the sin caused by the pollution arising from the touch of women in menses. This is observed on the eleventh day of the bright fortnight in any lunar month whenever that day happens to coincide with a Thursday.

**Beginning:**

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ . . . . . . . .
रजस्वलास्पर्शदोषनिवृत्त्यर्थं जीववारैकादशीप्रयुक्तसूर्यनारायणपूजां करिष्ये ।
तदङ्गकलशपूजां च करिष्ये। कलशं गन्धपुष्पाक्षतैरभ्यर्च्य कलशोदकेन पूजाद्रव्याणि देवमात्मानं सम्प्रोक्ष्य ।

छायादेवीसमायुक्तं भास्करं देवरूपिणम् ।
त्रयीमयतनुं ध्यायेज्जगत्साक्षिमहस्करम् ॥ ध्यानम् ॥

* * * *

अनया षोडशोपचारपूजया च भगवान् सर्वात्मकः छायासंज्ञासमेत-श्रीसूर्यनारायणस्सुप्रीतो वरदो भवतु ।

कथा। श्रीसूतः—

कैलासशिखरे रम्ये रत्नकान्त्या समुज्वले ।
कल्पवृक्षप्रसूनादिनानाकुसुमवासिते ॥

* * * *

ईश्वरः—

शृणु देवि प्रवक्ष्यामि स्त्रीणां रजसमुद्भवम् ।
देवेन्द्रादागतन्देवि चतुर्णां पूर्वमेव हि ॥

* * * *

जीववारेण संयुक्ता शुक्लपक्षे समागता ।
एकादशी महापुण्या सर्वपापप्रणाशिनी ॥
तत्रोपोष्य च सद्भक्त्या पूजयेद्भास्करं विभुम् ।

**End:**

ऋषिपत्न्यश्च गन्धर्वकन्यकाश्च महीतले ॥
नार्यः कृत्वा व्रतमिदमवापुः परमं पदम् ।

**Colophon :**

इति श्रीभविष्योत्तरपुराणे उमामहेश्वरसंवादे जीववारैकादशीव्रतकल्पं सम्पूर्णम् ॥

---

No. **8310.** ज्योतिस्तम्भव्रतकल्पः.

JYŌTISSTAMBHAVRATAKALPAH.

Pages, 11. Lines, 5 on a page.

Begins on fol. 49*a* of the MS. described under No. 179.

Complete. From Bhaviṣyōttarapurāṇa.

On the Vrata which consists in the worship of Śiva on the new-moon day in the month of Āṣāḍha. The observance of this Vrata is considered to be able to bestow long life on one's husband. The burning of a lamp mounted on a post and having a wick soaked in ghee forms a part of the Vrata.

**Beginning :**

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ चिरकालसौमङ्गल्याभिवृद्ध्यर्थं यावच्छक्त्यध्यानावाहनादिषोडशोपचारपूजां च करिष्ये । तदङ्गकलशाराधनम् । कुसुमाक्षतान् गृहीत्वा,

अनेकसूर्यसङ्काशं शशाङ्कैनैकसेवितम् ।
भस्मोद्धूलितसर्वाङ्गं ध्यायेच्छम्भुं जगद्गुरुम् ॥ ध्यानम्(येत्) ।

* * * *

अथातस्सम्प्रवक्ष्यामि व्रतं त्रैलोक्यविश्रुतम् ।
तद्व्रतं पूजया सर्वं सुवासिन्यास्तु कारयन् ॥

युधिष्ठिर उवाच—

यद्व्रतान्तो(न्ते) महापापो(पैः) मुच्यते नात्र संशयः ।
यद्व्रतं तु मया पूर्वं कृतं सर्वव्रतोत्तमम् ॥

कृष्ण उवाच—

* * * *

आषाढस्यासिते पक्षे अमायां तु व्रतन्त्विदम् ।
ज्योतिस्स्तम्भाह्वयं कुर्यान्माङ्गल्याय सुवासिनी ॥

**End:**

य इदं शृणुयान्नित्यं वाच्यमानं नरोत्तमैः ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

**Colophon:**

इति भविष्योत्तरपुराणे कृष्णयुधिष्ठिरसंवादे ज्योतिस्स्तम्भव्रतं सम्पूर्णम् ॥

---

## No. 8311. तुलसीव्रतकल्पः.
## TULASIVRATAKALPAH.

Pages, 3. Lines, 5 on a page.

Begins on fol. 75a of the MS. described under No. 8179.

Complete. From Bhaviṣyōttarapurāṇa.

This Vrata consists in the worship of the Tulasi plant (holy basil). The figure of a lotus of eight petals is drawn in front of the plant for the purpose of worship. This Vrata is observed on the twelfth day of the bright fortnight in the month of Āśvija, and is considered to have the power of bestowing on one all kinds of blessings, such as long life, learning, strength, children, etc.

**Beginning:**

व्यासः—

येन चीर्णेन लोकेऽस्मिन् लभन्ते योषितस्सुखम् ।
तद्व्रतं भगवन् ब्रह्मन् मम ब्रूहि सविस्तरम् ॥

ब्रह्मोवाच—

शृणु व्यास प्रवक्ष्यामि दुर्लभं व्रतसञ्चये ।
सर्वलोकेष्वतितरामुत्तमं तुळसीव्रतम् ॥

* * * * *

अश्वयुग्मासके चैव शुक्लेऽपि हरिवासरे ।
संप्राप्ते तु समारभ्य मासमेकं व्रतश्चरेत् ॥

**End:**

आयुर्विद्या बलं तेजः पुत्राश्च बहवस्तथा ।
यः कुर्यात्तुलसीपूजां संभवन्त्यस्य तद्ध्रुवम् ॥

**Colophon:**

इति भविष्योत्तरपुराणे तुलसीपद्मव्रतं सम्पूर्णम् ॥

---

## No. 8312. तुलसीव्रतकल्पः.
## TULASĪVRATAKALPAḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 135*a* of the MS. described under No. 3055.

Complete.

Similar to the above.

**Beginning:**

देवदेव जगद्वन्द्य जगदानन्दकारक ।
वन्ध्यानां पुत्रलाभार्थं व्रतमौषधपूजनम् ॥
केन पुत्रवती वन्ध्या तद्विधिं वद मे प्रभो ।

कृष्ण उवाच—

साधु देवि त्वया वाक्यं यन्मां(था) वदतिदुर्लभम् ।
वन्ध्यानां पुत्रलाभार्थं व्रतमौषधपूजनम् ॥
येन पुत्रवती वन्ध्या तद्विधिं शृणु मे प्रिये ।
पुराणोक्तेन मार्गेण तुलसीव्रतमादिशेत् ॥
तुलस्याः पुरतो मेध्ये व्रीहिचूर्णं प्रयत्नतः ।

* * * *

पद्मान्यष्टदलैर्युक्तान्यष्टोत्तरशतानि च ॥

* * * *

प्रदक्षिणनमस्कारैः कुर्यादष्टौ च विंशतिः ।
धूपदीपफलन्दद्यात् फलानां फलदायकम् ॥

**End:**

पुष्करादीनि तीर्थानि गङ्गाद्यास्सरितस्तथा ।
वासुदेवादयो देवा वसन्ति तुलसीवने ॥
आरोप्य तुलसी वैश्यः हरिं संपूज्यते(जयेद्)लैः ।
वसते मोदमानस्तु यत्र देवश्चतुर्भुजः ॥

**Colophon:**

इति तुलसीकल्पः समाप्तः ॥

---

No. 8313. तुलसीव्रतकल्पः.
TULASĪVRATAKALPAḤ.

Pages, 7. Lines, 4 on a page.
Begins on fol. 145a of the MS. described under **No. 2914.**
Wants beginning. From Garuḍapurāṇa.
Deals also with the manner of completing the Tulasīvrata.

**Beginning:**

सुवासिनी [कन्यकाचेत्] पतिं प्रायाद्विधवा मोक्षमाप्नुयात् ।
ब्रह्महत्यादिपापानि महान्ति सुबहूनि च ॥
सम्पर्कं सूतकादीनां परपूर्वाभिमर्शनम् ।
क्षणाद्भस्मीभवन्त्याशु तूलराशिरिवानलात् ॥

* * * *

सङ्कल्पश्च प्रकुर्वीत देवस्य पुरतस्तथा ।
देवदेव जगन्नाथ भगवन् भक्तवत्सल ॥
करोमि लक्षसङ्ख्याकतुलसीव्रतमुत्तमम् ।
निर्विघ्नं कुरु मे देव प्रसन्नो भव मे सदा ॥
इत्येवं प्रार्थनां कृत्वा व्रतारम्भं समाचरेत् ।
आदौ मध्ये तथा चान्ते कुर्यादुद्यापनक्रियाम् ॥

**End:**

तस्मात्सर्वप्रयत्नेन कार्यं सर्वैरिदं व्रतम् ।
एवं कृते महाभागाः सर्वान् कामानवाप्नुयात् ॥

**Colophon:**

इति श्रीगरुडपुराणे ब्रह्मनारदसंवादे लक्षतुलसीव्रतकल्पं समाप्तम् ॥

---

No. 8314. तुलसीव्रतकल्पः.

TULASĪVRATAKALPAH.

Pages, 4. Lines, 5 on a page.

Begins on fol. 3?a. The other works herein are Sōmavāravrata 1a, Mānasikasnāna (Gaṅgamāhātmya) 14a, Rāmadhyāna 17a, Rāmamānasapūjāvidhāna 20a, Dēvapūjāvidhāna 23a, Sālagrāmakalpa 25a, Śravaṇadvādaśīvrata 35a, Śravaṇadvādaśīvratakathā 43b.

Incomplete.

Similar to the above.

It is stated here that the completion ceremony should be performed between the months of Māgha and Vaiśākha.

**Beginning:**

देवदेवं नमस्कृत्य सर्वशास्त्रविशारद ।
सर्वावयवसम्पूर्ण सर्वदेवनमस्कृतम् ॥
तुलस्या लक्षसङ्ख्याकव्रतं ब्रूहि महामते ।
चातुर्मास्यं समारभ्य यावदुद्बोधितो हरिः ॥
तावत्पर्यन्तमेतस्यास्समर्पणमथाचरेत् ।
समर्पणकृतस्तस्य स्वर्गतिस्सर्वदा भवेत् ॥

* * *

पूर्णाहुतिं ततो दत्वा होमशेषं समापयेत् ।
ᵃघमासं समारभ्य वैशाखान्तं समाचरेत् ॥

**End:**

इदं व्रतं सदा कार्यं चतुर्वर्गफलेप्सुभिः ।
पुम्भिर्विविधैस्तत्कार्यं विधवानान्तथैव च ॥
एवङ्कृते महाभाग मुच्य(ते सर्वकिल्बिषैः) ॥

---

## No. 8315. तुलसीव्रतपूजा.
## TULASIVRATAPŪJA.

Pages, 2. Lines, 12 on a page.

Begins on fol. 6*a* of the MS. described under No. 8198.

Complete.

Contains only the portion relating to the Pūjā to be performed in connection with the Tulasīvrata.

**Beginning:**

ध्यायेत्तु तुलसीं देवीं श्यामां कमललोचनाम् ।
प्रसन्नवदनाम्भोजां वराभयचतुर्भुजाम् ॥

* * * *

कृष्णस्यानन्दजनके वरद तुलसि स्वयम् ।
अत्रागच्छ जगद्वन्द्ये कमलायतलोचने ॥ आवाहनम् ।

**End:**

पुष्पाञ्जलिविधानेन प्रदक्षिणविधानतः ।
तुलस्यै सर्वसिद्ध्यर्थन्तर्पयेत्सह वारिणा ॥

इति प्रसन्नार्घ्यम् ॥

**Colophon:**

इति तुलसी(व्रत)पूजा समाप्ता ॥

---

## No. 8316. तुलसीव्रतोद्यापनम्.
## TULASIVRATODYAPANAM.

Pages, 5. Lines, 8 on a page.

Begins on fol. 135*a* of the MS. described under No. 7758.

Complete.

On the manner of completing the Tulasīvrata, the ceremonies connected therewith being performed on the eleventh day of the bright fortnight in the month of Kārttika.

**Beginning :**

(व्यासः)—

त्वत्प्रसादान्मया ब्रह्मन् ज्ञातश्च तुळसीव्रतम् ।
इदानीं कृपया ब्रूहि व्रतोद्यापनमुत्तमम् ॥

ब्रह्मोवाच—

शृणु व्यास प्रवक्ष्यामि व्रतस्योद्यापनक्रमम् ।
कृते चोद्यापने तत्र फलं हि विपुलं भवेत् ॥
उद्यापनं विना तस्य फलं हि विफलं भवेत् ।

* * * *

कार्त्तिके मासि संप्राप्ते शुक्लपक्षे हरेर्दिने ।
तुलसीप्रतिमां कृत्वा काञ्चनेन चतुर्भुजाम् ॥

**End :**

ततस्तु स्वजनैस्साद्धिः भोक्तव्यं हृष्टमानसैः ।
ततस्तु कामं संलभ्य परां सिद्धिमवाप्स्यसि ॥

**Colophon :**

इति श्रीतुलस्युद्यापनविधिः सम्पूर्णः ॥

---

## No. 8317. दशाफलव्रतकथा.
## DAŚAPHALAVRATAKATHĀ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 93*a* of the MS. described under No. 8171.

Complete. From Bhaviṣyōttarapurāṇa.

Deals with the story relating to the Daśaphalavrata which consists in the worship of Kṛṣṇa on the anniversary day of his birth The observance of this Vrata is supposed to have the

power of removing all kinds of sorrow and of enabling one to realise one's object of desire. The Vrata is so called on account of the tenfold character of the Pūjā, etc.

**Beginning :**

कृतकद्यूतविजिते सानुजे पाण्डुनन्दने ।
वनं प्रयाते दुःखार्तां कुन्तीं प्राह हरिस्तदा ॥
नमस्कृत्य तदाश्वास्य प्रोवाच मधुरं वचः ।
कृतं कुन्ति विषादेन व्रतं वक्ष्यामि ते शुभम् ॥
नाम्ना दशाफलं सद्यः सर्वदुःखनिवारणम् ।
सर्वकामप्रदं येन फलन्दशगुणं भवेत् ॥

* * * *

जयन्त्यां जन्मदिवसे कृष्णस्य जगदुत्सवे ।
सूत्रन्दशगुणं कृत्वा तत्पुरः प्रतिपूजयेत् ॥
प्रातर्बाहू निबध्नीयात् बालकृष्णं स्मरन् हृदि ।
प्रत्यहं दश पद्मानि नमस्कारं प्रदक्षिणम् ॥
पूजयेद्दशसङ्ख्याकैर्नियमैस्तुलसीदलैः ।

**End :**

साम्राज्यन्ते सुखं प्राप्य हत्वा शत्रूनकण्टकम् ।
पालयामासुरवनीं व्रतस्यास्य प्रभावतः ॥
अतश्चैतद्व्रतं विप्रा ये चरन्ति समाहिताः ।
विमुक्तास्सर्वदुःखेभ्यः प्राप्नुयुस्सिद्धिमीप्सिताम् ॥

**Colophon :**

इति श्रीभविष्योत्तरपुराणे दशाफलकृष्णव्रतकथा समाप्ता ॥

---

No. 8318. दशाफलव्रतकथा.

DAŚAPHALAVRATAKATHĀ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 23*a* of the MS. described under No. 2907.

Complete.

Same as the above.

**Colophon:**

इति श्रीभविष्योत्तरपुराणे दशाफलकृष्णव्रतं सम्पूर्णम् ॥

---

No. 8319. दशाफलव्रतकथा.
DAŚĀPHALAVRATAKATHĀ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 7*b* of the MS. described under No. 3105.

Complete.

Same as the above. But in the colophon this is shown as part of Skandapurāṇa.

**Colophon:**

इति श्रीस्कन्दपुराणे बालकृष्णदशाफलव्रतकथा समाप्ता ॥

---

No. 8320. दशाफलव्रतकथा.
DAŚĀPHALAVRATAKATHĀ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 64*a* of the MS. described under No. 8179.

Complete.

Same as the above.

**Colophon:**

इति स्कन्दपुराणे दशाफलव्रतं सम्पूर्णम् ।

---

No. 8321. दशाफलव्रतकथा.
DAŚĀPHALAVRATAKATHĀ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 79*a* of the MS. described under No. 2908.

Incomplete.

Similar to the above.

**Beginning:**

शृणुध्वं मुनयस्सर्वे नैमिशारण्यवासिनः ।
पुरा कृतयुगस्यादौ कृष्णदेवेन भाषितम् ॥

तद्व्रतं वः (प्रवक्ष्यामि)साङ्गोपाङ्गं मुनीश्वराः ।
पुरा वै द्वापरस्यान्ते पाण्डवाः कौरवास्तथा ॥
द्यूतं प्रचक्रिरे सर्वे धनमानेन मोहिताः ।
निर्जिताः पाण्डवा दुःखाद्वनं प्रापुर्मुनीश्वराः ॥

**End:**

तस्मात्सर्वप्रयत्नेन कुरुध्वं सुसमाहिताः ॥
सद्भक्तो वाप्यभक्तो वा व्रतं कुर्यादतन्द्रितः ।
सर्वान् कामानवाप्नोति विष्णुलोके महीयते ॥

**Colophon:**

इति श्री . . दशाफलव्रतकल्पं सम्पूर्णम् ॥

---

No. 8322. दशाफलव्रतकथा.
DAŚĀPHALAVRATAKATHĀ

Pages, 4. Lines, 5 on a page.

Begins on fol. 69*a* of the MS. described under No. 2908.
Incomplete.
Similar to the above.

**Beginning:**

ऋषय ऊचुः—

शतानीक महाप्राज्ञ सर्वशास्त्रविशारद ।
महादशादिदुष्टान्तर्दशानान्तु कलौ युगे ॥
पापयोनिषु जायन्ते नराः शत्रुपराङ्मुखाः ।
विधिना केन सर्वज्ञ तेषां निष्कृतिकारणम् ॥

* * * *

सर्वसौख्यप्रदञ्चैव महादशाविमुक्तिदम् ।
व्रतं दशाफलं नाम देवैरपि सुदुर्लभम् ॥
तद्व्रतं कुरु कौन्तेय सर्वबन्धविमोचनम् ।

**End:**

युधिष्ठिरः—

वर्तिभिर्दशभिर्दीपं प्रज्वलं गोघृतेन च ॥
प्रदक्षिणं तद्दशभिर्नमस्कारन्तथैव च ।
उपचारैः प्रकर्तव्यं विष्णोर्नैवेद्यविस्तरैः ॥

---

No. 8323. दशाफलव्रतकल्पः.

DAŚĀPHALAVRATAKALPAḤ.

Pages, 11. Lines, 5 on a page.

Begins on fol. 63a of the MS. described under No. 2905, and not on fol. 62a as shown therein.

Complete. From Pādmapurāṇa.

On the manner of observing the Daśāphalavrata. The worship relating to this Vrata is to be conducted for ten days commencing from the Kṛṣṇāṣṭamī day agreeing with the day of Kṛṣṇa's birth.

**Beginning:**

पूर्वोक्तैवङ्गुणविशेषणविशिष्टायां शुभतिथौ संभावितपापक्षयार्थं . . . . . . . . . . . . . . . . कृष्णाष्टमीमारभ्य दशदिवसपर्यन्तं प्रत्यहं देवस्य पुरतः दश पद्मानि लिखित्वा तत्र षोडशोपचारपूजाङ्करिष्ये ।

श्रीसूत उवाच—

देवब्रह्मादयो वापि स्वरूपं न विदुस्तव ।
त्वामहं पूजयिष्यामि मातुरुत्सङ्गसंस्थितम् ॥ दोरस्थापनम् ।
ध्यायेत्स्पृशन्तं वक्षोजं पिबन्तं पाणिनापरम् ।
विलोकमानं प्रेमार्द्रं मुखं मातुर्मुहुर्मुहुः ॥
अतसीपुष्पसङ्काशं भ्राजमानं शुभेक्षणम् ।
देवक्यङ्के स्थितं कृष्णं चिन्तयेद्गरुडध्वजम् ॥ ध्यानम् ।

**End:**

दुर्बुद्धिं बोधरहितं(तां) नाशयित्वा तु मे हरिः ।
करोतु देवकीपुत्रो योऽसावायुःप्रवर्धनम् ॥

इति पूजाविधानं सम्पूर्णम् ॥

**Colophon:**

इति श्रीपद्मपुराणे कृष्णकुन्तीसंवादे दशाफलव्रतकल्पं सम्पूर्णम् ॥

---

No. **8324.** दशाफलव्रतकल्पः.

DAŚĀPHALAVRATAKALPAḤ.

Pages, 12. Lines, 6 on a page.

Begins on fol. 6*a* of the MS. described under No. 8188.

Incomplete.

Similar to the above.

See under the previous number for the Beginning.

**End:**

वैष्णवैश्च विशेषेण मोक्षार्थिभिरतन्द्रितैः ।
व्रतमेतदनुष्ठेयं कृष्णमाराध्य भक्तितः ॥

* * * *

समस्तजगदाधार शङ्खचक्रगदाधर ।
देव देहि ममानुज्ञां युष्मत्तीर्थावगाहने ॥
सत्येश्वराय स. . . . . . . .

---

No. **8325.** दशाफलव्रतकल्पः.

DAŚĀPHALAVRATAKALPAḤ

Pages, 4. Lines, 6 on a page.

Begins on fol. 111*a* of the MS. described under **No. 2907.**

Complete.

Similar to the above.

**Beginning:**

पिबेद्वामस्तनं ध्यायेदपरं पाणिना स्पृशन् ।
विलोकमानं प्रेम्णा वै(तं) मुखं मातुर्मुहुर्मुहुः ॥

सहस्रशीर्षा पुरुषः—ध्यायामि । पुरुष एवेदं सर्वम् आवाहयामि ।

* * * *

देवदेव जगन्नाथ शङ्खचक्रगदाधर ।
तव रूपं प्रदास्यामि प्रयच्छ मम वाञ्छितम् ॥

प्रतिमादानमन्त्रः । यस्य स्मृत्वेति समर्पणम् ॥

**Colophon:**

इति पूजाविधानं सम्पूर्णम् ॥

The Kathā portion here is the same as in the No. 8318

---

No. **8326.** दशाफलव्रतकल्पः.

DAŚĀPHALAVRATAKALPAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 26*a* of the MS. described under No. 8180.

Complete. From Bhaviṣyōttarapurāṇa.

Similar to the above.

**Beginning:**

अतसीपुष्पसङ्काशं चतुर्बाहुं शुभेक्षणम् ।
देवकी(क्य)ङ्केशवं(यं)कृष्णं चिन्तयेद्गरुडध्वजम् ॥ ध्यानम् ।
आगच्छ जगदाधार करुणामृतसागर ।
सत्याय सत्त्वपतये गोविन्दाय नमो नमः ॥
योऽसौ परावरो देवो विश्वात्मा विष्णुरच्युतः ।
आयातु कृपया देव्या उत्सङ्गे निवसन् हरिः ॥ आवाहनम् ।

**End:**

य इदं कुरुते नित्यं सर्वकामफलप्रदम् ।
पुत्रपौत्रैः परिवृतस्सर्वान् कामानवाप्नुयात् ॥

**Colophon:**

इति भविष्योत्तरपुराणे दशाफलव्रतकल्पं सम्पूर्णम् ॥

## No. 8327. दशाफलव्रतकल्पः
## DAŚAPHALAVRATAKALPAḤ.

Pages, 7. Lines, 6 on a page.
Begins on fol. 21*b* of the MS. described under No. 8239.
Complete.
Similar to the above.

**Beginning :**

ऋषिरुवाच—
सर्वसौभाग्यदं नृणां सर्वदुःखनिवारणम् ।
व्रतं ब्रूहि महाप्राज्ञ सूत पौराणिकोत्तम ॥
सूत उवाच—
शृणुध्वं मुनयस्सर्वे व्रतं सौभाग्यवर्धनम् ।
मूढादिदोषरहितं शून्यदोषविवर्जितम् ॥
श्रावण्यां कृष्णपक्षे च जन्माष्टम्यां विशेषतः ।
कृष्णस्य जन्मकाले तु शुचिर्भूत्वा समाहितः ॥
दशतन्तुमयं सूत्रं कुङ्कुमाक्तं सुशोभनम् ।

**End :**

ऋषिपत्न्यश्च सर्वाश्च व्रतस्यास्य प्रभावतः ।
पुत्रपौत्रश्रियं प्राप्ता अन्ते विष्णुपदं गताः ॥
वासुदेवात्मकं पुंसां व्रतमेतत्सुदुर्लभम् ।
भक्त्या पठन्ति शृण्वन्ति ते यान्ति परमाङ्गतिम् ॥

**Colophon :**

इति श्रीभविष्योत्तरपुराणे कृष्णप्रोक्तं दशाफलकल्पं सम्पूर्णम् ॥

* * * *

यस्माच्चूडामणेर्जम्बूद्वीपाद् गोधूमसंभवः ।
गान्धर्वधनदस्सौख्यमतश्शान्तिं प्रयच्छ मे ॥
दशाफलव्रतकथनं सम्पूर्णम् ॥

No. 8328. दशाफलव्रतकल्पः.
DAŚĀPHALAVRATAKALPAḤ.

Pages, 8. Lines, 6 on a page.
Begins on fol. 1a of the MS. described under No. 8430
Complete.
Same as the above.

---

No. 8329. दशाफलव्रतकल्पः.
DAŚĀPHALAVRATAKALPAḤ.

Pages, 11. Lines, 5 on a page.
Begins on fol. 1a of the MS. described under No. 8375.
Complete.
Similar to the above.

**Beginning:**

कृष्णं विष्णुं तथानन्तं गोविन्दं गरुडध्वजम् ।
दामोदरं हृषीकेशं पद्मनाभं हरिं(लि)प्रियम् ॥
कृष्णाय वासुदेवाय हरये परमात्मने ।
(प्रणतक्लेशनाशाय) देवकीनन्दनाय च ॥
नन्दगोपकुमाराय गोविन्दाय नमो नमः । आवाहनम् ।

**End:**

अतश्चैतद्व्रतं विप्रा ये चरन्ति समाहिताः ।
विमुक्तास्सर्वदुःखेभ्यः प्राप्नुयुस्सिद्धिमीप्सिताम् ॥

**Colophon:**

इति श्रीभविष्योत्तरपुराणे दशाफलव्रतं सम्पूर्णम् ॥

---

No. 8330. दानफलव्रतकल्पः.
DĀNAPHALAVRATAKALPAḤ.

Pages, 42. Lines, 5 on a page.
Begins on fol. 25a of the MS. described under No. 8171.
Complete From Padmapurāṇa.
On the Vrata which consists in the worship of the Sun-god commencing from the last Sunday of the bright fortnight in the

month of Āśvina. The observance of this Vrata is considered to enable one to obtain all prosperity in this world and also salvation after death. This Vrata is said to bestow on one all benefits which accrue from the ten kinds of Dāna or gift

**Beginning:**

संलिप्य गोमयेनोर्वीं चतुरश्रेषुमात्रकम् ।
तन्मध्येऽष्टदलं पद्मं शोभनं कर्णिकान्वितम् ॥

तद्दक्षिणभागे त्रिकोणं कुर्यात् । तन्मध्ये गणाधिपतिं यजेत् । तत्र द्वारपालकपूजाङ्कुर्यात् । पूर्वद्वारे वक्रतुण्डाय नमः । दक्षिणद्वारे महोदराय नमः । गजाननाय पश्चिमद्वारे लम्बोदराय विकटाय ।

* * * *

सूत उवाच—

पितुर्गृहे वर्तमाना कुन्ती व्यासं ददर्श ह ।
नमस्कृत्वा तु सद्भक्त्या पाद्यार्घ्याचमनादिकम् ॥
दत्वा संप्रार्थयामास कुन्ती मुकुलिताञ्जलिः ।
पतिपुत्रान्नमोक्षार्थं व्रतं ब्रूहि महामुने ॥

व्यास उवाच—

शृणु दानफलं नाम वक्ष्ये सर्वव्रतोत्तमम् ।

* * * *

स्त्रिय ऊचुः—

आश्व(श्विने)मासि [क]सम्प्राप्ते शुद्धान्ते भानुवासरे ।
तस्मिन्दिने समारभ्य शुचिर्भूत्वा व्रती तथा ॥
गोष्ठे वृन्दावने चैव नदीतीरे विशेषतः ।
पूर्वाह्णे सङ्गवे वापि सूर्यस्याभिमुखो व्रती ॥

**End:**

यः करोति व्रतमिदं सर्वान् कामानवाप्नुयात् ॥

यः (ये) पठे(ठन्ती)दमाख्यानं शृण्वन्ति श्रद्धयान्विताः ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमाङ्गतिम् ॥

**Colophon:**

इति श्रीपद्मपुराणे उमामहेश्वरसंवादे दानफलव्रतं सम्पूर्णम् ॥

---

No. **8331.** दानफलव्रतकल्पः.

DĀNAPHALAVRATAKALPAḤ.

Pages, 27. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 2908.

Complete.

Same as the above.

---

No. **8332.** दानफलव्रतकल्पः.

DĀNAPHALAVRATAKALPAḤ.

Pages, 26. Lines, 5 on a page.

Begins on fol. 59*a* of the MS. described under No. 6152, and not on 57*a* as shown therein.

Complete.

Same as the above.

---

No. **8333.** दानफलव्रतकल्पः.

DĀNAPHALAVRATAKALPAḤ

Pages, 14. Lines, 5 on a page.

Begins on fol. 87*a* of the MS. described under No. 6152, and not on 81*a* as shown therein.

Complete.

Similar to the above.

**Beginning:**

पितृगेहे वर्तमाना कुन्ती व्यासन्ददर्श सा ।
नमस्कृत्वा तु सद्भक्त्या पाद्यार्घ्याचमनादिकम् ॥
दत्वाह प्रार्थितं व्यासं कुन्ती मुकुलिताञ्जलिः ।
पतिपुत्राघमोक्षार्थं व्रतं ब्रूहि महामुने ॥

व्यास उवाच—

श्रृणु दानफलं नाम वक्ष्ये सर्वव्रतोत्तमम् ।
कैलासशिखरे रम्ये पार्वती प्राह शङ्करम् ॥

*    *    *    *

स्त्रिय ऊचुः—

अश्वयुङ्मासि सम्प्राप्ते शुद्धान्ते भानुवासरे ।
तस्मिन् दिने समारभ्य शुचिर्भूत्वा व्रती नरः ॥

**End:**

ये पठन्तीदमाख्यानं श्रृण्वन्ति श्रद्धयान्विताः ।
ते सर्वपापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

**Colophon:**

इति श्रीपाद्मपुराणे उमामहेश्वरसंवादे व्यासप्रोक्तदानफलव्रतकल्पं सम्पूर्णम् ॥

---

## No. 8334. दानफलव्रतकल्पः.
## DĀNAPHALAVRATAKALPAḤ.

Pages, 33. Lines, 5 on a page.

Begins on fol. 54a of the MS. described under No. 8235.

Complete. From Pādmapurāṇa.

Similar to the above.

**Beginning:**

पूर्वोक्तएवङ्गुणविशेषणविशिष्टायां तिथौ भानुवारे अस्माकं समस्तपापक्षयार्थं . . . . . . . . . . . . . .
पद्मपुराणोक्तप्रकारेण आश्विन(न)शुद्धान्ते भानुवासरप्रभृति माघशुद्धसप्तमीपर्यन्तं मया पूर्वगृहीतदानफलाङ्गत्वेन द्वादशनमस्कारद्वादशप्रदक्षिणद्वादशार्घ्यकथाश्रवणध्यानावाहनादिषोडशोपचारपूजाङ्करिष्ये । भूमिप्रार्थनम्—स्योना पृथिवि । कलशार्चनम्—कलशस्य । अथ विघ्नेश्वरपूजा ।

**End:**

दिवाकर नमस्तुभ्यं पापाज्ञान(नादि)नाशनम् ।
त्रयीमयाय विश्वात्मा गृह्याणार्घ्यं नमोऽस्तु ते ॥ द्वादशार्घ्यम् ।
पायसं परमान्नञ्च सर्वदेवोत्तमोत्तमम् ।
सर्वदेवोत्तमश्चैव सुप्रीतो वरदो भव ॥ उपायनदानम् ।

**Colophon:**

इति श्रीपद्मपुराणे उमामहेश्वरसंवादे दानाफलव्रत सम्पूर्णम् ॥

---

No. 8335. दानफलव्रतकल्पः.

DĀNAPHALAVRATAKALPAḤ.

Pages, 11. Lines, 6 on a page.

Begins on fol. 0a of the MS. described under No. 2907.

Complete. From Skandapurāṇa.

Similar to the above.

**Beginning:**

पद्मासनः पद्मकरः . . . . सदा रविः ॥
ध्येयस्सदा . . . . . धृतशङ्खचक्रः ॥
नमस्सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चिनारायणशङ्करात्मने ॥
कालात्मा सर्वभूतात्मा वेदात्मा विश्वतोमुखः ।
जन्ममृत्युजराव्याधिसंसारभयनाशनः ॥
श्रीसूर्यनारायणं ध्यायामि ॥

See under the pevious number for the End with Colophon

---

No. 8336. दानफलव्रतकल्पः.

DĀNAPHALAVRATAKALPAḤ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 61a of the MS. described under No. 8179.

Complete. From Skandapurāṇa.

Similar to the above.

**Beginning:**

पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ।
सप्ताश्वस्सप्तरज्जुश्च द्विभुजश्च सदा रविः ॥ ध्यानम् ।
तप्तकाञ्चनसङ्काशं तप्तहेमसमप्रभम् ।
जटिलं पद्मनेत्रञ्च पद्मपत्रविभूषितम् ॥ आवाहनम् ।
नमस्ते ग्रहनाथाय नमस्ते लोकचक्षुषे ।
तेजोनिधे नमस्तुभ्यं पद्मासन नमोऽस्तु ते ॥ आसनम् ॥

**End:**

यः (ये) पठेदि(ठन्ती)दमाख्यानं शृण्वन्ति श्रद्धयान्विताः ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमाङ्गतिम् ।

**Colophon:**

इति श्रीस्कन्दपुराणे उमामहेश्वरसंवादे दानफलव्रतकल्पं सम्पूर्णम् ॥

---

No. 8337 दानफलव्रतकल्पः.

DĀNAPHALAVRATAKALPAḤ.

Substance, palm-leaf. Size, 13⅜ × 1¼ inches. Pages, 10. Lines, 5 on a page. Character, Canarese. Condition, fair. Appearance, old.

Complete. From Skāndapurāṇa.

Similar to the above.

**Beginning:**

पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ।
सप्ताश्वः सप्तरश्मिश्च द्विभुजश्च सदा रविः ॥

ध्येयस्सदा सवितृमण्डलमध्यवर्ती नारायणस्सरसिजासनसन्निविष्टः ।
केयूरवान्मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥
ध्यानम् ।

आगच्छ देवदेवेश त्रयीमय दिवाकर ।
(एत)द्व्रतङ्करिष्यामि तावत्त्वं सन्निधौ भव ॥ आवाहनम् ॥

**End:**

सुव्रतां (पुत्रान्) लभते कुन्ती त्वं कुरु व्रतमुत्तमम् ॥
इति कुन्तीद(स)माख्यातं शृण्वन्तु श्रद्धयान्विताः ।
सर्वपापविनिर्मुक्ता यास्यन्ति परमाङ्गतिम् ॥

**Colophon.**

इति स्कान्दे पुराणे दानफलव्रतं सम्पूर्णम् ॥

---

No. **8338.** दानफलव्रतकल्पः.

DĀNAPHALAVRATAKALPAḤ.

Pages, 10. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 2488.

Complete.

Same as the above. The first leaf is wanting.

---

No. **8339.** दानफलव्रतकल्पः.

DĀNAPHALAVRATAKALPAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 83*a* of the MS. described under No 6152, and not on 81*a* as shown therein.

Complete. From Padmapurāṇa.

Similar to the above.

**Beginning:**

व्यास उवाच—

कैलासशिखरे रम्ये पार्वती प्राह शङ्करम् ।
व्रतानां सर्वदानानामुत्तमं ब्रूहि तत्त्वतः ॥

शङ्कर उवाच—

साधु देवि त्वया पृष्टमुत्तमं सर्वतश्शुभम् ।
भूमौ तु भारते वर्षे पुण्ये च यमुनातटे ॥

* * * *

सर्वदानफलश्चेदं तस्माद्दानफलव्रतम् ।
अश्वयुङ्मासि सम्प्राप्ते शुक्लान्ते भानुवासरे ॥
तस्मिन्दिने समारभ्य शुचिर्भूत्वा व्रती नरः ।
गोष्ठे बृन्दावने चैव नदीतीरे विशेषतः ॥

**End:**

अन्याभिर्मुनिपत्नीभिः कृतं मानवपुङ्गवैः ॥
बुभुजे (विभुज्य) विपुलान् भोगात् विष्णुसायुज्यमाप्नुयात् ॥

**Colophon:**

इति श्रीपद्मपुराणे व्यासप्रोक्ते दानफलव्रतकल्पं सम्पूर्णम् ॥

---

No. **8340.** दानफलव्रतकल्पः.
DĀNAPHALAVRATAKALPAḤ.

Pages, 36. Lines, 5 on a page.

Begins on fol. 76*a* of the MS. described under No. 8233.
Complete. From Skāndapurāṇa.
Similar to the above.

**Beginning:**

कालिङ्गग्रहमध्यसंस्थानिलयं प्राचीमुखं वर्तुलं
रक्तं रक्तविभूषितध्वजरथछत्त्रीधरं स्रग्विणम् ।
सप्ताश्वं कमलद्वयान्वितकरं पद्मासनं काश्यपं
मेरोर्दिव्यगिरेः प्रदक्षिणपदं सेवामहे भास्करम् ॥ ध्यानम् ।
एवं ध्यात्वा प्राणानायम्य सङ्कल्प्य ।

**End:**

ये पठन्तीदमाख्यानं शृण्वन्ति श्रद्धयान्विताः ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमाङ्गतिम् ॥

**Colophon:**

इति स्कान्दपुराणे दानफलव्रतं सम्पूर्णम् ॥

No. 8341. दानफलव्रतकल्पः.

DĀNAPHALAVRATAKALPAḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 35a of the MS. described under No. 8188

Incomplete.

**Beginning :**

एवङ्गुणाविशेषणविशिष्टायां तिथौ . . . . . . . . .
धर्मार्थकाममोक्षचतुर्विधफलावाप्त्यर्थं त्रयीमयात्मपरब्रह्मस्वरूपश्रीसूर्यनारायणमुद्दिश्य श्रीसूर्यनारायणप्रीत्यर्थं दानफलव्रतोपवासाङ्गप्रतिभानुवासरप्रयुक्तसंभवनियमेन संभवद्द्रव्यैः कल्पोक्तविधानेन यावच्छक्यध्यानावाहनादिषोडशोपचारपूजां करिष्ये ।

**End :**

पञ्चमावरणम् । वज्रायुधाय ध्वजायुधाय दण्डायुधाय पाशायुधायाङ्कुशायुधाय खड्गायुधाय त्रिशूलायुधाय साङ्गाय सायुधाय सवाहनाय स्वशक्त्यै सपरिवाराय नमः पञ्चमावरणमावाहयामि । षोडशोपचारमभ्यर्च्य ।

अत्र ध्यानम्—

उमासुतगणाध्यक्ष प्रारब्ध.

---

No. 8342. दानफलव्रतकल्पः.

DĀNAPHALAVRATAKALPAḤ.

Pages, 25. Lines, 5 on a page.

Begins on fol. 1a of the MS. described under No. 8179.

Complete. From Bhaviṣyōttarapurāṇa.

Similar to the above.

**Beginning :**

एवङ्गुणविशिष्टायां शुभतिथौ. . . . . . . . . .
श्रीसूर्यनारायणप्रीत्यर्थं संभवता नियमेन संभवता(द्भिः) द्रव्यैः स्कन्दपुरा·

णोक्त दानफलव्रताङ्गयावच्छक्त्यध्यानावाहनादिषोडशोपचारपूजाङ्करिष्ये इति सङ्कल्प्य ।

**End:**

> रक्तगन्धाक्षतैस्ताम्रपात्रेणार्घ्यं समन्त्रकम् ।
> जानुभ्यामवनिं गत्वा द्वादशार्घ्यं निवेदयेत् ॥
> दिवाकर नमस्तुभ्यं पापाज्ञानप्रणाशन ।
> त्रयीमयार्क विश्वात्मन् गृहाणार्घ्यं नमोऽस्तु ते ॥ अर्घ्यम् ।
> विनतातनयो देवः कर्मसाक्षी सुरेश्वर ।
> सप्ताश्वस्सप्तरज्जुश्च अरुणो मे प्रसीदतु ॥

अरुणार्घ्यम् । उद्वन्नयेति मन्त्रपुष्पम् ॥

**Colophon:**

इति पूजाविधानं सम्पूर्णम् ॥

---

No 8343. दानफलव्रतोद्यापनम्.

DANAPHALAVRATODYAPANAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 5*b* of the MS. described under No. 2488, wherein this has been omitted to be shown as a separate work.

Complete.

On the manner of completing the Danaphalavrata.

**Beginning:**

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ मया कृतदानफलव्रतसाद्गुण्यार्थं मम सर्वाभीष्टसिद्ध्यर्थं सुपुत्रावाप्त्यर्थं श्रीसूर्यनारायणप्रीत्यर्थं क्षारवर्जनाख्यं कर्म करिष्य इति सङ्कल्प्य, द्वादशदलपद्मं लिखित्वा, तत्र सूर्यनारायणं ध्यात्वा । पद्मासनः पद्मकरः . . . सदा रविः ॥

* * *

अस्मिन् दानफलव्रतोद्यापनकर्मणि आचार्यन्त्वां(त्वं) भवन्तः कुर्वन्त्विति आचार्यं वृणुयात् । आचार्यः स्वगृह्योक्तप्रकारेणाग्निप्रतिष्ठा-

पनं करिष्ये । पुनः प्राणानायम्य, देशकालौ सङ्कीर्त्य, अस्मिन्दान-
फलव्रतोद्यापनहोमे देवतापरिग्रहार्थमन्वाधानङ्करिष्ये ।

**End:**

मया कृतदानफलव्रतोद्यापनान्ते . . . . . . . .
परमान्नं प्रतिमाञ्च आचार्याय दत्वा इतरदानानि ब्राह्मणेभ्यो दत्व
यस्य स्मृत्येति सूर्यनारायणार्पणमस्तु ॥

**Colophon:**

इति दानफल(व्रतोद्यापन)विधिस्समाप्तः ॥

---

No. 8344. दानफलव्रतोद्यापनम्.

DĀNAPHALAVRATODYĀPANAM.

Pages, 7. Lines, 5 on a page.

Begins on fol. 93*a* of the MS. described under No. 8233.

Complete.

**Beginning:**

एवङ्गुणविशेषणविशिष्टायां तिथौ मया कृतदानफलव्रतसाद्गुण्यार्थं
मम सर्वाभीष्टसिद्ध्यर्थम् ।

* * * *

पञ्चमवर्षे सप्तम्यां कर्तव्यदानफलव्रतोद्यापनं करिष्ये, अस्मिन् दानफल-
व्रतोद्यापनकर्मणि आचार्यत्वं भवन्तः कुर्वन्त्विति आचार्यं वृणुयात् ।

See under the previous number for the End.

---

No. 8345. दूर्वाविघ्नेश्वरव्रतकल्पः.

DŪRVĀVIGHNEŚVARAVRATAKALPAḤ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 20*a* of the MS. described under No. 2007.

Complete. From Skāndapurāṇa.

This Vrata consists in the worship of god Vināyaka by using sixblades of the Dūrvā grass. This is to be commenced when the

fourth day of a bright fortnight happens to fall on a Sunday and is to be continued for six months thereafter. The observance of the Vrata is considered to have the power of enabling one to realise desired objects.

**Beginning:**

तरुणारुणसङ्काशं सर्वाभरणभूषितम् ।
महामाणिक्यखचितमकुटं शशिशेखरम् ॥
* * * *
अभीष्टफलदं नित्यं जगतामुपकारकम् ॥

एवं ध्यात्वा देवमन्त्रेण षोडशोपचारपूजाङ्कुर्यात् । दूर्वारोपणम् ।

विनायकं गजास्यञ्च विघ्नेशञ्च गणाधिपम् ।
वरदं सर्वकामञ्च दूर्वाषट्कैः प्रपूजयेत् ॥ दूर्वासमर्पणम् ।

सूत उवाच—

कैलासशिखरे रम्ये सर्वदेवानिषेविते ।
सिद्धसङ्घसमाकीर्णे गन्धर्वमुनय(निसङ्कुले) ॥

**End:**

यः पठेच्छृणुयाद्भक्त्या कथामेतां दिनेदिने ।
सर्वपापविनिर्मुक्तः सर्वसिद्धिमवाप्नुयात् ॥

**Colophon:**

इति स्कान्दपुराणे सूतसंहितायामुत्तरकाण्डे दूर्वाविघ्नेश्वरव्रतकल्पं संपूर्णम् ॥

---

### No. 8346. दूर्वाविनायकव्रतकल्पः.

### DŪRVĀVINĀYAKAVRATAKALPAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 133*a* of the MS. described under No. 7758.

Complete.

Similar to the above.

**Beginning:**

सूत उवाच—

कैलासशिखरे रम्ये सर्वदेवनिषेविते ।
सिद्धसङ्घसमाकीर्णे गन्धर्वमुनिसङ्कुले ॥
गौर्या सह महेशानो दीव्यन्नक्षैर्विनोदितः ।
जितोऽसि त्वं जितेत्याह पार्वती परमेश्वरः ॥
सापि त्वं जित इत्याह स विवादस्तयोरभूत् ।
चित्रनेमिस्तदा पृष्टो मृषावादमभाषत ॥
तदा क्रोधसमाविष्टा गौरी शापं ददौ तदा ।
प्रसादिता पुनस्तेन विशापश्च जगाद सा ॥

* * * *

ता ऊचुः क्रियतां वत्स व्रतमेतदनुत्तमम् ।
दूर्वाविघ्नेश्वरो नाम पूजितस्सर्वसिद्धिदः ॥
शुक्लपक्षे चतुर्थ्यान्तु(र्थीं तु)भानुवारेण संयुता ।
तस्यान्तिथौ समारभ्य षण्मासं व्रतमाचरेत् ॥

**End:**

यः पठेत्परया भक्त्या कथामेतां दिनेदिने ।
शृणुयाद्वापि लोकेऽस्मिन् सर्वसिद्धिमवाप्नुयात् ॥

**Colophon:**

इति श्रीस्कान्दपुराणे दूर्वाविनायकव्रतं सम्पूर्णम् ॥

---

## No. 8347. धनुर्मासपूजाविधानम्.
## DHANURMĀSAPŪJĀVIDHĀNAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 8233.

Complete. From Viṣṇurahasya.

Deals with a Vrata which consists in the worship of Viṣṇu at daybreak in the month of Dhanus (December—January).

**Beginning:**

कोदण्डस्थे सवितरि प्रत्युषः पूजयेद्धरिम् ।
द्वादशाब्दार्चनफलं प्रत्यहं लभते नरः ॥

विष्णुरहस्ये—

कार्मुकस्थे रवौ मासे यत्नतो हरिमर्चयेत् ।
धारोष्णपयसा चैव घृतधाराभिरेव च ॥
अभिषिच्य ततश्शालिपिष्टेनोद्वर्तयेत्पुनः ।
अभिषेकस्ततः कुर्यात्सुखोष्णसुतवारिभिः ॥

**End:**

चतुर्भुजः खगारूढश्शङ्खचक्रगदाधरः ॥
विष्णुलोकं समासाद्य विष्णुन(ना) मोदते चिरम् ।
ज्ञानयोगं समासाद्य तत्रैव स विमुच्यते ॥

**Colophon:**

इति विष्णुरहस्ये धनुर्मासपूजाविधिः ॥

---

## No. 8348. धर्मराजपूजा.
## DHARMARĀJAPŪJĀ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 19*a* of the MS. described under No. 5773, wherein this has been omitted to be shown among the other works.

Incomplete.

On the Vrata which consists in the worship of Yama, the god of Death, and of Citragupta on days when the fourteenth day of a dark fortnight falls on a Tuesday. This is observed with a view to get rid of diseases.

**Beginning:**

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ . . . . . . .
समस्तरोगनिवृत्त्यर्थं कृष्णाङ्गारकचतुर्दशीपुण्यकाले एकोर्नविंशमायमण्डप
वायनदानाङ्गयमधर्मराजप्रतिमासु आवाहनादिषोडशोपचारपूजाङ्करिष्ये ।

तदङ्गकलशपूजा पीठपूजा। यमाय सोममिति मन्त्रेण यमं (मस्य) षोडशोपचारपूजाङ्कुर्यात् ।

आवाहयामि शमनं वैवस्वतसुतन्तथा।
कृतान्तं महिषारूढं धर्मराजं महा(बलम्) ॥
चित्रगुप्तं महाप्राज्ञं लेखिनीपत्रधारिणम् ।
कृतान्तकसखं चित्रजीवानां धर्मवेदिनम् ॥

इति यमचित्रगुप्तावाहनादिषोडशोपचारपूजा ।

**End :**

ब्राह्मणमभ्यर्च्य ।

यमाय धर्मराजाय मृत्यवे चान्तकाय च ।
माषमण्डपदानेन मम पापं व्यपोहतु ॥

अस्मै ब्राह्मणाय माषमण्डपवायनदानं तुभ्यमहं संप्रददे न मम ॥

---

No. 8349. धात्रीकल्पः.

DHĀTRĪKALPAḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 138*a* of the MS. described under No. 3055.

Complete.

On the Vrata which consists in the worship of Viṣṇu on Sundays in the month of Kārtika. This is generally conducted at the foot of an Āmalaka tree (Embelic Myrobalan). The observance of the Vrata is considered to have the power of leading one to salvation. In the case of a woman, this Vrata is considered to have the power of bestowing prosperity on her and of making her the mother of many children.

**Beginning :**

ब्रह्मोवाच—

कार्त्तिक्यां धात्रिमूले तु विष्णोराराधनं कृतम् ।
धात्रीफलस्य पूजा तु कोटिजन्माघनाशनम् ॥

ब्राह्मणान् भोजयेत्पश्चात्कुल्कोटेऽस्तु मुक्तिदः ।
विष्णुसायुज्यमाप्नोति मोदते यावदच्युतम् ॥

धात्रीछायायां स्नानमन्त्रः ।

**End:**

कार्त्तिके मासि पौर्णम्यां (मास्यां) पितृनुद्दिश्य हव्यकव्यं समाचरेत् ।
आमलकच्छायायां दत्तं गयादत्तसमं फलम् ॥

धात्रीफलविलिप्ताङ्गो धात्रीफलविभूषणः ।
धात्रीफलकृताहारो नरो नारायणो भवेत् ॥

**Colophon:**

इति धात्रकिल्पं सम्पूर्णम् ॥

---

No. **6350.** धात्रीकल्पः.
DHĀTRĪKALPAḤ.

Pages, 6. Lines, 4 on a page.

Begins on fol. 93*a* of the MS. described under No. 6470
Complete. From Skandapurāṇa.
Similar to the above.

**Beginning:**

धात्री कामं नृणां धात्री धात्रीव कुरुते श्रियम् ।
भोजने च भवेदायुः पाने वै धर्मसञ्चयः ॥

अलक्ष्मीनाशनं स्नानमन्ते निर्वाणमाप्नुयात् ।
राजान इह जायन्ते धात्रीस्नानेन वै नृणाम् ॥

* * * *

धात्रीस्नानेन राजेन्द्र यस्यास्थीनि कळेवरे ।
प्रक्षाल्यन्ते महाराज न भवेद्गर्भसंभवः ॥

धात्रीकल्केन राजेन्द्र येषान्देहाश्च रञ्जिताः ।
ते नराः केशवं यान्ति नाशयित्वा कलेवरम् ॥

**End:**

सर्वान् कामानवाप्नोति सर्वक्रतुफलं लभेत् ।
नारी सौभाग्यमाप्नोति बहुपुत्रं लभेद्ध्रुवम् ॥

**Colophon:**

इति स्कान्दपुराणे धात्रीकल्पस्समाप्तः ॥

---

## No. 8351. धात्रीपूजाकल्पः.
## DHĀTRĪPŪJĀKALPAḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 45*a* of the MS. described under No. 5773, wherein this has been omitted to be shown as a separate work.

Wants Beginning.

Similar to the above.

**Beginning:**

कार्त्तिके मासि सम्प्राप्ते दीपदानरताश्च ये ।
ते तु जातिस्मरा भूत्वा जायन्ते भूमिमण्डले ॥

* * * *

जाम्बूनदमये पात्रे रौप्यवर्तिसमन्वितम् ।
रत्नदीपं प्रदास्यामि स्वर्णकांस्यसमृद्धये ॥

**End:**

पितृमानुषदेवानां (प्रीतिकृद्) बृहतीफलम् ।
तस्माद्दानेन कुर्वीत प्रीयतां [सर्वेशः] कमलापतिः ॥

**Colophon:**

इति धात्रीपूजाकल्पः बृहतीदानकल्पः समाप्तः ॥

---

## No. 8352. धारणपारणव्रतम्.
## DHĀRAṆAPĀRAṆAVRATAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 120*b* of the MS. described under No. 7758.

Complete. From Viṣṇudharmōttara.

This Vrata is observed for four months commencing from Āṣāḍha, and consists in the worship of Viṣṇu and in fasting on alternate days. This is considered to have the power of extricating one even from the sin caused by the murder of a Brahman.

**Beginning:**

युधिष्ठिर उवाच—

कृष्ण कृष्ण महाबाहो वासुदेव जनार्दन ।
नमस्ते पुण्डरीकाक्ष प्रसीद पुरुषोत्तम ॥
भीष्मादिबन्धुवधजातमहाघसङ्घं
हर्तुं वदस्व करवाणि किमद्यसाहम ।

तवे(थे)न्द्रियाणामपि सर्वदा मे विनिग्रहायैव च निष्कृतिं वद ॥

श्रीभगवानुवाच—

शृणु कौन्तेय वक्ष्यामि व्रतं धारणपारणम् ।
बन्ध्वादिहतिदोषघ्नं सर्वेन्द्रियनियामकम् ॥
चातुर्मास्ये तथा चादौ मासि कौन्तेय सुव्रत ।
पुण्याहं कारयेत् पूर्वमेकादश्यां शुभे दिने ॥
पश्चात्सङ्कल्प्य राजेन्द्र तदारभ्य व्रतं चरेत् ।
आदौ मासि तथा चान्ते चातुर्मास्ये तथापि वा ॥
एकस्मिन् धारणे(णं) कार्यं पारणन्तु ततः परम् ।
उपवासो धारणञ्च पारणं भोजनं भवेत् ॥

**End:**

पूर्णाहुतिं ततो हुत्वा होमशेषं समापयेत् ।
आचार्यं भोजयित्वा तु ब्राह्मणांश्चैव भोजयेत् ॥
एवं कृत्वा महाभाग ब्रह्महत्यादिपातकैः ।
मुच्यते नात्र सन्देहस्तस्मात् कुरु महाव्रतम् ॥

**Colophon:**

इति विष्णुधर्मोत्तरपुराणे धारणपारणविधिस्संपूर्णः ॥

## No. 8353. धारणपारणव्रतम्.
## DHĀRAṆAPĀRAṆAVRATAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 28*a* of the MS. described under No. 8233.

Complete. From Pādmapurāṇa.

Same as the above.

---

## No. 8354. धारणपारणव्रतम्.
## DHĀRAṆAPĀRAṆAVRATAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 7*a* of the MS. described under No. 8233

Complete.

Similar to the above.

See under the previous number for the Beginning.

**End :**

बन्ध्यादिवधदोषैश्च मुच्यते नात्र संशयः ।
पूज्यमानः पौरजनैः समेतः पाण्डुपुत्रकैः ॥
युधिष्ठिरोऽपि राजर्षिः चकारेदं महाव्रतम् ।
विमुक्तस्सर्वपापेभ्यो निर्विपङ्कस्तथा भवेत् ॥

**Colophon :**

इति श्रीपद्मपुराणे धारणपारणव्रतं सम्पूर्णम् ॥

---

## No. 8355. धारणपारणव्रतम्.
## DHĀRAṆAPĀRAṆAVRATAM.

Pages, 2. Lines, 12 on a page.

Begins on fol. 8*a* of the MS. described under No. 8198.

Complete From Bhaviṣyōttarapurāṇa.

Similar to the above.

**Beginning :**

आदौ मासि तथा चान्ते चातुर्मास्यमथापि वा ।
एकस्मिन् धारणं कार्यं पारणन्तु ततः परम् ॥
उपवासो धारणं स्यात्पारणं भोजनं भवेत् ।

**End:**

युधिष्ठिरोऽपि राजर्षिः करोति महतां व्रतम् ॥
विमुक्तस्सर्वपापेभ्यो विष्णुलोकं स गच्छति ।
इह भुक्त्वा तु विपुलान् भोगांश्च विविधैरपि ॥
एतच्छृण्वन्ति सततं ये पठन्तीति मानवाः ।
ते सर्वपापनिर्मुक्ता यास्यन्ति परमाङ्गतिम् ॥

**Colophon:**

इति श्रीभविष्योत्तरपुराणे भीष्मयुधिष्ठिरसंवादे धारणपारणव्रतो(तं) [द्यापनं] सम्पूर्णम् ॥

---

## No. 8356. नरकचतुर्दशीकल्पः.
## NARAKACATURDAŚĪKALPAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 82*b* of the MS. described under **No. 7758.**

Complete. From Skāndapurāṇa.

This Vrata consists in religiously taking an oil-bath just before daybreak on the fourteenth day of the dark fortnight in the month of Āśvina; and it is considered to have the power of making one prosperous in life, beautiful and wise. That is a day of joy, being commemorative of the destruction of Narakāsura by Kṛṣṇa.

**Beginning:**

आश्विने मासि कृष्णायां चतुर्दश्यां षडानन ।
उषःकाले तु संप्राप्ते पुत्रपौत्रसमन्वितः ॥
गन्धयुक्तेन तैलेन लेपयेद्विप्रदेवताम् ।
बन्धुभिस्सह हृष्टात्मा तैलाभ्यङ्गं करोति यः ॥
स श्रीमान् पुत्रवान् भोगी रूपवानिह वर्तते ।
तैलदानं बुधः कुर्याच्चतुर्दश्यां शिखिध्वज ॥
ज्ञानवान् जायते सोऽपि लक्ष्मीस्तं न विमुञ्चति ।

**End:**

तदाप्रभृत्याश्वयुजे चतुर्दश्यां प्रशस्यते ।
अभ्यङ्गमसिते पक्षे नरैस्सर्वैः श्रियाप्तये ॥

**Colophon:**

इति स्कान्दपुराणे नरकचतुर्दशीव्रतकल्पस्सम्पूर्णः ॥

---

## No. 8357. नवरात्रीव्रतकल्पः.
## NAVARĀTRĪVRATAKALPAḤ.

Pages, 41. Lines, 6 on a page.

Begins on fol. 125*a* of the MS. described under No. 5452.

Complete.

This Vrata consists in the worship of Śakti as Caṇḍikā for nine days, commencing from the first day of the bright fortnight in the month of Āśvina. This is what is commonly known as the Dussera worship, and is intended to be conducted specially by kings before starting out on their expeditions of victory at the conclusion of the rainy season.

**Beginning:**

प्राणानायम्य देशकालौ सङ्कीर्त्य मम चतुर्विधपुरुषार्थफलसिद्ध्यर्थं प्रतिपदमारभ्य नवमीपर्यन्तं नवरात्रिव्रतङ्करिष्ये इति सङ्कल्प्य नवरात्रकर्म कुर्यात् । मार्कण्डेयपुराणे उत्तराध्याये उक्तम् ।

शृणु राजन् प्रवक्ष्यामि चण्डिकार्चनमुत्तमम् ।
आश्विनस्य सिते पक्षे प्रथमादिनवस्वपि ॥
सुस्नातस्तिलतैलेन पूर्वाह्णेन नृपोत्तम ।

**End:**

शेषजलं नद्यामुत्सृजेत् । हेमरूपिणी प्रतिमां स्वगृहे पूजयेत् ।

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥
इति पठित्वा यथासुखं विहरेत् ॥

**Colophon:**

इति श्रीसकलागमस्मृतिपुराणसारसङ्ग्रहनवरात्रयुक्तश्रीमहालक्ष्मीव्रतकल्पः समाप्तः ॥

---

No. 8358. नवरात्रीव्रतकल्पः.

NAVARĀTRĪVRATAKALPAḤ

Pages, 31. Lines, 7 on a page.

Begins on fol. 1a of the MS. described under No. 514.

Complete. From Bhaviṣyōttarapurāṇa.

Similar to the above.

**Beginning:**

प्राणानायम्य एवङ्गुणविशेषणविशिष्टायां तिथौ मम संभावितसकलारिष्टनिवृत्त्यर्थं . . . . . . . . . . . . . .

आदिदुर्गामहालक्ष्मीमहासरस्वतीप्रसादसिद्ध्यर्थमस्मिन्नवरात्रिमहोत्सवे आश्विनशुक्लप्रतिपदिनमारभ्य महानवमीपर्यन्तमेकोत्तरवृद्ध्या सप्तशतीश्रीसूक्तभूसूक्तलक्ष्मीसूक्तनारायणहृदयलक्ष्मीहृदयमहाशान्तिमहासौरमन्युसूक्तरात्रिसूक्तएकादशरुद्रमहार्चनादिकान् ब्राह्मणैः कारयिष्ये ; यथाशक्ति स्वयञ्च करिष्ये। गणपतिपूजां कृत्वा पुण्याहं वाचयेत्। तत ऋत्विग्वरणप्रकारः।

* * * *

शमी शमय मे पापं शमी शत्रुविनाशिनी।
अर्जुनस्य धनुर्धारी रामस्य प्रियदर्शिनी ॥

क्षमापणम् ॥

इति शमीपूजाविधानं सम्पूर्णम् ॥

पावने नैमिशारण्ये शौनकाद्या महर्षयः।
सूतं दृष्ट्वा महात्मानं पप्रच्छुरिदमादरात् ॥

* * * *

सूतः—

भो शौनकादिऋषयः शृणुध्वं वचनं मम ।
आश्विने शुक्लपक्षे तु श्रवणेन युता तिथिः ॥
दशमी मुनिभिस्तत्र शमी शत्रुविनाशिनी ।
राज्ञां मुनीनान्देवानां यतस्सा विजयप्रदा ॥
विजया दशमी चेति कीर्त्यते मुनिसत्तमैः ।
तस्यां शमीपूजनं हि पूर्वं रामेण वै कृतम् ॥

**End:**

कृते तु तद्व्रते सम्यक् विजयस्सार्वकालिकः ।
यः शृणोति तदा भक्त्या कथामेतां सुपावनाम् ॥
यः श्रावयति विप्रेषु जनेष्वन्येषु मानवः ।
तयोस्समस्तविजयो भवत्येव न संशयः ॥

**Colophon:**

इति भविष्योत्तरपुराणे सूतशौनकसंवादे विजयदशमीव्रतकल्पं स-
म्पूर्णम् ॥

सीतारामेण विदुषा श्रीविल्लङ्घ्यन्वयेन्दुना ।
नवरात्रव्रते कल्पस्स साङ्गोपाङ्गतः कृतः ॥

---

No. 8359. नवरात्र्यवभृथस्नानकल्पः.

NAVARĀTRYAVABHṚTHASNĀNAKALPAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 13*b* of the MS. described under No. 514, wherein this has been omitted to be shown among the other works.

Deals with the religious bath to be taken on the morning of the day following the nine days of the Navarātri.

**Beginning:**

दशम्यामेव प्रातःकाले अवभृथस्नानङ्कर्तव्यमभ्युदयार्थम् । तदुक्तं संहितार्णवे—

नवरात्रिव्रतस्यास्य समाप्तौ दशमे दिने ।
प्रातःकाले तु कर्तव्यं मङ्गलावासये शुभम् ॥

राजन्नवभृथस्नानमभ्यञ्जनविधानतः ।
तस्मात्सर्वप्रयत्नेन स्नानमावभृथचरेत् ॥ इति ॥

**End:**

कृत्वा चावभृथस्नानं सम्यग्यदि निषेव्यते ।
तस्यैव सकला लक्ष्मीर्गृहे तिष्ठति सर्वदा ॥

**Colophon:**

इति ब्रह्माण्डपुराणे नवरात्रावभृथस्नानकल्पस्समाप्तः ॥

---

No. 8360. नवलक्षदीपव्रतकल्पः.

NAVALAKṢADĪPAVRATAKALPAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 1a of the MS. described under No. 8233.

Complete.

The chief item of this Vrata consists in the burning of nine lakhs of lights.

**Beginning:**

* * * *

तस्मिन्प्रातस्समुत्थाय दन्तधावनपूर्वकम् ।
स्नानं कुर्याद्विधानेन मन्त्रौषधिसमान्वितम् ॥

* * * *

यागभूमिं समागत्य मण्डपं तत्र कारयेत् ।
चूतपल्लवसंछन्नवितानेन विराजितम् ॥

**End:**

एतं नन्दीश्वराच्छ्रुत्वा नारणो(दो) मुनिपुङ्गवः ।
नवलक्षव्रतं कृत्वा ययौ बदरिकाश्रमम् ॥
व्रतस्यास्य प्रभावं यः पठेद्वा शृणुयादपि ।
अतिरात्रस्य यज्ञस्य फलमाप्नोत्यनुत्तमम् ॥

**Colophon:**

इत्यादिपुराणे नवलक्षव्रतं सम्पूर्णम् ॥

No. 8361. नष्टदोरकप्रायश्चित्तम्.
NAṢṬADORAKAPRĀYAŚCITTAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 76a of the MS. described under No. 3055.

Complete.

On the expiatory ceremony to be performed when the string tied round the arm of a person during the observance of the Anantavrata is lost.

**Beginning:**

युधिष्ठिर उवाच—

अनन्तव्रतमाहात्म्यं कृत्स्नं कृष्ण मया श्रुतम् ।
भगवन् दोररूपेण रक्ष (त्वं व्रति)मानवम् ॥
दोरं प्रमादतो नष्टं यदि स्याद्व्रतिभिर्जनैः ।
किं कर्म करणीयं स्याद्व्रतं त्रैलोक्यपावनम् ॥

श्रीकृष्ण उवाच—

साधु पृष्टं त्वया राजन् वक्ष्यामि व्रतिनां क्रमम् ।
अहं लोकस्य सर्वस्य रक्षार्थं शृणु तत्क्रमम् ॥
दोरे नष्टे महादोषस्संभवेद्व्रतिनामिह ।
तस्मात्तद्दोषशान्त्यर्थं प्रायश्चित्तो विधीयते ॥

**End:**

व्याधिना ग्रस्यते देहं श्रिया सन्त्यज्यते गृहम् ।
व्रतस्यातिक्रमे चैव . . . दं भव ॥

**Colophon:**

इति नष्टदोरप्रायश्चित्तं सम्पूर्णम् ॥

---

No. 8362. नष्टदोरकप्रायश्चित्तम्.
NAṢṬADORAKAPRĀYAŚCITTAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 82b of the MS. described under No. 8171

Complete.

Similar to the above.

**Beginning:**

वसिष्ठः—

अनन्तव्रतमाहात्म्यं बहुशश्च मया श्रुतम् ।
दोररूपेण चानन्तो रक्षतीति द्विजोत्तम ॥
प्रमादाद्यदि नष्टस्स्याद्वद त्रैलोक्यपावन ।
साधु पृष्ट त्वया ब्रह्मन् वक्ष्यामि च यथाश्रुतम् ॥
शृणु वासिष्ठ लोकस्य रक्षार्थं शान्तिमीप्सिता(म्) ॥

**End:**

अनन्तरचतुर्दश्यां प्रायश्चित्तं समाचरेत् ।
चतुर्दशद्विजेभ्योऽन्नं प्रायश्चित्तं सदक्षिणा ॥

**Colophon:**

इति नष्टदोरकप्रायश्चित्तम् ॥

---

## No. 8363. नष्टदोरकप्रायश्चित्तम्.

## NAṢṬADŌRAKAPRĀYAŚCITTAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 16*a* of the MS. described under No. 8180.

Complete.

Similar to the above.

**Beginning:**

युधिष्ठिरः—

कृष्ण कृष्ण कृपालो त्वमगते(र्मे)गतिर्भव ।
भवान्वै दोररूपेण पुत्रपौत्रप्रवर्धसि(नः) ॥
दोरं प्रमादतो नष्टं यदि स्याद्व्रतिभिर्जनैः ।
किं कर्म करणीयं स्याद्वद त्रैलोक्यपावने ॥

* * * *

व्याधिना ग्रस्यते देहं श्रिया सन्त्यज्यते गृहम् ॥
गृहञ्च धनधान्यात्मपुत्रदारक्षयं विदुः ।
तस्मात्सर्वप्रयत्नेन प्रायश्चित्तं विधीयते ॥

गुरुं प्रदक्षिणीकृत्य नमस्कृत्य समाहितः ।
विज्ञाप्य दोरनाशञ्च कल्पोक्तविधिना व्रती ॥

**End :**

एवंकृते धर्मराज सन्ततिस्तस्य वर्धते ।
यशस्करं पुष्टिकरं श्रीकरं रोगनाशनम् ॥
आयुष्करं भवेत्तस्य सत्यं सत्यं मयोदितम् ।

**Colophon :**

इति श्रीकृष्णदेवोक्तनष्टदोरप्रायश्चित्तविधिः ॥

---

### No. 8364. नष्टदोरकप्रायश्चित्तम्.
### NAṢṬADORAKAPRĀYAŚCITTAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 26*b* of the MS. described under No. 8177.
Complete.
Similar to the above.

**Beginning :**

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ मम समस्तपापक्षयार्थं दोरनाशजनितदोषपरिहारार्थमनन्तव्रतफलसिद्ध्यर्थं नष्टदोरप्रायश्चित्तं करिष्ये ।

युधिष्ठिरः—

दोरके त्रुटिते नष्टे पतिते ज्वलितेऽपि वा ।
संस्थाप्य विस्मृते वापि हृते वापि प्रमादतः ॥

**End :**

एवं कृते नृपश्रेष्ठ विच्छिन्नमपि तद्व्रतम् ।
अनन्तस्य प्रसादेन सम्पूर्णफलदो भवेत् ॥

**Colophon :**

इति नष्टदोरप्रायश्चित्तं सम्पूर्णम् ॥

No. 8365. नष्टदोरकप्रायश्चित्तम्.

NAṢṬADŌRAKAPRĀYAŚCITTAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 27a of the MS. described under No. 8177

Complete.

Similar to the above.

**Beginning:**

श्रीकृष्ण उवाच—

यथा शुक्लचतुर्दश्यां पूर्वाह्णे स्नानतश्शुचिः ।
प्रायश्चित्तन्ततः कुर्याद्यथाशक्त्यनुसारतः ॥
दोरनष्टं यथा तस्य तथा कुर्यादतन्द्रितः ।
स्नात्वा नद्यां घटं पूर्णं सचेलं गृहमध्यमे ॥
कृतनित्यक्रियो भूत्वा द्विजानुज्ञा ततःपरम् ।
उपविश्य शुचौ देशे कृत्वा सङ्कल्पपूर्वकम् ॥

**End:**

तस्मात्सर्वप्रयत्नेन प्रायश्चित्तं समाचरेत् ॥
विधिरब्दादिकं प्रोक्तं सर्वदाप्यधिकञ्चरेत् ।
शरीरशुद्धिदं कृत्वा व्रतं कुर्याद्विचक्षणः ॥

**Colophon:**

इति नष्टदोरप्रायश्चित्तं समाप्तम् ॥

---

No. 8366. नित्यधान्यव्रतकल्पः.

NITYADHĀNYAVRATAKALPAḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 81a of the MS. described under No. 139.

Complete. From Bhaviṣyōttarapurāṇa.

This Vrata consists in worshipping the Sun-god on all mornings of the Magha month commencing either from the beginning of the month or from the seventh day of the bright fortnight in that month. The Vrata is considered to have the power of bestowing prosperity on women. A handful of grain is

set apart every day and the accumulation for the whole month is presented to some Brahman at the close of the Vrata.

**Beginning:**

सुपुण्ये नैमिशारण्ये मनआह्लादकारिणि ।
नानापुष्पलताकीर्णे नानावृक्षविराजिते ॥
तत्र स्थित्वा महात्मानं पुण्यं ब्रह्मर्षयस्तदा ।
भस्मोद्धूळितसर्वाङ्गं त्रिपुण्ड्राङ्कितमस्तकम् ॥

* * * *

शृणु ते विप्र वक्ष्यामि व्रतानामुत्तमं व्रतम् ।
नित्यधान्यव्रतं नाम स्त्रीणां सौभाग्यकारणम् ॥
सर्वपापहरं पुण्यं सर्वोपद्रवनाशनम् ।
सर्वक्रतुफलश्चैव सर्वतीर्थफलप्रदम् ॥

* * * *

माघमासे च सप्तम्यां सङ्क्रान्त्यां व्रतमाचरेत् ।
प्रातरेव शुचिर्भूत्वा दन्तधावनपूर्वकम् ॥
स्नानं निर्वर्त्य विधिवत् धौतवस्त्रञ्च धारयेत् ॥

* * * *

आवाहयेज्जगन्नाथं भास्करं देवरूपिणम् ।
कल्पोक्तेन विधानेन व्रतङ्कुर्यात्प्रयत्नतः ॥

**End:**

अनेकजन्मौघविनश्वरीणां सुखप्रदं पुत्रसमृद्धिदञ्च ।
सुवासिनीत्वञ्च सुभूषणञ्च विष्णोः पदं शाश्वतमाप्नुवन्ति ॥

**Colophon:**

इति भविष्योत्तरपुराणे उमामहेश्वरसंवादे नित्यधान्यव्रतकल्पं सम्पूर्णम् ॥

---

## No. 8367. नृसिंहजयन्तीकल्पः.
## NṚSIMHAJAYANTĪKALPAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 52*b* of the MS. described under No. 7758.

Complete.

This Vrata consists in the worship of god Nṛsiṁha on the anniversary day of His appearance as an incarnation of Viṣṇu, *i.e.*, on the fourteenth day of the bright fortnight in the month of Vaiśākha every year when the moon is in the lunar asterism Svāti.

**Beginning:**

माधवे मासि शुक्ले च चतुर्दश्यां मरुद्युते ।
द्वौ विदारणकर्माढ्यौ द्वौ बाहू च रणोद्यतौ ॥
द्वौ च शङ्खधरौ द्वौ च बाहू बाणधनुर्धरौ ।
खड्गखेटधरौ द्वौ च द्वौ गदापद्मधारिणौ ॥
पाशाङ्कुशधरौ द्वौ च द्वौ रिपोर्जानुमस्तके ।
इति षोडशदोष्षण्डमण्डितं नृहरिं भजे ॥
श्रीनरसिंहाय नमः ध्यानं समर्पयामि ।

**End:**

आकल्पन्तन(यें)स्साकं धनधान्यानि सर्वदा ।
भुक्त्वान्ते स्वर्गजान् भोगान् जायन्ते चक्रवर्तिनः ॥

प्रतिमादानमन्त्रः—

दिव्यश्रियं फलं दाता ग्रहीता च फलप्रदः ।
अतो नृसिंहनामा वै तस्माच्छान्तिर्भवेन्मम ॥

**Colophon:**

इति नृसिंहजयन्तीव्रतकल्पस्संपूर्णः ॥

---

No. **8368.** नृसिंहजयन्तीकल्पः.

NṚSIṀHAJAYANTĪKALPAḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 22*a* of the MS. described under No. 8178.

Complete. From Nṛsiṁhapurāṇa.

Similar to the above.

**Beginning:**

वैशाखमासे शुक्लायां भूतानां सिद्धमानुषः ।
यतो हरिः स्वयं साक्षाद्धिरण्यकशिपोः पुरा ॥

वधार्थाय महाक्रोधात्तस्यामुपवसेत्सुधीः ।
यस्मिन् दिने तयोर्मुक्ते नरके नियतं वसेत् ॥

End:

प्रातःकाले नित्यकर्मा[कर्मा]दिकं कृत्वा ब्राह्मणान् भोजयित्वा दक्षिणाभिस्तोषयित्वा पश्चाद्बन्धुभिः स्वयं स्वा(पारणं)कृत्वा यस्य स्मृत्येति समर्पणम् ॥

**Colophon:**

इति श्रीनृसिंहजयन्तीकल्पः सम्पूर्णः ॥

---

No. **8369.** नृसिंहजयन्तीकल्पः.
NṚSIṀHAJAYANTĪKALPAḤ.

Pages, 9. Lines, 6 on a page.

Begins on fol. 43*a* of the MS. described under **No. 2907.**
Complete.
Similar to the above.

**Beginning:**

सुरासुरशिरोरत्नमरीचिखचिताङ्घ्रये ।
विघ्नान्धकारसूर्याय गणाधिपतये नमः ॥
ब्रह्माणं सुखमासीनं सर्वदेवनमस्कृतम् ।
सिद्धसङ्घसमाकीर्णं गन्धर्वमुनिसेवितम् ॥

नारदः—

जयन्त्याः श्रीनृसिंहस्य माहात्म्यं कथयस्व मे ।
किं पुण्यं किं फलं तस्य किं पुरा चरितं विभो ॥

**End:**

अनेन विधिना यस्तु जयन्तीव्रतमुत्तमम् ॥
करोति स नरो याति तद्विष्णोः परमं पदम् ।
नारी चेत्तारयेद्भर्त्रा कुलमेकोत्तरं शतम् ॥

न दौर्भाग्यं न वैधव्यं न चान्तःकलहो गृहे ।
न सन्ततेश्च विच्छित्तिः कुलं तस्य प्रवर्धते ॥

**Colophon:**

इति श्रीनृसिंहजयन्तीकल्पं सम्पूर्णम् ॥

---

### No. 8370. नृसिंहजयन्तीकल्पः.
### NṚSIṀHAJAYANTĪKALPAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 55*a* of the MS. described under No. 2907, wherein this has been omitted to be shown among the other works.

Incomplete.

Similar to the above.

**Beginning:**

त्रिपञ्चाशत्सहस्राणि (णां) वर्तिमालाविभूषितम् ।
नीराजनं गृहाणेश भक्तानाञ्च भयापह ॥ नीराजनम् ।

**End:**

जयन्तीमहिमानं यः शृणुयान्महिमाधिकः ।
एवं जागरणं कृत्वा भक्तियुक्तेन चेतसा ॥
ततः प्रातस्समुत्थाय कृत्वा सन्ध्यादिकाः क्रियाः ।
नृसिंहप्रतिमादानं कुर्यान्नृहरिरूपिणे ॥
विप्राय वेदविदुषे शान्ताय च कुटुम्बिने ।
तद्रूपकमि.

---

### No. 8371. नृसिंहजयन्तीकल्पः.
### NṚSIṀHAJAYANTĪKALPAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 60*b* of the MS. described under No. 7758.

Complete. From Bhaviṣyōttarapurāṇa.

Similar to the above.

**Beginning:**

तीर्थकृत्यदीपिकायां वैशाखशुक्लद्वादश्यां हस्तनक्षत्रयुक्तायां स्नानदानोपवासादिकं सकृदपि कृतमक्षय्यफलम्। वैशाखशुक्लचतुर्दशी, गारुडकल्पादिः, नृसिंहजयन्ती च। तत्र स्नानदानादिकं पुराकल्पवदाकल्पफलम्। अथ भविष्योत्तरपुराणोक्तश्रीनृसिंहजयन्तीव्रतानुष्ठानप्रकारो लिख्यते।

वैशाखचतुर्दश्यां तिथिद्वैविध्ये विद्धायामेव व्रतं कार्यम्। तत्र पूर्वोक्तेषु दन्तधावनपूर्वकम् अभ्यज्य स्नात्वा ब्रह्मचर्ययुक्तो हरिं ध्यायन् रात्रौ शयीत। (अ)परेद्युः प्रातरुत्थाय नियतं कर्म कृत्वा। . . .

* * * *

विचित्रगन्धमाल्याद्यलंकृतमण्टपान्तरे तण्डुलोपरि पूर्णकुम्भं स्थापयित्वा तदुपरि रौप्यमात्रेण विन्यस्य अष्टदलपद्मं लिखित्वा तां प्रतिमां तत्र निक्षिप्य षोडशोपचारैः प्रतिमायां ओं लक्ष्मीनृसिंहाय नम इति मूलमन्त्रेण पूजयेत्। अत्र च प्रकारः।

**End:**

व्रतं लक्ष्मीनृसिंहस्य सकृत् कुर्वन्ति ये नराः।
ते पुत्रपौत्रसहिता मोदन्ते स्थिरसम्पदः॥
सनत्कुमारस्सकलार्थवेदिकां कथामपूर्वां मुनयेऽभिधाय।
अनुग्रहायैव च पूरुषाणां पदं स्वकं दिव्यमगान्मुनीन्द्रः॥

**Colophon:**

इति भविष्योत्तरपुराणे लक्ष्मीनरसिंहजयन्तीव्रतकल्पस्स मासः॥

---

## No. 8372. नृसिंहजयन्तीकल्पः.
## NṚSIṀHAJAYANTĪKALPAḤ.

Pages, 3. Lines, 11 on a page.

Begins on fol. 4a of the MS. described under No. 8198.

Contains Pūjā only complete.

Similar to the above.

**Beginning:**

द्वौ विदारणकर्माढ्यौ द्वौ चन्द्रोद्धारणोद्यतौ ।
शङ्खचक्रधरौ द्वौ च द्वौच बाणधनुर्धरौ ॥

* * * *

पाशाङ्कुशधरौ द्वौ च द्वौ रिपोर्जानुमस्तके ।
इति षोडशदोर्दण्डमण्डितं नृहरिं भजे ॥ ध्यानम् ।
नृसिंह सर्वलोकेश सर्वाभरणभूषित ।
आगच्छ जगदाधार कारुण्यामृतसागर ॥
सनकादिमुनीन्द्रैश्च सेव्यमान जनार्दन । आवाहनम् ॥

**End:**

हिरण्यकवधार्थाय भूमारोत्तारणाय च ।
प्रियचिकीर्षन् भक्तानां दैत्यानां निधनाय च ॥
परित्राणाय साधूनाञ्जातो लक्ष्म्याः पतिस्त्वयम् ।
गृहाणार्घ्यं मया दत्तं श्रीलक्ष्म्या सहितो हरे ॥

**Colophon:**

इति श्रीनृसिंहजयन्तीपूजाविधानं समाप्तम् ॥

---

No 8373. नृसिंहजयन्तीकल्पः.

NṚSIṀHAJAYANTĪKALPAḤ.

Pages, 5. Lines, 16 on a page.

Begins on fol. 17a of the MS. described under No. 8258.

Complete.

Same as the above.

---

No. 8374. पुत्रगणपतिव्रतकल्पः.

PUTRAGAṆAPATIVRATAKALPAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 10a of the MS. described under No. 8218.

Complete.

This Vrata consists in the worship of Gaṇapati commencing from the fourth day of the bright fortnight in the month of Phālguna. The observance of this Vrata is considered to have the power of enabling one to obtain children.

**Beginning:**

नन्दिकेश्वर उवाच —

विनायकचतुर्थ्याख्यं व्रतं वक्ष्यामि तेऽधुना ।
स्वर्ग्यं यशस्यमायुष्यं समीहितफलप्रदम् ॥
विघ्नोपशमनायालं सर्वकामार्थसिद्धिदम् ।

**End:**

प्रियं पशुपतेर्नित्यमृषिभिश्चाभ्युपासितम् ॥
फाल्गुनाद्यचतुर्थ्यां च आद्यं व्रतमिदं शुभम् ।
रिक्तव्रतञ्च विप्रेन्द्र तिलान्नं पारणं स्मृतम् ॥
तदेव वह्नौ होतव्यं ब्राह्मणाय च तत्पुरा ।
दद्यात्तेनैव नैवेद्यं विघ्नराजाय संयमी ॥
यजेद्गणपतिं रात्रौ गन्धपुष्पैर्यथाक्रमम् ।
सिन्दूररक्तवर्णाङ्गं स्नापितं कुङ्कुमाम्भसा ॥
फाल्गुनादिषु मासेषु एतैर्नामभिरर्चयेत् ।
सोऽप्येवमचिराद्राजा स्वपत्न्या लब्धवान् सुतम् ॥
मरुत्तञ्च महाकीर्तिमनेकक्रतुयाजकम् ।
यस्याद्यापीह गायन्ति श्लोकं वेदविदो द्विजाः ॥

नीलो मकर इत्यष्टौ तस्यासन्निधयोऽक्षयाः ॥

---

No. 8375. पुत्रसङ्क्रान्तिव्रतकल्पः.

PUTRASAÑKRĀNTIVRATAKALPAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 8a of the MS. described under No. 8218.

Complete. From Skāndapurāṇa.

This Vrata consists chiefly in the presentation to a Brahman of a jar together with sugar and a red cloth, all these having been duly purified by worship. The observance of the Vrata is considered to have the power of enabling one to obtain a son and also of making one prosperous in life.

**Beginning :**

श्रीसूर्यः—

अथातस्संप्रवक्ष्यामि पुत्रसङ्क्रान्तिमुत्तमम् ।
अयने चोत्तरे पुण्ये दिवा सङ्क्रमणं यदि ॥
रात्रौ वा यदि सङ्क्रान्तिः प्रभाते विमले सति ।
शर्करासहितं कुम्भं फलाष्टकसमन्वितम् ॥
वेष्टयेद्रक्तवस्त्राभ्यां ब्राह्मणाय निवेदयेत् ।
गन्धपुष्पादिनाभ्यर्च्य एकभुक्तं च कारयेत् ॥

**End :**

आधिव्याधिहरं नृणां स्त्रीणां सौभाग्यवर्धनम् ।
पुत्रसम्पत्करं धन्यं तेजोबलविवर्धनम् ॥
कन्यानां शतसाहस्रं दत्तस्य फलमाप्नुयात् ।
सौवर्णेन विमानेन सूर्यलोकं स गच्छति ॥
एकवर्षं द्विवर्षं वा प्रतिवर्षं प्रपूजयेत् ।
व्रतस्य फलमाप्नोति नात्र कार्या विचारणा ॥

**Colophon :**

इति श्रीस्कन्दपुराणे सूतऋषिसंवादे पुत्रसङ्क्रान्तिव्रतकल्पस्सम्पूर्णः ॥

---

No. 8376. पुत्रानन्तव्रतकल्पः.

PUTRĀNANTAVRATAKALPAH.

**Pages**, 4. **Lines**, 6 on a page.

Begins on fol. 6a of the MS. described under No. 8218.

Complete.

This Vrata consists in the worship of Ananta on the day when the moon is in the asterism Mṛgaśiras in the month of Mārgaśīrṣa. This is observed with a view to obtain good children.

**Beginning:**

दाल्भ्य उवाच—

अपुत्रता महादुःखमतिदुःखं कुपुत्रता ।
कुपुत्रः सर्वदुःखानां हेतुभूतो ममानघ ॥
धन्यास्ते ये सुतं प्राप्य सर्वदुःखविवर्जितम् ।
रक्तं प्रशान्तं बलिनं तथा निर्वृतिमागताः ॥

* * *

गुरो सत्पुत्रलाभाय कृतासनपरिग्रह ।
कथमाचक्ष्व मैत्रेय नामानन्तव्रतं शुभम् ॥

मैत्रेयः—

योऽयमिच्छन्नरः कर्म नारी वा वरवर्णिनी ।
सुवर्त्मनाराध्य विभुं सम्यगाप्नोति केशवम् ॥
मार्गशीर्षे मृगशिरो भीरु यस्मिन्दिने भवेत् ।
तस्मिन् संप्राप्य गोमूत्रे स्नात्वा संयतमानसा ॥

**End:**

एतद्व्रतं महाभागे पुण्यं स्वस्त्ययनं फलम् ।
अनन्तव्रतसंयुक्तं सर्वपापप्रणाशनम् ॥
तत्कुरुष्व च देवि त्वं व्रतं शीलव्रते परम् ।
वसि(रि)ष्ठं सर्वलोकस्य यदि पुत्रं त्वमिच्छसि ॥

**Colophon:**

इति श्रीविष्णुधर्मोत्तरपुराणे पुत्रानन्तव्रतं सम्पूर्णम् ॥

---

No. 8377. पूर्णिमामावास्याव्रतम्.
PŪRṆIMĀMĀVĀSYĀVRATAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 37*b* of the MS. described under No. 3105.

Complete.

This Vrata is to be observed on the new-moon and full-moon days in the month of Jyēṣṭha.

**Beginning:**

अथ ज्येष्ठपूर्णिमायाममायां च वटसावित्रीव्रतम । इयं च पूर्व-विद्धा ग्राह्या ।

मूतविद्धा न कर्तव्या अमावास्या च पूर्णिमा ।
वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति ॥

ब्रह्मकैवर्तात् वर्जयित्वेति पर्युदासात् अष्टादशनाडीवेधः सावित्री-व्रतातिरिक्तपरः । इयं(दं) च त्रयोदशीमारभ्य पूर्णिमान्तं कर्तव्यम् ।

**End:**

अमायां च तथा ज्येष्ठे वटमूले सदा सती ।
त्रिरात्रोपोषिता नारी विधिनानेन पूजयेदिति ॥

---

No. **8378.** प्रदोषव्रतोद्यापनम्.

PRADŌṢAVRATŌDYĀPANAM.

**Pages, 12.** Lines, 4 on a page.

Begins on fol. 67*a* of the MS. described under No. 8200.

Incomplete.

This Vrata consists in the worship of Śiva and Pārvatī on the Pradōṣa day in the months of Kārtika, Vaiśākha and Māgha.

**Beginning:**

स्नात्वा शुद्धवस्त्रं धृत्वा नित्यपूजार्घ्यन्दत्वा कार्तिक्यां वैशाख्यां माघे वा प्रदोषव्रतोपक्रमोद्यापनं कुर्यात् । चतुरश्रं गोमयेनोपलिप्य पञ्चवर्ण-सहितरङ्गवल्ल्याऽलङ्कृत्य मध्ये प्रस्थाष्टभिर्धान्यैस्तदर्धैस्तण्डुलैस्तदर्धैस्तिलैश्च चतुरश्रं स्थण्डिलं कल्पयित्वा, तन्मध्ये नलिनमुल्लिख्य पञ्च कुम्भान् प्रतिष्ठाप्य, चूतपत्रैः कूर्चैर्नारिकेलफलैरलङ्कृत्य वस्त्रेण संवेष्ट्य, अनुज्ञा । विघ्नेश्वरपूजां पुण्याहञ्च कृत्वा ब्राह्मणानाहूय सभायां मध्ये नमस्कृत्य प्रार्थयेत् । सङ्कल्प्य त्रयोदश्यां शुभतिथौ उमामहेश्वरप्रसादसिद्ध्यर्थं प्र-दोषव्रतोद्यापनं करिष्य इति सङ्कल्प्य.

**End:**

त्रयोदशीव्रतं कृत्वा विष्णुर्विष्णुत्वमाप्नुयात् ॥
सोमवारव्रतं कृत्वा ब्रह्मा ब्रह्मत्वमाप्नुयात् ।
उमामहेश्वरव्रतं कृत्वा शक्रत्वमाप्नुयात् ॥
एतद्व्रतत्रयं पुण्यं मम नेत्रसमुद्भवम् ।
प्रदोषं प्रथमन्वै . . . . ॥

---

No. 8379. बलीन्द्रव्रतपूजाविधानम्.
BALĪNDRAVRATAPŪJĀVIDHĀNAM.

Pages 4. Lines, 8 on a page.

Begins on fol. 80*b* of the MS. described under No. 7758
Complete. From Skāndapurāṇa.
On the Vrata which consists in the worship of Balicakravartin.

**Beginning:**

कृत्वैतत्सर्वमेवेह ऋचा दैत्यपतेर्बलेः ।
पूजां कृत्वा नृपस्साक्षाद्भूमौ मण्डलके शुभे ॥
बलिमालिख्य दैत्येन्द्रं वर्णकैः पञ्चरङ्गकैः ।

* * * *

ध्यायेद्बलीन्द्रं द्विभुजं रथस्थं मुक्ताफलालङ्कृतसर्वगात्रम् ।
नक्षत्रनाथाभमनर्घवक्त्रं प्रियं मुरारेः करवालहस्तम् ॥ ध्यानम् ।

* * * *

बलिराज नमस्तुभ्यं विरोचनसुत प्रभो ।
भविष्येन्द्र सुराराते पूजेयं प्रतिगृह्यताम् ॥
इति पूजाविधिः ॥

कथाप्रारम्भः—

पुरा हिरण्यकशिपोर्वंशे दानवसत्तमः ।
विरोचन इति ख्यातस्तस्य पुत्रोऽभवद्बली ॥

बलीन्द्र इति विख्यातस्सर्वलोकेषु विश्रुतः ।
भूलोकं स्ववशं कृत्वा सर्वलोकमवाप सः ॥

**End:**

बलिस्तुष्टमनास्तत्र पातालं च विवेश ह ॥
लोकत्रितयमिन्द्राय वामनः प्रददौ विभुः ।
सर्वदेवेषु पश्यत्सु वामनोऽन्तर्दधे तदा ॥
ध्यायेद्बलीन्द्रं . . . करवालहस्तम् ॥

**Colophon:**

इति श्रीस्कान्दे पुराणे बलीन्द्रपूजाविधानं(कल्पं) संपूर्णम् ॥

---

### No. 8380. बलीन्द्रव्रतपूजाविधानम्.

### BALĪNDRAVRATAPŪJĀVIDHĀNAM.

Page, 1. Lines, 12 on a page.

Begins on fol. 13*a* of the MS. described under No. 8198.

Complete.

Similar to the above.

**Beginning:**

ध्यायेद्बलीन्द्रं द्विभुजं रथस्थं मुक्ताफलालङ्कृतसर्वगात्रम् ।
नक्षत्रनाथाभमनर्घवस्त्रं प्रियं मुरारेः करवाळहस्तम् ॥ ध्यानम् ।
वैरोचनाय नमः आवाहनम् । बलीन्द्राय नमः आसनम् ॥

**End:**

बलिराज नमस्तुभ्यं वैरोचनसुत प्रभो ।
भविष्येन्द्र सुराराध्य पूजेयं प्रतिगृह्यताम् ॥ अर्घ्यम् ।

**Colophon:**

इति पूजाविधिस्समाप्तः ॥

## No. 8381. बलीन्द्रव्रतपूजाविधानम्.
## BALĪNDRAVRATAPŪJĀVIDHĀNAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 5*b* of the MS. described under No. 8258.

Complete.

Same as the above.

---

## No. 8382. बालादित्यव्रतकल्पः.
## BĀLĀDITYAVRATAKALPAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 8*b* of the MS. described under No. 8213.

Complete. From Padmapurāṇa.

This Vrata consists in the worship of the Sun-god every morning by offering six oblations of water, by prostrating oneself six times, etc. This is considered to have the power of bestowing prosperity.

**Beginning:**

श्रीयोगीश्वर उवाच—

केन व्रतेन देवेश तपसा नियमेन वा ।
दानैर्वा तीर्थयात्राभिर्दुःखानि विविधानि च ॥
आधयो व्याधयश्चैव विनश्यन्ति विभावसो ।
सन्तति येन लभते तन्मे ब्रूहि कृपा यदि ॥

श्रीभास्कर उवाच—

अथातस्संप्रवक्ष्यामि व्रतानामुत्तमव्रतम् ।
बालादित्यव्रतं नाम मम प्रीतिकरं सदा ॥
आधिव्याधिहरं नृणां स्त्रीणां सौभाग्यवर्धनम् ।
पुत्रसंपत्करं धन्यं तेजोबलविवर्धनम् ॥
मुच्यते सर्वदुःखेभ्यः पापेभ्यः सर्वमानवः ।
क्रमवित्तम योगन्द्रि शृणु सर्वं सुविस्तरम् ॥

**End:**

स राजा भार्यया सार्धमन्वतिष्ठदिदं मुदा ।
तत्प्रभावेण योगीन्द्र राजाभूत्सपुरोहितः ॥
भोगान् भुक्त्वा चिरं भूमौ पुत्रपौत्रसमन्वितः ।
अर्कस्य मण्डलं भित्त्वा ततो मोक्षपदं ययौ ॥

**Colophon:**

इति पद्मपुराणे बालादित्यव्रतं सम्पूर्णम् ॥

---

No. 8383. बिन्दुद्वादशीव्रतकल्पः.

BINDUDVĀDAŚĪVRATAKALPAḤ.

Pages, 7. Lines, 9 on a page.

Begins on fol. 19*a* of the MS. described under No. 5852.

Complete. From Bhaviṣyōttarapurāṇa.

This Vrata consists in fasting on the eleventh day of the bright fortnight in the month of Āśvina and worshipping Lakṣmī on the next day. It is considered to have the power of removing barrenness from women.

**Beginning:**

(करिष्य)माणस्त्वादौ तदङ्गत्वेन शुद्ध्यर्थं वृद्ध्यर्थमभ्युदयार्थं च शुद्धिपुण्याहवाचनं करिष्ये । गणाधिपतिपूजानन्तरं पुण्याहवाचनं कुर्यात् । बिन्दुद्वादशीव्रतोद्यापनाख्ये कर्मणि आचार्यं त्वामहं वृणे । ब्रह्माणं त्वामहं वृणे ।

* * * *

केशवाय नमस्तुभ्यं सहस्रशिरसे नमः ।
गोविन्दाय नमस्तुभ्यं पद्मनाभ नमोऽस्तु ते ॥ नमस्कारः ॥
यस्य स्मृत्या च । सर्वं श्रीलक्ष्मीनारायणार्पणमस्तु ।
इति पूजाविधानं संपूर्णम् ।
सनकाद्या मुनिगणाः सूताश्रममुपागताः ॥
सूतं दृष्ट्वा नमस्कृत्य पप्रच्छुर्मुनिपुङ्गवाः ।

ऋषय ऊचुः—

सुवासिनीनां सर्वासां यमबाधा न विद्यते ।
सुवासिनीत्वं सौभाग्यं पुत्रपौत्रप्रवर्धनम् ॥
तथाविधं व्रतं लोके सूत नो वद विस्तरात् ।

सूत उवाच—

तद्व्रतं तु प्रवक्ष्यामि सर्वपापहरं परम् ।
सपुत्रापुत्रकाणां च वन्ध्यानां कामदं शुभम् ॥
बिन्दुद्वादशिविख्यातं विष्णुप्रीतिकरं परम् ।

* * * *

पञ्चवर्षव्रतोद्यापनमाचरेत् ।
कार्तिके शुद्धद्वादश्यामेवं कृत्वा यथाविधि ॥

**End:**

ये पठन्तीममध्यायं शृण्वन्ति श्रद्धया नराः ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

**Colophon:**

इति श्रीभविष्योत्तरपुराणे बिन्दुद्वादशीव्रतोद्यापनकल्पस्संपूर्णः ॥

---

No. 8384. बिन्दुद्वादशीव्रतकल्पः.
BINDUDVĀDAŚĪVRATAKALPAH.

Pages, 4. Lines, 8 on a page.
Begins on fol. 73*b* of the MS. described under No. 8179.
Complete.
Similar to the above.

**Beginning:**

लक्ष्म्याः स्वयंवरार्थाय विष्णुर्मे प्रीयतामिति ।
ततस्तां बिन्दुभिः पूर्तां तुलसीमूलसंयुताम् ॥
अर्चयन्ति प्रतिदिनमात्मानं मधुसूदनः ।
जगृहे वल्लभां लक्ष्मीं व्रतेनानेन तोषितः ॥

तदाप्रभृति विप्रेन्द्र व्रतं पापहरं महत् ।
बिन्दुद्वादशिकानाम विष्णुदत्तवरं शुभम् ॥
* * *
आश्विने मासि संप्राप्ते शुक्लैकादशिके दिने ।
उपोष्य विधिवद्भक्त्या पञ्चद्वादशभिर्हुनेत् ॥

See under the previous number for the end with colophon.

---

No. 8385. बिन्दुद्वादशीव्रतकल्पः.

BINDUDVĀDAŚĪVRATAKALPAḤ.

**Pages**, 4. Lines, 8 on a page.

Begins on fol. 37*b* of the MS. described under No. 8177, wherein this has been omitted to be shown among the other works.

Complete. From Skandapurāṇa.

Similar to the above.

**Beginning:**

कार्तिकैकादशीं सम्यक् उपोष्य द्वादशीदिने ।
पुष्पमण्डपिका कार्या वितानाद्यैरलंकृता ॥
गोमयेन विलिप्याथ चतुरश्रं सुशोभनम् ।
पञ्चवर्णैरलङ्कृत्य सर्वतोभद्रमुत्तमम् ॥
तन्मध्ये स्थापयेद्धान्यं प्रस्थमात्रं प्रयत्नतः ।

**End:**

एवंप्रभावं द्वादश्या व्रतं पापप्रणाशनम् ॥
ये कुर्वन्ति भुवो लोके नरो वाप्यथ वाङ्गना ।
तेषामियं गतिस्साक्षाद्विष्णुसायुज्यदायिनी ॥

**Colophon:**

इति स्कन्दपुराणे बिन्दुद्वादशीव्रतं संपूर्णम् ॥

---

No. 8386. बिन्दुद्वादशीव्रतकल्पः.

BINDUDVĀDAŚĪVRATAKALPAḤ.

**Pages**, 14. Lines, 5 on a page.

Begins on fol. 65*a* of the MS. described under No. 5765.

Complete.

Similar to the above.

**Beginning:**

पूर्वोक्तएवंगुणविशेषणविशिष्टायां शुभतिथौ आचरितव्रतकल्पोक्त-संपूर्णसकलफलावाप्त्यर्थं . . षोडशोपचारपूजां करिष्ये, आदौ गणपतिपूजां करिष्ये, तदङ्गकलशाराधनं करिष्ये—

चतुर्भुजं महाकायं जाम्बूनदसमप्रभम् ।
शङ्खचक्रगदापद्मरमागरुडशोभितम् ॥

* * * *

यस्य स्मृत्या . . लक्ष्मीनारायण, यत् पूजितं मया देव परिपूर्णं तदस्तु मे ॥

इति पूजाविधानं सम्पूर्णम् ॥

क्षीराब्धावुत्थिते देवि लक्ष्मीशे त्रिजगद्गुरौ ।
कार्तिके शुक्लपक्षे तु एकादश्यां व्रती शुचिः ॥
उपवासं प्रकुर्वीत कुर्याद्विष्णोस्तुपूजनम् ।
दीपाराधनपूर्वन्तु रात्रौ जागरणं व्रती ॥
नृत्तगीतपुराणाद्यैः प्रतियामं प्रपूजयेत् ।
द्वादश्यां प्रातरुत्थाय कुर्यान्नित्यक्रियां शुभाम् ॥

**End:**

ये शृण्वन्तीदमाख्यानं ये पठन्ति द्विजोत्तमाः ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

**Colophon:**

इति स्कन्दपुराणे कुन्तीबादरायणसंवादे बोधनद्वादशीव्रतकल्पस्सं-पूर्णः ॥

---

## No. 8387. बिन्दुद्वादशीव्रतकल्पः.

## BINDUDVĀDAŚĪVRATAKALPAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 73a of the MS. described under No. 2907, wherein this has been shown among the other works as Bindu-cilukadvādaśī.

Complete. From Bhaviṣyōttarapūraṇa.

Similar to the above.

**Beginning:**

ऋषय ऊचुः—

सूत सर्वार्थतत्त्वज्ञ सर्वकामदुघव्रतम् ।
इदानीं श्रोतुमिच्छामि विष्णोः प्रीतिकरं महत् ॥

सूत उवाच—

शृणुध्वं मुनयस्सर्वे व्रतं सर्वार्थसाधनम् ।
लक्ष्मीनारायणोऽप्याह नित्यप्रीतिकरं शुभम् ॥
बिन्दुद्वादशिकं नाम साक्षात्कृष्णेन भाषितम् ।
आश्विने मासि संप्राप्ते शुक्लैकादशिके दिने ॥
उपोष्य विधिवद्भक्त्या पञ्चैर्द्वादशभिर्हरिम् ।
पञ्चवर्णैस्समभ्यर्च्य व्रती वृन्दावनेऽन(घः) ॥
फलमत्स्यादिकैस्सम्यङ्नैवेद्यैः खण्डदीपकैः ।
प्रक्षाल्य जागरङ्कुर्यात्पुराणश्रवणादिभिः ॥
एवमभ्यर्च्य विधिवत् द्वादश्यां पारणे रतः ।

**End:**

तस्मात् कुरुध्वमृषयो व्रतमिष्टदायि
पापापहं सुकृतवर्धनमादिविष्णोः ।
संप्रीणनाय सुरभाग्यविवृद्धये च
विष्णोः पदं विधिवदापुरनन्तसौख्यम् ॥

**Colophon:**

इति श्रीभविष्योत्तरपुराणे बिन्दुद्वादशीव्रतकल्पस्संपूर्णः ॥

---

No. 8388. बिन्दुद्वादशीव्रतकल्पः.
BINDUDVĀDAŚĪVRATAKALPAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 166*a* of the MS. described under No. 7758, and not on 165*b* as shown therein.

Incomplete.

Same as the above.

No. 8389. बिन्दुद्वादशीव्रतोद्यापनकल्पः.

BINDUDVĀDAŚĪVRATODYĀPANAKALPAH.

Substance, palm-leaf. Size, 13⅜ × 1¼ inches. Pages, 26. Lines, 5 on a page. Character, Telugu. Condition, fair. Appearance, old.

Complete. From Skandapurāṇa.

On the manner of completing the Bindudvādaśīvrata *referred* to above.

**Beginning**:

पूर्वोक्तएवङ्गुणविशेषणविशिष्टायां शुभतिथौ. . . . . . . भविष्योत्तरपुराणोक्तबिन्दुद्वादशीव्रतोद्यापनकल्पोक्तसम्पूर्णफलावाप्त्यर्थं. . . . . . . बिन्दुद्वादशीव्रतोद्यापनाख्ये कर्मणि आचार्यं त्वामहं वृणे । . . . . . . . . . . . . . . .

पूजाविधानं सम्पूर्णम् ॥

सूत उवाच—

श्रृण्वन्तु मुनयस्सर्वे बिन्दोश्च द्वादशीव्रतम् ।
तद्व्रतं पुत्रलाभाय त्रिभिः कार्यं प्रयत्नतः ॥

**End**:

विष्णुसायुज्यमाप्नोति लोकान् कीर्तिप्रदायकान् ॥

**Colophon**:

इति श्रीस्कन्दपुराणे सौभाग्यखण्डे बिन्दुद्वादशीव्रतोद्यापनकल्पस्सम्पूर्णः ॥

---

No. 8390. बिल्वपत्रव्रतोद्यापनम्.

BILVAPATRAVRATODYĀPANAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 134*a* of the MS. described under No. 7758.

Complete. From Liṅgapurāṇa.

This Vrata consists in the worship of Śiva on the eighth day of the bright fortnight, on the full-moon day, on the new-moon day and on the fourteenth day of the dark fortnight in the month of Śrāvaṇa or Kārtika. This Vrata is considered to enable one to get rid of sins. A hundred thousand Bilva leaves are to be used in the worship.

**Beginning:**

कैलासशिखरे रम्ये नानामुनिगणैस्सह ।
रत्नसिंहासने चारु सुखासीनस्सहोमया ॥

पार्वत्युवाच—

हे देव सर्वलोकेश लोकानां हितकारक ।
संशयं परिपृच्छामि बिल्वपत्रफलं वद ॥

ईश्वर उवाच—

श्रृणु देवि प्रवक्ष्यामि देवतामुनिभिस्सह ।
बिल्वपत्रफलं सम्यग्वक्ष्यामि श्रृणु विस्तरात् ॥
श्रावण्यां कार्तिके यस्तु बिल्वा[मा](नि नि)य तश्शुचिः ।
समर्पयेल्लक्षसङ्ख्यां शिवसायुज्यमाप्नुयात् ॥
अष्टम्यां (वा) पौर्णमास्या[या]ममायाञ्च चतुर्दशीम् ।
समाप्य तद्व्रतं सर्वं कुर्यादुद्यापनन्ततः ॥

**End:**

यद्व्रतं कारयेद्धीमान् श्रावयेदवलोकिता ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

**Colophon:**

इति श्रीलिङ्गपुराणे शिवरहस्ये उमामहेश्वरसंवादे बिल्वपत्रव्रतोद्यापनं संपूर्णम् ॥

No. 8391. बुधाष्टमीव्रतकल्पः.
BUDHĀṢṬAMĪVRATAKALPAḤ

Pages, 8. Lines, 5 on a page.

Begins on fol. 28*b* of the MS. described under No. 5773 and not on 28*a* as shown therein.

Complete.

This Vrata consists in the worship of the planet **Mercury** when the eighth day of a bright fortnight falls on a **Wednesday**. This is considered to have the power of removing sins.

**Beginning:**

पार्वत्युवाच—

कैलासशिखरे रम्ये पार्वतीपरमेश्वरौ ।
ब्रह्मा विष्णुश्च सहिता इन्द्राग्नियमनैरृताः ॥

* * * *

बुधाष्टमीव्रतं भूयो ब्रवीमि श्रृणु पाण्डव ।
येन चीर्णेन नरकं न पश्यन्ति नराः कचित् ॥
पुरा कृतयुगस्यादौ वीरो राजा बभूव ह ।
बहुभृत्यसुहृन्मित्रैः मन्त्रिभिः परिवारितः ॥
जगाम हिमवत्पार्श्वं महादेवेन पालितम् ।
यस्तु प्रविश्य(श)ते भूमिं स स्त्री भवति निश्चितम् ॥

* * * *

यदा यदा सिताष्टम्यां बुधवारो भवेत् कचित् ।
तदा तदा हि सा स्नाता एकभक्तिपरोऽपि सन् ।
स्नात्वा नद्यान्तु पूर्वाह्णे गृहीत्वा कलशं नवम् ॥

**End:**

हिरण्मयं सपकान्नं वस्त्राच्छादनसंयुतम् ।
बुधन्ददाति विप्राय विष्णुलोकं स गच्छति ॥

**Colophon:**

बुधाष्टमीकल्पं सम्पूर्णम् ॥

No. 8392. बुधाष्टमीव्रतकल्पः.

BUDHĀṢṬAMĪVRATAKALPAḤ.

Pages, 14. Lines, 5 on a page.

Begins on fol. 52b of the MS. described under No. 8179.

Complete, except that certain leaves are lost.

Similar to the above. From Bhaviṣyōttarapurāṇa.

**Beginning:**

अखण्डा चाष्टमी शुक्ला बुधवारेण संयुता ।
बुधाष्टमीति सा प्रोक्ता चार्यदोषापहारिणी ॥
वरदाभयहस्तं च शङ्खचक्रधरं बुधम् ।
विष्णुमूर्तिं गदाधीशं ध्यायेत् कुम्भोपरि स्थितम् ॥ ध्यानम् ॥
रौहिणेयं महाशान्तं भुक्तिमुक्तिप्रदायकम् ।
सर्वलोकप्रियं सौम्यं बुधमावाहयाम्यहम् ॥ आवाहनम् ॥

श्रृणु पाण्डव यत्नेन बुधाष्टम्या व्रतं शुभम् ।
यदा तदा तथाष्टम्यां बुधवारोऽभिजायते ॥
अखण्डा चाष्टमी शुक्ला बुधवारेण संयुता ।

**End:**

गोघ्नश्चैव कृतघ्नश्च भ्रूणहा गुरुतल्पगः ।
मुच्यते सर्वपापेभ्यः सौम्यलोकं स गच्छति ॥

**Colophon:**

इति श्रीभविष्योत्तरपुराणे बुधाष्टमीव्रतं संपूर्णम् ॥

---

No. 8393. बुधाष्टमीव्रतोद्यापनम्.

BUDHĀṢṬAMĪVRATŌDYĀPANAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 59b of the MS. described under No. 8179.

Complete. From Viṣṇupurāṇa.

On the manner of completing the Budhāṣṭamīvrata mentioned above.

**Beginning :**

उद्यापनविधिं वक्ष्ये व्रतसंपूर्णकारणम् ।
एवं बुधाष्टमीं कृत्वा कुर्यादुद्यापनं बुधः ॥
द्विजैराचार्ययुक्तेन कृतैर्योगं च कारयेत् (?) ॥
ततश्चाग्निं समभ्यर्च्य स्थण्डिले गन्धपुष्पकैः ॥

**End :**

मृतोऽपि स्वयमाप्नोति व्रति(ती)च मनुजस्तथा ॥
एवमेषा मया प्रोक्ता प्रगुह्या सा बुधाष्टमी ।
यत् कृतो(त्वा) मोक्षमाप्नोति सर्वपापैः प्रमुच्यते ॥

**Colophon :**

इति श्रीविष्णुपुराणे बुधाष्टम्युद्यापनं संपूर्णम् ॥

---

No. 8394. बुधाष्टमीव्रतोद्यापनम्.

BUDHĀṢṬAMĪVRATŌDYĀPANAM.

**Page, 1.** Lines, 8 on a page.

Begins on fol. 66 of the MS. described under No. 8233

Incomplete.

Similar to the above.

**Beginning :**

युधिष्ठिर उवाच—
बुधाष्टमीव्रतस्यास्य विधानं कथितन्त्वया ।
उद्यापनविधिं ब्रूहि व्रतसंपूर्तिकारणम् ॥
श्रीकृष्ण उवाच —
उद्यापनविधिं वक्ष्ये व्रतस्यास्य विधानतः ।
शुक्लपक्षेऽष्टमीसौम्यवारे नियतमानसः ॥
उद्यापनं व्रता कुर्यादधिवासरपूर्वकम् ।

**End :**

आचार्यं वरयेत्पश्चादृत्विजो वसुसङ्ख्यया ।
सायाह्नकाले संप्राप्ते स्वस्तिवाचनपूर्वकम् ॥
मण्डलं सर्वतोभद्रं . . . . . ।

## No. 8395. बुधाष्टमीव्रतोद्यापनम्.
## BUDHĀṢṬAMĪVRATODYĀPANAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 29b of the MS. described under No. 5773, wherein this has not been shown as a separate work.

Incomplete.

Similar to the above.

**Beginning:**

एवङ्गुण— तिथौ मम इह जन्मनि जन्मान्तरेषु मनोवाक्कायकर्मभिः ज्ञानाज्ञानकृततद्दोषपरिहारार्थम् . . . . . . . . . बुधदेवतामुद्दिश्य बुधदेवताप्रीत्यर्थं ममाचरितबुधाष्टमीव्रतसाद्गुण्यार्थं बुधाष्टमीव्रतोद्यापनसाद्गुण्यार्थमादौ पुण्याहवाचनं करिष्ये ।

**End:**

पञ्चामृतेन प्रतिमाशोधनम् अष्टकलशान् अष्टदिक्षु कलशान् प्रतिष्ठाप्य ।

---

## No. 8396. बृहतीगौरीव्रतम्.
## BṚHATĪGAURĪVRATAM.

Pages, 5. Lines, 8 on a page.

Begins on fol. 122a of the MS. described under No. 7758.

Complete. From Skandapurāṇa.

This Vrata consists in the worship of Gaurī imagined as being present at the root of the Bṛhatī tree (the egg-plant); and the worship is conducted on the third day of the dark fortnight in the month of Bhādrapada. The observance of this Vrata is considered to have the power of cleansing one of all sins.

**Beginning:**

हिमालयसुतां देवीं जगन्मातरमम्बिकाम् ।
ध्यायेऽहं सर्वदा गौरीं सर्वमङ्गलदायिनीम् ॥ ध्यानम् ।
भवानीं गिरिजां देवीं सर्वसंपत्प्रदायिनीम् ।
शुभदां सर्वदां नृणां गौरीमावाहयाम्यहम् ॥ आवाहनम् ।

त्रिशूलधारिणी देवि कल्याणी मङ्गलप्रदे ।
सर्वसौभाग्यजननि गृह्यतामासनं शुभम् ॥ आसनम् ।
* * * *
मासि भाद्रपदे कृष्णे तृतीयायां विधूदये ।
बृहतीवृक्षमूलस्थे प्रसीद वरदा भव ॥ प्रार्थना ।
ब्राह्मणपूजा सुवासिनीपूजा ।

इति पूजाविधिः ।

आसीत् पुरा कृतस्यान्ते विजतो(यो) नाम वै द्विजः ।
तस्य कन्या सुभद्रेति पतिवाक्यहिते रता ॥
भर्तुरायुष्यवृद्ध्यर्थं पप्रच्छ पितरं तदा ।
पुत्रायुस्सुखसौभाग्यं भविष्यति कथं मम ॥

विजय उवाच—

अथान्यद्बृहतीगौरीव्रतं वक्ष्यामि कन्यके ।
मासि भाद्रपदे कृष्णे तृतीयायाञ्च तद्व्रतम् ।
आनयेत् बृहतीवृक्षशाखामूलं फलैस्समम् ॥

**End:**

एतद्व्रतप्रभावेण काचिद्ब्राह्मणकन्यका ।
पतिमुज्जीवयामास निर्जित्य यमकिंकरान् ॥
तस्माच्चरथ(ध्वं) व्रतमेतदेवमायुःप्रदं सर्वसमृद्धिदं च ।
पुत्रैर्धनैश्चापि महेश्च नित्यं भविष्यदानन्दसमृद्धियुक्तम् ॥

**Colophon:**

इति श्रीस्कन्दपुराणे व्यासकुन्तीसंवादे बृहद्गौरीव्रतं संपूर्णम् ॥

---

No. 6397. बृहत्युमाव्रतम्.

BṚHATYUMĀVRATAM.

Page, 1. Lines, 4 on a page.

**Begins on fol. 134a of the MS. described under No. 3055. Wants beginning. From Bhaviṣyōttarapurāṇa. Similar to the above.**

**Beginning:**

घोपरि खित्वा कुचित्रो(कुपितो) ब्राह्मणस्तदा ।
सा तन्दृष्ट्वा च रजकी क्रुद्धा नोक्ता किमप्यथ ॥
उच्छिष्टोदकमादाय तस्योपरि अवाकिरत् ।
अर्धरात्रे कृतं किंचित् किंचित्पुण्यतरं त्वया ॥

* * * *

निषिच्यास्य प्रभावेण बृहत्यास्त्र्यादुमाव्रतात् ।
तेनोदकेन भाम्याऽहं व्रतस्यास्य प्रभावतः ॥

**End:**

पतिना सह सर्वासां भुक्त्वा भोगान्मनोरमान् ।
अन्ते मोक्षमवाप्नोति गौरीशस्य प्रभावतः ॥

**Colophon:**

इति भविष्योत्तरपुराणे उमामहेश्वरव्रते बृहत्युमाव्रतकल्पं सम्पूर्णम् ॥

---

## No. 8398. भक्तेश्वरव्रतकल्पः.
## BHAKTEŚVARAVRATAKALPAḤ.

Substance, palm-leaf. Size, 13 × 1½ inches. Pages, 18. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete. From Bhaviṣyōttarapurāṇa.

This Vrata consists in the worship of Śiva on the full moon day in the month of Karttika; and it is considered to have the power of bestowing long life and health and of removing barrenness.

**Beginning:**

शुभतिथौ भक्तेश्वरव्रतं करिष्ये—कलशपूजा, गणपतिपूजा, प्राणप्रतिष्ठा ।

ज्येष्ठं श्रेष्ठं ततो रुद्रं कालकण्ठमुमापतिम् ।
बलाबलसमथनं भूतघ्नं च मनोहरम् ॥

* * * *

इति पूजाविधिः ॥

कथा—

सूत सूत महाप्राज्ञ पुराणार्णवपारग ।
त्वत्तश्श्रुतान्यशेषाणि व्रतानि सुबहूनि च ॥

* * * *

रहस्यव्रतमाचक्ष्व आयुरारोग्यवर्धनम् ।
पुत्रप्रदं विशेषेण वन्ध्यात्वादिविमोचनम् ॥

* * * *

शरत्काले तु कार्त्तिक्यां पौर्णम्यां विधिपूर्वकम् ।
प्रातस्स्नात्वा तु विधिवत् चित्रवस्त्रं तु धारयेत् ॥
हरिद्रालेपनं कृत्वा कुङ्कुमं कज्जलं तथा ।

* * * *

तत्र संपूजयेद्देवं शाम्भवं भुवनेश्वरि ।
भक्त्या संपूजितो येन तेन भक्तेश्वरस्स्मृतः ॥

**End:**

सर्वेभ्य ऋषिपत्नीभ्यः कारयामासुरीश्वरम् ।
तदाप्रभृति लोकेऽस्मिन्प्रसिद्धमभवत्क्षितौ ॥

**Colophon:**

इति श्रीभविष्योत्तरपुराणे उमामहेश्वरसंवादे भक्तेश्वरव्रतकल्पस्सम्पूर्णः ॥

---

## No. 8399. भीष्मपञ्चकव्रतकल्पः.
## BHĪṢMAPAÑCAKAVRATAKALPAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 1.9*b* of the MS. described under No. 7758.

Complete.

This Vrata consists in the worship of Viṣṇu for five days, commencing from the eleventh day of the bright fortnight in the month of Kārttika. This is considered to have the power of cleansing one of all sins.

**Beginning:**

नारद उवाच—

यदेतदखिलं प्रोक्तं व्रतानामुत्तमं व्रतम् ।
कर्तव्यं कार्तिके मासे प्रयत्नाद्भीष्मपञ्चकम् ॥
विधानं तस्य विस्पष्टं फलञ्च सुरसत्तम ।
कथयस्व मयि प्रीत्या मुनीनां हितकाम्यया ॥

* * * *

अतो व्रतं प्रयत्नेन कर्तव्यं भीष्मपञ्चकम् ।
कार्त्तिकस्यामले पक्षे स्नात्वा सम्यग्यतव्रतः ॥
एकादश्यान्तु गृहिणी व्रतं पञ्चदिनात्मकम् ।
प्रातः स्नात्वा विधानेन मध्याह्ने च यथा व्रती ॥

**End:**

एवं समाचरेत्सम्यक् यथोक्तं व्रतमुत्तमम् ।
सर्वपापहरं पुण्यं व्रतख्यातं भीष्मपञ्चकम् ॥
जन्मप्रभृति यत्पापं त्यक्त्वा पुण्यमवाप्नुयात् ।
तत्फलं समवाप्नोति कृत्वैकं भीष्मपञ्चकम् ॥

**Colophon:**

इति भीष्मपञ्चकम् ॥

---

## No. 8400. मङ्गलगौरीव्रतम्.
## MAṄGALAGAURĪVRATAM.

Pages, 8. Lines, 7 on a page.

Begins on fol. 187*a* of the MS. described under No. 7758.

Complete. From Bhaviṣyottarapurāṇa

This Vrata consists in worshipping a golden image of Gaurī on the first Tuesday in the month of Śrāvaṇa and in subsequently presenting it to a Brahman together with fruits and money. This Vrata is considered to have the power of saving one from widowhood and of enabling her to beget good sons,

**Beginning:**

एवङ्गुणविशेषणविशिष्टायां तिथौ मम सौमङ्गल्याभिवृद्ध्यर्थं मङ्गल-गौरीदेवताप्रीत्यर्थं भविष्योत्तरपुराणोक्तप्रकारेण यथासंभवद्रव्यैर्यथासंभव-नियमेन यावच्छक्त्यध्यानावाहनादिषोडशोपचारपूजां करिष्ये ।

* * * *

श्रावणे मासि यो जातः प्रथमो भौमवासरः ।
तद्दिने नियमः कार्यो दन्तधावनपूर्वकम् ॥
स्नात्वा माङ्गल्यतैलेन शुचिर्भूत्वा समाचरेत् ।
सौवर्णीं प्रतिमाङ्कृत्वा मङ्गलागौरिसंज्ञिकाम् ॥
दत्वा फलानि द्वात्रिंशदर्थं विप्राय षोडश ।

**End:**

मात्रा दत्तं व्रतं मह्यां मङ्गलागौरिसंज्ञितम् ।
सापि चक्रे व्रतं तच्च ततो विस्तावयन्(व्यस्तम्भयत्) जगत् ॥
ये शृण्वन्ति व्रतन्देव्याः कथां भक्त्या प्रयत्नतः ।
अवैधव्यं सपुत्रत्वमिहामुत्र च लभ्यते ॥

**Colophon:**

इति श्रीभविष्योत्तरपुराणे स्कन्दनन्दिसंवादे मङ्गलगौरीव्रतं सम्पूर्णम् ॥

---

### No. 8401. मथनद्वादशीव्रतम्.
### MATHANADVĀDAŚĪVRATAM.

Pages, 2. Lines, 4 on a page.

Begins on fol. 137*a* of the MS. described under No. 3055.

Complete. From Skāndapurāṇa.

This Vrata consists in the worship of Viṣṇu on the twelfth day of the bright fortnight in the month of Kārttika, the previous day being observed as a fasting day. This Vrata is considered to have the power of bestowing prosperity.

**Beginning:**

सूत उवाच—

क्षीराब्धेरुत्थिते देवे लक्ष्मीशे द्वादशीव्रतम् ।
कुर्यात्कार्त्तिकमासे तु सर्वसौभाग्यसिद्धये ॥
एकादश्यां निराहारं स्थित्वा स्नात्वार्चयेद्धरिम् ।
दीपाराधनपूर्वन्तु कुर्याज्जागरणं द्विजाः ॥
पुराणश्रवणेनैव नृत्तगीतार्चनादिभिः ।
द्वादश्यां प्रातरुत्थाय स्नात्वानुष्ठाय चाह्निकम् ॥

**End:**

चातुर्मास्यव्रतं सर्वं कृत्वा यत्फलमाप्नुयात् ।
तत्फलं लभते योषित्सत्यं सत्यं वदाम्यहम् ॥

**Colophon:**

इति श्रीस्कान्दपुराणे चिलुक(मथन)द्वादशीव्रतं सम्पूर्णम् ॥

वायनदानमन्त्रः—

श्रीकृष्णः प्रतिगृह्णाति श्रीकृष्णो वै ददाति च ।
श्रीकृष्णस्तारको द्वाभ्यां श्रीकृष्णाय नमो नमः ॥

---

## No. 8402. मथनद्वादशीव्रतकल्पः.

## MATHANADVĀDAŚĪVRATAKALPAḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 11*a* of the MS. described under No. 5765, wherein this is shown as Cilukudvādaśīvrata among the other works.

Complete.

Similar to the above.

**Beginning:**

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ मम समस्तपापक्षयार्थं . . . . . . . . . . . . मथनद्वादशीव्रतोद्यापनं करिष्ये ततः कलशपूजां कुर्यात् ।

ध्यानम्—

चतुर्भुजं महाकायं सुरद्विपसमप्रभम् ।
शङ्खचक्रगदापद्मरमागरुडशोभितम् ॥
सेवितं मुनिभिर्दिव्यैः यक्षगन्धर्वकिन्नरैः ।
एवंविधं हरिं ध्यात्वा पूजाङ्कुर्याद्यथाविधि ॥

आवाहनम् ।

* * * *

कृष्णाय यादवेन्द्राय ज्ञानमुद्राय योगिने ।
नाथाय धर्मकोशाय नमो वेदान्तयोगिने ॥

नमस्कारः । द्वादशार्घ्यम । इति पूजाविधानं सम्पूर्णम् ॥

ऋषय ऊचुः—

केन वेदं व्रतं चीर्णं मर्त्यलोके प्रसिध्यति ।
एतत्समस्तं विस्तार्य व्रतं ब्रूहि महामुने ॥

**End:**

अश्वमेधादिकं पुण्यं सम्प्राप्नोति न संशयः ।
विष्णुसायुज्यमाप्नोति लोकान्कीर्तिंप्रदापयेत्(यकान्) ॥

**Colophon:**

इति स्कान्दे पुराणे सौभाग्यकाण्डे बोध(मथ)नद्वादशीव्रतकल्पं स
म्पूर्णम् ॥

---

No. 8403. मथनद्वादशीव्रतकल्पः.

MATHANADVĀDAŚĪVRATAKALPAḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 42*a* of the MS. described under No. 8197.

Complete.

Similar to the above.

**Beginning:**

कुन्त्युवाच—

भगवन् सर्वलोकज्ञ सर्वभूतहिते रत ।
वेदशास्त्रार्थतत्त्वज्ञ वेदव्यास महामुने ॥

* * * *

धर्मार्थकाममोक्षार्थं व्रतं ब्रूहि महामुने ॥

व्यास उवाच—

श्रृणु देवि फलैश्चैव चिलुकु(मथन)द्वादशीव्रतम् ।

सर्वपापहरं पुण्यं सर्वकामफलप्रदम् ॥

गोसहस्रेण यत्पुण्यं तत्पुण्यं द्वादशीव्रतात् ॥

* * * *

आश्विने शुक्लपक्षे च दशम्यामेकभुज्य च ।

एकादश्यामुपोष्याथ द्वादश्यां पूजयेत्ततः ॥

**End:**

अरुन्धती वैष्णवी तु लक्ष्मीः पद्मावती सती ।

पार्वती रुक्मिणी सत्यभामा कात्यायनी तथा ॥

अमरादिस्त्रियस्सर्वाः व्रताचरितवैभवाः ।

विष्णुसायुज्यमाप्नोति लोकान् कीर्तिप्रदायकान् ॥

**Colophon:**

इति स्कान्दपुराणे व्यासकुन्तीसंवादे चिलुकु(मथन)द्वादशीव्रतकल्पं सम्पूर्णम् ॥

---

## No. 8404. मथनद्वादशीव्रतोद्यापनम्.

## MATHANADVĀDAŚĪVRATŌDYĀPANAM.

Pages, 9. Lines, 4 on a page.

Begins on fol. 22a of the MS. described under No. 8196.

Complete.

On the manner of completing the Mathanadvādaśīvrata mentioned above.

**Beginning:**

एवंगुणविशेषणविशिष्टायां शुभतिथौ मम चिलुकु(मथन)द्वादशीव्रतोद्यापनसाद्गुण्यार्थं . . . . . . . क्षीराब्धिशयनश्रीलक्ष्मी-

नारायणप्रीत्यर्थं पञ्चवर्षसाध्यचिल्लकुद्वादशीव्रतोद्यापनाङ्गं . . . .

. . . . षोडशोपचारान्पूजयेत् ।

क्षीराब्धिशयनं देवं योगनिद्रात्यजं विभुम् ।

विलोकमानं पद्मावास्सस्मितं मुखपङ्कजम् ॥

गोक्षीराभं पुण्डरीकायताक्षं चक्राब्जाद्यैर्भूषणैर्भूषिताङ्गम् ।

श्रीभूमिभ्यामर्चिते योगपीठे सुस्थं देवं पूजयेत्पौरुषेण ॥ ध्यानम् ॥

**End:**

फलपुष्पाक्षतैर्युक्तं सर्वपापक्षयाय च ।

अर्घ्यन्तेऽहं प्रदास्यामि पुराण पुरुषोत्तम ।

यस्य स्मृत्या च . . . . . . ॥

**Colophon:**

व्रतं सम्पूर्णमस्तु ॥

---

## No. 8405. महागणपतिव्रतोद्यापनम्.

## MAHĀGAṆAPATIVRATŌDYĀPANAM.

Pages, 16. Lines, 6 on a page.

Begins on fol. 41*a* of the MS. described under No. 8166.

Complete.

This consists in the worship of Gaṇapati on the fourth day of the bright fortnight. The observance of this Vrata is considered to have the power to enable one to realise one's objects.

**Beginning:**

अर्घ्यमन्त्रः—

शुक्लपक्षचतुर्थ्यां वै उपोक्ष(ष्य)हरसूनवे ।

अर्घ्यं सम्प्रददे तुभ्यमुमापुत्र नमोऽस्तु ते ॥

इदमर्घ्यम् । इदमर्घ्यम् ।

सुवासिनीनां सुभगे सर्वसिद्धिप्रदायिनि ।

गणेशवामभागोरुसंस्थितायै ददाम्यहम् ॥

विघ्नेशपत्न्यै नमः ।

गणपतिव्रतोद्यापनम्—

शुक्लचतुर्थ्यां महागणपतिव्रतोद्यापनं व्याख्यास्यामः ।

अनुज्ञां कृत्वा सङ्कल्प्य विघ्नेश्वरपूजां कृत्वा पुण्याहं वाचयित्वा महागणपतिव्रतोद्यापनं करिष्ये । आचार्यवरणम्, ऋत्विग्वरणं कुर्यात् । मध्यकुम्भे लक्ष्मीसहितमहागणपतिपूजार्थमाचार्यं त्वां वृणे ।

**End:**

तत आचार्याय प्रतिमादानं कुर्यात् । ऋत्विक्पूजां कृत्वा विघ्नेश्वरप्रतिमादानं कृत्वा दश दानानि मनसोद्दिष्टदानानि कृत्वा ततो ब्राह्मणान् भोजयित्वाशिषो वाचयित्वा गणपतिप्रसादात्सर्वान् कामानवाप्नोतीत्याह भगवान् बोधायनः ॥

---

No. 8406. महातिलदीपव्रतकल्पः.

MAHĀTILADĪPAVRATAKALPAḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 56*a* of the MS. described under No. 3055.

Complete.

This consists in the worship of Śiva on the Makara-saṅkrānti day, the chief feature of the worship being the lighting of a lamp with the help of sesamum and cow's ghee. This is considered to have the power of bestowing prosperity.

**Beginning:**

एवं दीपविधिः प्रोक्तः अशेषमधुना शृणु ।
अष्टोत्तरशतं प्रस्थं समाहृत्य घृतं गवाम् ॥
कृत्वा पात्रत्रयं रम्यं ब्रह्मविष्णुशिवात्मकम् ।
एकादशाढकेनैव पूरयेन्मध्यपात्रके ॥

* * * *

सङ्क्रान्तौ मकरे पुण्ये कालमर्धोदयेऽपि वा ।
स्नात्वा नद्यां शुचिर्भूत्वा स्वस्तिवाचनपूर्वकम् ॥

नवाढकाख्यं गव्याज्यं देवदेवस्य सन्निधौ ।
स्नाप्य पश्चामृतैर्देवं षोडशैरुपचारकैः ॥
महोपचारं कुर्वीत भक्त्या देवं प्रपूजयेत् ।
पलैस्तु नवभिर्वर्ति कृत्वा देवस्यसन्निधौ ॥
शालिभिर्वाज्यपात्रे तु तिलैः प्रस्थैकमानुषैः(नकैः) ।

**End:**

जन्मन्येकं कुलश्चापि कुलं तारयते बुधः ।
एवं व्रतं यः कुरुते स कुलीनस्स बुद्धिमान् ॥
स एव धन्यस्स कृतार्थ एव पितॄन्समस्तान्नरकादिमुक्तान् ।
स्वयंच सद्यः कुलजांश्च तासामुद्धृत्य लोके शिवसन्निधिस्थः ॥

**Colophon:**

इतिहासोत्तमे उमामहेश्वरसंवादे महातिलदीपव्रतकल्पं सम्पूर्णम् ॥

---

No. 8407. महादीपव्रतकल्पः.

MAHĀDĪPAVRATAKALPAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 61a of the MS. described under No. 3055.

Complete.

This consists in the lighting of a big lamp fed with ghee and in worshipping Śiva on the Makara-saṅkrānti day. This is considered to have the power to bestow prosperity.

**Beginning:**

कैलासशिखरे रम्ये समासीनं जगद्गुरुम् ।
सर्वज्ञं सगणं गौरीसखीजनसमावृतम् ॥
प्रणम्योवाच मनसा शिवभक्तिरता सती ।
महादीपव्रतं पुण्यं त्रिषु लोकेषु विश्रुतम् ॥
तद्व्रतं ब्रूहि मे देव सर्वलोकहितं शुभम् ।
पुत्रपौत्रप्रदं स्त्रीणां सर्वसम्पत्करं शुभम् ॥

व्रतानामुत्तमन्देव महादीपव्रतोच्यते (तं यत): ।
यदा सङ्क्रमते भानुर्मकरञ्चोत्तरायणे ॥
तदा प्रातः शुचिर्भूत्वा वस्त्रालङ्कारसंयुतम् ।
नृत्तगीतादिसहितं प्रविशेच्छिवमन्दिरम् ॥

**End:**

एवं यः कुरुते सम्यक् नारी वा पुरुषोऽपि वा ।
इह भुक्त्वाखिलान् भोगानन्ते मम पुरं व्रजेत् ॥

**Colophon:**

इतिहासोत्तमे महादीपव्रतकल्पस्सम्पूर्णः ॥

---

No. 8403. महादीपव्रतकल्पः.

MAHĀDĪPAVRATAKALPAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 55*a* of the MS. described under No. 3055.

Complete.

Similar to the above.

**Beginning:**

ब्रह्मोवाच—

देवदेवेश सर्वात्मन् सर्वलोकैकनायक ।
इदानीं श्रोतुमिच्छामि महादीपव्रतक्रमम् ॥

ईश्वरः—

साधु साधु महाप्राज्ञ यत्त्वयं परिचोदितम् ।
तत्सर्वं दुर्लभं वक्ष्ये शृणुष्व कमलासन ॥
महादीपव्रतं पुण्यं महापातकनाशनम् ।
कार्त्तिके माघमासे वा पूर्णिमायां विशेषतः ॥
मकरे विषुसंक्रान्तौ महादीपं प्रशस्यते ।
प्रासादपूर्वदिग्भागे गोमयेन विलेपयेत् ॥

**End:**

वर्धनं पुत्रपौत्रेभ्यो (त्राणां) धनधान्यप्रवर्धनम् ।
इह भुक्त्वाखिलान् भोगानन्ते शिवपुरं व्रजेत् ॥

**Colophon:**

इति श्रीकामिकातन्त्रे महादीपविधिः ॥

---

## No. 8409. महानवमीव्रतपूजा.

## MAHĀNAVAMĪVRATAPŪJĀ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 85*a* of the MS. described under No. 8171.

Incomplete.

This Vrata consists in the worship of Sarasvatī, the goddess of learning, on the 9th day of the bright fortnight in the month of Āśvina, and is considered to have the power of bestowing all prosperity.

**Beginning:**

अथो वदामि वाग्देव्याः पूजां सर्वसमृद्धिदाम् ।
सर्वदा पूजयेद्देवीं भारतीं सर्वमातरम् ॥

महानवम्यां प्रायाश्च (सायां) पूजां कुर्वन्तु यत्नतः ।
प्राप्ते च मास्याश्वयुजे शुक्लपक्षे समुद्भवा ॥

या तिथिर्नवमी सद्भिस्सा महानवमी स्मृता ।
उषस्युत्थाय सङ्कल्पमाचरेत्तत्तिथौ सुधीः ॥

**End:**

प्र णो देवीति मन्त्रेण देवीं नीराजयेत् बुधः ।

सम्भूषपादपङ्कजं लसत्कीरीटकोटिभिः
नमस्कृतां सुरासुरैर्नमामि भारतीमिमाम् ॥ नीराजनम् ।

## No. 8410. महालक्ष्मीव्रतकल्पः.

## MAHĀLAKṢMĪVRATAKALPAḤ.

Pages, 18. Lines, 5 on a page.

Begins on fol. 36*a* of the MS. described under No. 8233.

Complete. From Bhaviṣyōttarapurāṇa.

This Vrata consists in the worship of Mahālakṣmī on the eighth day of the bright fortnight in the month of Bhādrapada, and is considered to have the power of bestowing all prosperity, and of enabling one to realise all one's desires and to beget children.

**Beginning:**

युधिष्ठिर उवाच—

स्वस्थानलाभयुक्तायुस्सवर्श्वयसुखप्रदम् ।

व्रतं यत्तत्समाचक्ष्व विचार्य पुरुषोत्तम ॥

श्रीकृष्ण उवाच—

दुर्वारवृत्तदैतेयपरिव्याप्ते त्रिविष्टपे ।

एतदेव कृतस्यादौ देवेन्द्रः प्राह नारद(म्) ॥

तस्य[द]श्रुत्वा ततो वाच्यं (कथं) स मुनिः प्रत्यभाषत ।

* * * *

व्रतमेतन्महालक्ष्म्यास्तस्यास्सर्वफलप्रदम् ।

आकर्णय विधिन्तस्य लभ्यमानं महावटो ॥

भाद्रे मासि सिताष्टम्यामारम्भोऽस्य विधीयते ।

प्रातः षोडशकृत्वस्तु प्रक्षाल्याङ्घ्री करौ तथा ॥

**End:**

व्रतमिदमथ चक्रे नारदेनोपदिष्टं

सुरपतिरपि यस्मात् वाञ्छितार्थं च लेभे ।

त्वमपि कुरु तदेतत् धर्मसूनो यथा स्यात्

अभिमतफलसिद्धिः पुत्रपौत्राभिवृद्धिः ॥

**Colophon:**

इति भविष्योत्तरपुराणे महालक्ष्मीव्रतकल्पस्सम्पूर्णः ॥

## No. 8411. महावर्तिव्रतकल्पः.
## MAHĀVARTIVRATAKALPAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 53a of the MS. described under No. 3055.

Complete. From Matsyapurāṇa.

This Vrata consists in the worship of Śiva as soon as the sun enters the sign Capricornus. A lamp containing three Kuḍuvas of ghee, prepared from cow's milk, and lit with a stout wick weighing three Palas should be used at the time of the worship. This Vrata is considered to have the power of bestowing all prosperity.

**Beginning:**

श्रीकृष्ण उवाच—

कैलासशिखरारूढं देवदेवमुपस्थितम् ।
पार्वती परिपप्रच्छ सखीभिः पर्युवाच (पास्य) सा ॥

* * * *

धनुस्सन्त्यज्य मकरं याते सति दिवाकरे ।
तदा कुर्यात्प्रयत्नेन सौभाग्यफलकाङ्क्षया ॥
संस्थाप्य मृन्मयं पात्रं मत्पुरस्तात्समर्पयेत् ।
विप्रं नियोज्य पूजार्थमाचार्यं वेदपारगम् ॥
कुडुबत्रयमानेन गवाज्येन सुशोभितम् ।
दीपं प्रज्वलितं कृत्वा स्थूलवर्तिं त्रिभिः पलैः ॥

**End:**

(तस्मात्सर्वत्र) यत्नेन व्रतं सौभाग्यदायकम् ।
कर्तव्यं धर्मपत्नीभिरित्थं वै पाण्डुनन्दन ॥
अस्मिन् व्रते समावृत्ते भवन्तश्चिरजीविनः ।
भूत्वा . . . . . . पालयत्यखिलां महीन् ॥

**Colophon:**

इति श्रीमत्स्यपुराणे महावर्तिकल्पं सम्पूर्णम् ॥

## No. 8412. मार्गशिरलक्ष्मीव्रतकल्पः.
## MĀRGAŚIRALAKṢMĪVRATAKALPAḤ

Pages, 14. Lines, 16 on a page.

Begins on fol. 15b of the MS. described under No. 3846.

Complete. From Brahmāṇḍapurāṇa.

This Vrata consists in the worship of Mahālakṣmī on all Thursdays in the month of Mārgaśira; and it is considered to have the power of enabling one to realise one's object.

**Beginning:**

या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गम्भीरावर्तनाभिः स्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैस्स्नापिता हेमकुम्भै-
र्नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥

ध्यानम् । आवाहयामि ।

* * * *

शृणु हन्त प्रवक्ष्यामि व्रतं पुत्रप्रदं शुभम् ॥
मार्गशीर्षे महालक्ष्म्यास्सर्वकामप्रदं व्रतम् ।
सर्वेषामेव मासानां श्रेष्ठो मार्गशिरस्तथा ॥
तस्मिन्सन्ति गुरोर्यानि वाराणि सकलानि तु ।
तेषु पूजा प्रकर्तव्या लक्ष्म्यास्सम्पत्समृद्धये ॥

**End:**

एतद्व्रतस्य माहात्म्यं सर्वकामफलप्रदम् ॥
त्वन्तु कुन्ति महाभागे कुरु शीघ्रं व्रतोत्तमम् ।
एवमुक्ता तु कृष्णेन परव्रतकमुत्तमम् ॥
धर्मादिपुत्रकान् प्राप्य हन्त प्राप्य महारथ(न्) ।
विहृत्य सुखिता भद्रा सह धर्मं चचार ह ॥

**Colophon:**

इति ब्रह्माण्डपुराणे कृष्णकुन्तीसंवादे मार्गशिरलक्ष्मीव्रतकल्पस्स-
म्पूर्णः ॥

No. 8413. मासनक्तपूजाविधिः.

MĀSANAKTAPŪJĀVIDHIḤ.

Pages, 2. Lines, 11 on a page.

Begins on fol. 13*a* of the MS. described under No. 8198.

Incomplete.

This Vrata consists in the worship of Śambhu once every month after the evening rites are over.

**Beginning:**

दिनान्ते सर्वकर्माणि समाप्य विधिना नृप ।
पादौ प्रक्षाल्याचम्याथ पूजास्थानं प्रविश्य च ॥
पूजयेदीश्वरं भक्त्या षोडशैरुपचारकैः ।
पीठस्थं पूजयेच्छम्भुं सायुधावरणं क्रमात् ॥
रुद्रियेण कृतन्यासो रुद्रभक्तिसमन्वितः ।
नृप संपूजयेच्छम्भुं कल्पोक्तविधिनानघ ॥

**End:**

श्रुतवारिधये श्रोत्रे । सर्वेश्वराय शिरः । सर्ववासिने सर्वाङ्गम् ॥

---

No. 8414. मासशिवरात्रिपूजाविधिः.

MĀSAŚIVARĀTRIPŪJĀVIDHIḤ.

Pages, 11. Lines, 5 on a page.

Begins on fol. 57*a* of the MS. described under No. 5773.

Incomplete.

This Vrata consists in the worship of Śiva every month on the 14th day of the dark fortnight. This is considered to have the power of removing sins and bestowing all prosperity.

**Beginning:**

ओंनमो भगवते पञ्चवक्त्राय दशबाहुत्रिणेत्रिणे ।
महावृषाधिरूढाय शेषाभरणभूषिणे ॥

शुभमस्तु । तदेव लग्नम् । सर्वेभ्यो महाजनेभ्यो नमः ।
उत्तिष्ठन्तु . . मूलकर्म समारभे ॥

एवंगुणविशेषणविशिष्टायां तिथौ . . . . मया आचरित-मासशिवरात्रिव्रतप्रतिमासकृष्णचतुर्दश्यां मासशिवरात्रिव्रताङ्गश्रीभवानी-शङ्करावाहनादिषोडशोपचारपूजां करिष्ये ।

**End:**

जयादीन् पूर्णाहुतिं च हुत्वा होमशेषं समाप्य व्रतिनः कलशोद-केन समुज्ज्येष्ठापावमानीभिर्मार्जनं कृत्वा ।

---

No. 8415. मासशिवरात्रिव्रतकल्पः.

MĀSAŚIVARĀTRIVRATAKALPAḤ.

Pages, 14. Lines, 5 on a page.

Begins on fol. 46a of the MS. described under No. 5773.

Complete.

Similar to the above.

**Beginning:**

सर्वपुण्याधिकफलं सर्वपापप्रणाशनम् ।
सर्वसंपत्करं स्त्रीणां भोगमोक्षप्रदायकम् ॥
स्त्रीणां सौभाग्यजनकं वन्ध्यानां पुत्रदायकम् ।
किंचिद्व्रतं समाचक्ष्व सूत सर्वविदां वर ॥
कस्सेव्यस्सर्वदेवेषु कस्स्वल्पेनापि तुष्यति ।
कस्तुष्टस्सुमति सिद्धिमिह चामुत्र यच्छति ॥
शिवरात्रिव्रतं कुर्यात्साक्षाद्रुद्रो भवेन्नरः ।
द्विधाप्युपक्रमस्तस्य पूर्वेद्युस्सद्य एव वा ॥
त्रयोदश्यामेकभुक्तिं दन्तधावनपूर्वकम् ।
रात्रौ सङ्कल्प्य विधिवत्प्रातरुत्थाय संयमी ॥
चतुर्दशीमुपोष्याथ सायन्देवं प्रपूजयेत् ।

**End:**

एवं यः कुरुते सम्यक् तस्य पुण्यफलं शृणु ।
प्रथमे मासि ब्रह्मत्वं सेनानीशिवपूजया ॥

पुष्पैरष्टभिर्युक्तः प्राप्नोति गतकल्मषः ।
द्वितीये विष्णुभवनं दिव्यैष्षोडशभिर्युतः ॥
तृतीये शाङ्करं लोकं द्वात्रिंशद्भिस्समन्वितः ।
चतुर्थे स्कन्दलोके च पञ्चमे पार्वतीपुरम् ।
षड्भिर्मे भवनं पुत्र पुत्रपौत्रसमन्वितः ॥

**Colophon:**

. . . . . पुराणे मासशिवरात्रिव्रतकल्पस्सम्पूर्णः ॥

---

No. 8416. मासशिवरात्रिव्रतोद्यापनपूजाकल्पः.

MĀSAŚIVARĀTRIVRATODYĀPANAPŪJĀKALPAḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 53a of the MS. described under No. 5773. Incomplete.

On the procedure for the completion of the Vrata described under the previous number.

**Beginning:**

यश्शिवस्सर्वेभ्यो महाजनेभ्यो नमः । उक्ति . . . ।

एवंगुणविशेषणविशिष्टायां शुभतिथौ मम व्रतिन्याः गोत्रायाः नामधेयायाः मम आचरितमासशिवरात्रिव्रतसाद्गुण्यार्थं मासशिवरात्रिव्रतोद्यापनाङ्गम् आदौ निर्विघ्नेन समाप्त्यर्थं शुद्ध्यर्थं वृद्ध्यर्थमभ्युदयार्थं च ब्राह्मणैस्सह पुण्याहवाचनं करिष्ये ।

**End:**

श्रीभवानीशङ्करस्य सालोक्यसारूप्यसामीप्यसायुज्यादिचतुर्विधमोक्षसिद्ध्यर्थं मासशिवरात्रिव्रतोद्यापनाङ्गं संभवद्भिः पदार्थैर्यथासंभवं प्रथमयामपूजां करिष्ये.

## No. 8417. मासोपवासव्रतकल्पः.
## MĀSŌPAVĀSAVRATAKALPAḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 116a of the MS. described under No. 7758.

Complete. From Bhaviṣyōttarapurāṇa.

On the Vrata which consists chiefly in fasting for a month commencing from the first or the eleventh day of either of the lunar fortnights, or from the new moon or full moon day, or from the day on which the sun passes from one zodiacal sign to another. The fasting may be continued even for three, six or twelve months, taking milk whenever there is fear of loss of life.

**Beginning:**

व्रतानामुत्तमं दिव्यं मासेनैवाहमुत्तमम् ।
शृणु पाण्डव यत्नेन ममानुग्रहकाङ्क्षया ॥
प्रतिपत्सर्वसङ्क्रान्तावेकादश्यां विशेषतः ।
यस्यामुपक्रमे(त्) राजन् नैते(नात्र) वै पारणं भवेत् ॥
प्राणत्यागे च क्षीराम्बुपानमेव विधीयते ॥

* * * *

एकमासं त्रिमासांश्च षण्मासान् द्वादशांस्तथा ।
उपोष्याथ व्रतस्येह कुर्यादुद्यापनं बुधः ॥

**End:**

मासोपवासव्रतमेव चित्रं यद्विष्णुना तेन जगद्धिताय ।
सर्वव्रतानां परमं पवित्रमुक्तं चमु(सम)श्रं यमसूनवे च ॥

**Colophon:**

इति भविष्योत्तरपुराणे मासोपवासव्रतं संपूर्णम् ॥

---

## No. 8418. मैलारपूजाविधिः.
## MAILĀRAPŪJĀVIDHIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 1a of the MS. described under No. 7758.

Complete.

On the Vrata consisting in the worship of the deity Mailār on the sixth day of the bright fortnight in the month of Mārgaśira when it happens to be a Sunday and is associated with the asterism Śatabhiṣak. This is considered to have the power of bringing about prosperity.

**Beginning:**

त्रिशूलं डमरुं खड्गं पानपात्रं त्रिलोचनम् ।
उग्रदंष्ट्रं वपुर्भीमं बिभ्रदिन्द्रमणिप्रभम् ॥
सर्वभूषणसम्पन्नं स्फुरन्मकरकुण्डलम् ।

* * * *

मैलाराय नमस्तस्मै भोगरूपाय मीढुषे ॥

सूत उवाच—

मार्गशीर्षे शुभे मासे शुक्लपक्षे ममानघे ।
भानुवारयुतायान्तु षष्ठ्यां शतभिषग्धृतौ ॥
पूर्वाह्णे वादरात्मा च कृत्वा तस्यार्घसंयुतम् ।
मैलार इति विख्यातं लक्ष्मीभूमिप्रदायकम् ॥
मामिलां राति भूतेभ्यस्तस्मान्मैलारसंज्ञितः ।

**End:**

अनेन विधिना यस्तु पूजयेन्मनुजो भुवि ।
स सर्वकामसम्पन्नस्सुखी भवति सर्वदा ॥

क्षमापणम् ॥

**Colophon:**

इति नन्दिकेश्वरप्रोक्तपद्मपुराणे मैलार(र)पूजाविधानं नाम एकोनत्रिंशोऽध्यायः ॥

---

No. **8419.** यमुनापूजा.

YAMUNĀPŪJĀ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 52*a* of the MS. described under No. 8231.

Complete.

On the worship of the river-goddess Yamunā (the Jumna) as a preliminary rite to the observance of all Vratas.

**Beginning :**

एवङ्गुण . . . तिथौ यमुनापूजां करिष्ये—

क्षीरोदार्णवसम्भूते इन्द्रनीलमणिप्रभे ।
त्वत्प्रसादान्महादेवि विष्णुरूपि नमोऽस्तु ते ॥ ध्यानम् ।
यमुने ते(हे) नमस्तुभ्यं सर्वकामप्रदायिनि ।
सर्वभाग्यं च मे देहि यमुने ते(भो) नमोऽस्तु ते ॥ आवाहनम् ।

**End :**

गङ्गादर्शनमात्रेण पापं कृत्वा विशुध्यति ।
प्रत्यक्षं त्वां समभ्यर्च्य कः पापं विन्दते नरः ॥
अनन्ताख्यव्रतं देवि करिष्ये त्वत्प्रसादतः ।
यावद्व्रतसमाप्तिस्स्यात्कुम्भेऽस्मिन्सन्निधिर्भव ॥
सुमङ्गलीसूक्तं जपित्वा गृहं प्रविशेत् ॥

---

No. **8420.** यमुनापूजा.

YAMUNĀPŪJĀ.

Pages, 10. Lines, 7 on a page.

Begins on fol. 64*a* of the MS. described under No. 898.

Complete. From Padmapurāṇa.

Similar to the above.

See under the previous number for the beginning.

**End :**

भवानी च महालक्ष्मीस्सर्व(कामप्रदायिनी) ।
(सर्व)व्रतमहादेवि यमुनायै नमोऽस्तु ते ॥

**Colophon :**

इति पद्मपुराणोक्तप्रकारेण यमुनापूजाविधानं सम्पूर्णम् ॥

No. 8421. यमुनापूजा.
YAMUNĀPŪJĀ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 28*a* of the MS. described under **No. 2907.**

Complete.

Similar to the above.

**Beginning:**

क्षीरोदार्णवसंभूते क्षीरार्णवनिषेविते ।
त्वत्प्रसादान्महादेवि विष्णुरूपि नमोऽस्तु ते ॥ ध्यानम् ।
यमुने ते(हे) नमस्तुभ्यं सर्वशास्त्रप्रदायिनि ।
सर्वसौभाग्यदे देवि यमुनायै नमो नमः ॥ आवाहनम् ।

**End:**

पूगीफलसमायुक्तं नागवल्लीदलैर्युतम् ।
कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥
ताम्बूलम् । पुनर्धूपम् । नीराजनम् ॥
नमस्ते यमुने गङ्गे नमस्ते लोकपावनि ।
नमस्ते गोमतीवेणि नमस्ते श्रीसरस्वति ॥ नमस्कारः ॥

---

No. 8422. यमुनापूजा.
YAMUNĀPŪJĀ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 88*a* of the MS. described under **No. 3105.**

Complete.

Similar to the above.

**Beginning:**

क्षीरोदार्णवसंभूते इन्द्रनीलसमप्रभे ।
त्वत्प्रसादान्महादेवि विष्णुरूपि नमोऽस्तु ते ॥
यमुनायै नमः—ध्यानम् ।

यमुनायै नमस्तुभ्यं सर्वकामप्रदायिनि ।
सर्वसम्पत्करे देवि आगच्छ वरदे शुभे ॥ आवाहनम् ।

**End:**

सुरासुरेन्द्रार्ककिरीटमौक्तिकप्रजा(भा)भिवृद्धन्तव पादपङ्कजम् ।
परापरचाल्वरं सुमङ्गलं नमामि भक्त्या तव पादपङ्कजम् ॥

**Colophon:**

इति यमुनापूजा ॥

---

No. **8423.** यमुनापूजा.
YAMUNĀPŪJĀ.

Pages, 5. Lines, 6 on a page.
Begins on fol. 99*a* of the MS. described under **No.** 2905.
Complete.
Same as the above.

---

No. **8424.** यमुनापूजा.
YAMUNĀPŪJĀ.

Pages, 3. Lines, 9 on a page.
Begins on fol. 109*a* of the MS. described under No. 8107.
Slightly different from the above.

**Colophon:**

इति श्रीपद्मपुराणोक्तयमुनापूजाविधानं सम्पूर्णम ॥

---

No. **8425.** यमुनापूजा.
YAMUNĀPŪJĀ.

Pages, 8. Lines, 4 on a page.
Begins on fol. 25*a* of the MS. described under No. 6152.
Complete.
Similar to the above.

**Beginning:**

हिमवद्गिरिसंभूते इन्द्रनीलसमप्रभे ।
त्वत्प्रसादान्महादेवि यमुनायै नमोऽस्तु ते ॥ ध्यानम् ।

**End:**

पूगीफलसमायुक्तं ताम्बूलम् । श्रिये जात इति नीराजनम् । इमं मे गङ्गे इति मन्त्रपुष्पम् ।

यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि तानि प्रणश्यन्तु प्रदक्षिण पदेपदे ॥

प्रदक्षिणनमस्कारः । यस्य स्मृत्या च ॥

---

No. 8426. यमुनापूजा.
YAMUNĀPŪJĀ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 94*a* of the MS. described under **No. 3055.**

Complete.

Similar to the above.

**Beginning:**

यै नमः सर्वाङ्गं पूजयामि सरस्वत्यै नमः पुष्पम् । ओं गङ्गायै नमः । यमुनायै नमः । फल्गुन्यै नमः । पापनाशिन्यै नमः । पद्मायै नमः . . . . . . . . . .

**End:**

अनया यथा(विधि)षोडशोपचारपूजया च भगवती सर्वात्मिका श्रीयमुनादेवता सुप्रीता वरदा भूत्वा मम व्रतसुव्रतसिद्धिरस्त्विति भवन्तो ब्रुवन्तु ॥

**Colophon:**

इति श्रीयमुनापूजाविधानं सम्पूर्णम् ॥

---

No. 8427. यमुनापूजा.
YAMUNĀPŪJĀ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 61*a* of the MS. described under No. 8171.

Complete.

Similar to the above.

**Beginning :**

कालिन्दी कमलासनस्य जननी कल्याणसन्दायिनी
कारुण्यामृतपूर्णलोचनयुतां काम्यार्थसिद्धिप्रदाम् ।
कस्तूरीलसदङ्गरागरचितां कालस्वसारं रवेः
कन्यां काञ्चनभूषिताञ्च यमुनां कान्तां हरेर्वल्लभाम् ॥ ध्यानम् ।
आवाहयाम्यहं देवीं कलिन्दाद्रिसुतां सतीम् ।
विष्णुप्रियाञ्च वरदां विमलज्ञानदायिनीम् ॥ यमुनायै नमः ।

**End :**

नमस्करोमि त्वां देवि त्रिः परिक्रम्य दण्डवत् ।
नमस्कारेण मे देवि परितुष्टा भवानिशम् ॥
प्रदक्षिणनमस्कारः ।
अनन्ताराधनं सम्यकरोमि कलशे त्वया ।
यमुनासन्निधिं(धिः) शश्वत् कर्तव्या(व्यो) हरिवल्लभे ॥

**Colophon :**

यमुनापूजाविधिस्समाप्तः ॥

---

## No. 8428. यमुनापूजा.
## YAMUNĀPŪJĀ.

Pages, 5. Lines, 4 on a page.
Begins on fol. 1*a* of the MS. described under No. 8232.
Incomplete.
Similar to the above

**Beginning :**

पूर्वोक्तैवङ्गुणविशेषणविशिष्टायां पुण्यतिथौ ममेह जन्मनि जन्मान्तरेषु . . . . . . . . श्रीम(दनन्तव्रताङ्गयमुनापू)जां कारयिष्ये । कुङ्कुमाक्षतान् गृहीत्वा क्षीरोदार्णवसम्भूत इन्द्रनीलसमप्रभे ।

**End :**

आवरणपूजा—चञ्चलायै नमः पादौ पूजयामि । चपलायै नमः—जानुनी पूजयामि.

### No. 8429. यमुनापूजा.
### YAMUNĀPŪJĀ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 19*a* of the MS. described under No. 8177.

Complete. From Skandapurāṇa

Similar to the above.

**Beginning:**

क्षीरोदार्णवसंभूते क्षीरार्णवनिषेविते ।
त्वत्प्रसादान्महादेवि यमुनायै नमोऽस्तुते ॥ ध्यानम् ।

**End:**

महादेवि नमस्तुभ्यं शरणागतवत्सले ।
त्राहि मां कृपया देवि भक्ताभीष्टफलप्रदे ॥ प्रार्थना ।

**Colophon:**

इति स्कन्दपुराणे यमुनापूजाविधानं सम्पूर्णम् ॥

---

### No. 8430. यमुनापूजा.
### YAMUNĀPŪJĀ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 29*a* of the MS. described under No. 8198.

Complete.

Same as the above.

**Beginning:**

एवङ्गुणविशेषणविशिष्टायां शुभे(भ)तिथौ वर्षे वर्षे समुद्दिश्य वर्षे वर्षे प्रीत्यर्थम् अनन्तपद्मनाभमुद्दिश्यानन्तपद्मनाभप्रीत्यर्थं यावच्छक्यं ध्यानावाहनादिपूजां करिष्ये । तदङ्गं यमुनापूजां करिष्ये ।

क्षीरोदार्णवसंभूते क्षीरसारसमन्विते ।
प्रसादं कुरु मे देवि विष्णुरूपि नमोऽस्तु ते ॥

यमुनायै नमः ध्यानम् ।

यमुनायै नमस्तुभ्यं सर्वपापप्रणाशिनि ।
सर्वसम्पत्करे देवि कलशे संस्थितं कुरु ॥ आवाहनम् ।

**End:**

अस्मिन् सम्पूज्य तानद्य यथा रक्ष उमासुते ।
करिष्ये व्रतमध्ये च अनन्तं सफलं कुरु ॥

**Colophon:**

यमुनापूजाविधानं सम्पूर्णम् ॥

---

No. 8431. यमुनापूजा.

YAMUNĀPŪJĀ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 15*a* of the MS. described under No. 2908

Complete.

Similar to the above.

**Beginning:**

एवंगुणेत्यादिस्कन्दपुराणोक्तमार्गेण श्रीमदनन्तव्रताङ्गयमुनापूजां करिष्ये—

कलशान् पूजयेत् सर्वान् गङ्गातोयैस्सपल्लवान् ।
सर्वे समुद्रास्सरितः तीर्थानि जलदा नदाः ॥
आयान्तु देवपूजार्थं दुरितक्षयकारकाः ।
गङ्गे च यमुने चैव गोदावरि सरस्वति ॥
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ।
हिमवद्गिरिसंभूते इन्द्रनीलसमप्रभे ॥
त्वत्प्रसादान्महादेवि यमुनेते(नायै) नमोऽस्तु ते ॥

यमुनायै ध्यानम् ।

**End:**

यानि कानि च प्रदक्षिणम् । पापोऽहमिति नमस्कारः ।
इमं मे गङ्गेति मन्त्रपुष्पम् ॥

**Colophon:**

इति यमुनापूजाविधानं संपूर्णम् ॥

## No. 8432. यमुनापूजा.
## YAMUNĀPŪJĀ.

Pages, 9. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 8178.

Complete.

Similar to the above.

**Beginning:**

एवंगुणविशेषणस्कन्दपुराणोक्तानन्तव्रताङ्गयमुनापूजां करिष्ये—

कलशान् पूजयेत् सर्वान् गङ्गातोयसपल्लवान् ।
सर्वे समुद्रास्सरितः तीर्थानि जलदा नदाः ॥

**End:**

भवानी च महालक्ष्मीस्सर्वकामप्रदायिनी ।
सर्वव्रतमहादेवि यमुनायै नमो नमः ॥

**Colophon:**

इति पद्मपुराणे यमुनापूजा संपूर्णा ॥

---

## No. 8433. रथसप्तमीव्रतकल्पः.
## RATHASAPTAMĪVRATAKALPAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 139*a* of the MS. described under No. 3055.

Complete From Bhaviṣyōttarapurāṇa.

This Vrata consists in the worship of the sun-god on the seventh day of the bright fortnight in the month of Māgha. This day is considered to be as sacred and important as the day of solar eclipse. The observance of the Vrata is said to enable one to realise one's desires and to bestow all prosperity.

**Beginning:**

अथातस्संप्रवक्ष्यामि रथाख्यं सप्तमीव्रतम् ।
सर्वकामप्रदं नृणां सर्वपापप्रणाशनम् ॥
अभीष्टफलदं पुण्यं सर्वतीर्थफलप्रदम् ।
सर्वारिष्टहरं नणां सर्वसंपद्विवर्धनम् ॥

दुःखदारिद्र्यविध्वंसं मङ्गलानां च मङ्गलम् ।
माघमासे शुक्लपक्षे सप्तमी प्रवरा तिथिः ॥
अर्कग्रहणतुल्यान्तां तिथिमाहुर्महर्षयः ।
समाराध्य नरस्तत्र भानुं त्रैलोक्यमन्दिरम् ॥

**End:**

तत्कालसंभवान्येव तिलमिश्रयुतानि च ।
* दश दानानि च परे महादानानि षोडश ॥
ब्राह्मणान् भोजयेत् पश्चात् यथाविभवसारतः ।
एवं यः कुरुते भक्त्या सोऽश्वमेधफलं लभेत् ॥

**Colophon:**

इति भविष्योत्तरपुराणे रथसप्तमीव्रतकल्पस्समाप्तः ॥

---

No. 8434, रामजयन्तीव्रतपूजा.

RĀMAJAYANTĪVRATAPŪJĀ.

**Pages,** 6. Lines, 6 on a page.

Begins on fol. 14a of the MS. described under No. 8258.

Complete.

On the manner of worshipping Rāma on the anniversary of his birthday.

**Beginning:**

प्रसीद जानकीनाथ सुप्रसीद सुरेश्वर ।
प्रसन्नो भव मे राम प्रसन्नो भव मे प्रभो ॥ ध्यानम् ।
शरणं मम(मे) जगन्नाथ शरणं भक्तवत्सल ।
वरदो भव मे राम शरणं मे रघूत्तम ॥ आवाहनम् ।

---

* दक्षिणासहितं दत्वा — इति पाठान्तरम् ।

**End:**

कौसल्यानन्दनाय ललाटम्। सर्वात्मने नमश्शिरः। श्रीरामचन्द्राय नमः—सर्वाङ्गं पूजयामः॥

---

No. 8435. रामजयन्तीव्रतपूजा.

RĀMAJAYANTĪVRATAPŪJĀ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 76a of the MS. described under No. 8179.

Incomplete.

Similar to the above.

**Beginning:**

चिन्तयेद् द्विभुजं देवं वामाङ्कस्थितजानकिम्।
वि(द)धतं दक्षिणकरे ज्ञानमुद्रां महामुने॥
वामेनाथ करेणैव देवीमालिङ्ग्य संस्थितम्।
एवंविधं राममूर्तिं चिन्तयेद्रघुनन्दनम्॥ ध्यानम्।
रामं रघुकुलोत्तंसं नित्यानन्दमयं विभुम्।
आवाहयामि सर्वज्ञं भक्ताभीष्टप्रदायकम्॥ आवाहनम्।

**End:**

ऋषय ऊचुः

नानाव्रतानि पुण्यानि पुराणोक्तानि यानि च।
बहून्यस्माभिरीड्यानि प्रमुखाणि महामुने॥
रहस्यं परमं पुण्यम्

---

No. 8436. रामजयन्त्यर्घ्यश्लोकः.

RĀMAJAYANTYARGHYAŚLOKAḤ.

Page, 1. Lines, 4 on a page.

Begins on fol. 1b of the MS. described under No 5773.

Deals with the manner of offering oblations of water to Rāma on the anniver-aries of h s birthday, *i.e*, on the ninth day of the bright fortnight when the moon is in the asterism Punarvasu in the month of Caitra.

**Beginning** and **End:**

श्रीरामनवमीमुपोष्य (तद्)ङ्गार्घ्यप्रदानं करिष्ये ।

* * * *

कौसल्यागर्भसंभूत दुष्टदानवमर्दन ।
रावणान्तक राजेन्द्र गृहाणार्घ्यं नमोऽस्तु ते ॥
चैत्रे मासे सिते पक्षे नवम्यां च (स) पुनर्वसु(सौ) ।
मध्याह्ने कर्कटे लग्ने जातो रामस्स्वयं हरिः ॥
गृहाणार्घ्यं मया दत्तं सीतया सह राघव.

---

No. 8437. रामनवमीव्रतकल्पः.

RĀMANAVAMĪVRATAKALPAḤ.

Pages, 16. Lines, 6 on a page.

Begins on fol. 45*b* of the MS. described under No. 7758.

Complete. From Agastyasaṁhitā.

This Vrata consists in fasting for a day and night and worshipping the golden idol of Rāma on the anniversary of his birthday. This is considered to have the power of absolving one of all sins.

**Beginning:**

अगस्त्यः—

ममानेकजन्मसंसिद्धप्रख्यातकृतरहस्यकृतोपपातकमहापातकापनोदनाय
. . . . . . . . श्रीरामनवमीव्रतं करिष्ये—इति सङ्कल्प्य
पुण्याहं कृत्वा व्रतसङ्कल्पं कुर्यात् ।

अस्यां रामनवम्यां च रामाराधनतत्परः ।
उपोष्याष्टसु यामेषु पूजयिष्ये यथाविधि ॥
इमां स्वर्णमयीं रामप्रतिमां पलनिर्मिताम् ।
श्रीरामप्रीतये दास्ये रामभक्ताय धीमते ॥

* * * *

इति श्रीअगस्त्यसंहितायां परमरहस्ये षड्विंशोऽध्यायः ॥

**End:**

तस्मात्सर्वात्मना कार्यं श्रीरामनवमीव्रतम् ।
मुच्यते सर्वपापेभ्यो याति ब्रह्म सनातनम् ॥
प्रमादाद्वा प्रसङ्गाद्वा भियाद्वा राजशासनात् ।
कृत्वोपवासमेकं च पूतो भवति मानवः ॥

**Colophon:**

इति श्रीअगस्त्यसंहितायां परमरहस्ये अष्टाविंशोऽध्यायः ॥

---

No. 8438. रामनवमीव्रतकल्पः.

RĀMANAVAMĪVRATAKALPAḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 40*a* of the MS. described under No. 7758.

Complete.

Similar to the above.

**Beginning:**

अगस्त्य उवाच—

सर्वानुष्ठानसारं ते सर्वदानव्रतं परम् ।
रहस्यं कथयिष्यामि सुतीक्ष्ण शृणु सत्तम ॥
चैत्रे नवम्यां प्राक्पक्षे दिवा पुण्ये पुनर्वसौ ।
उदये गुरुगौराख्ये उच्चस्थे ग्रहपञ्चके ॥
मेषे पूषणि संप्राप्ते लग्ने कर्कटकाह्वये ।
चैत्रे मासि नवम्यान्तु शुक्लपक्षे रघूत्तमः ॥
प्रादुरासीत्स कलया कौसल्यायां परः पुमान् ।
तस्मिन् दिने तु कर्तव्यमुपवासव्रतोत्तमम् ॥

**End:**

एवं यः कुरुते भक्त्या श्रीरामनवमीव्रतम् ॥
अनेकजन्मसिद्धानि पातकानि बहून्यपि ।
भस्मीकृत्य प्रयात्येव तद्विष्णोः परमं पदम् ॥

एकामपि नरो भक्त्या श्रीरामनवमीं मुने ।
उपोष्य कृतकृत्यस्स्यात् सर्वपापैः प्रमुच्यते ॥

**Colophon** :

इति श्रीहिरण्यगर्भसिद्धान्ते अगस्त्यनारदसंवादे श्रीरामनवमीव्रतं समाप्तम् ॥

---

No. **8439.** रामनवमीव्रतकल्पः.

RĀMANAVAMĪVRATAKALPAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 8*a* of the MS. described under No. 8199.

Incomplete.

Similar to the above.

**Beginning** :

एवंगुणविशेषणाविशिष्टायां शुभतिथौ इह जन्मनि जन्मान्तरेषु मनोवाक्कायकर्मभिः ज्ञानाज्ञानरहसि(कृत)प्रकाशकृतमहापातकादिबहुविधसकलविषपातकनिवृत्त्यर्थं कुरुक्षेत्रादिपुण्यदेशेषु उपरागादिपुण्यकालेषु बहुशोनि(ऽनु)ष्ठिततुलापुरुषादिदानफलावाप्त्यर्थं . . . अगस्त्यसंहितामोक्तचैत्रशुक्लनवमीकर्तव्यश्रीरामनवमीव्रतं करिष्ये ।

**End** :

हिमाम्बुचन्द्रसंयुक्तं कुङ्कुमागरुचर्चितम् ।
विलेपनं गृहाणेश मया भक्त्या प्रकल्पितम् ॥

गन्धं समर्पयामि.

---

No. **8440.** लक्षतुलसीव्रतकल्पः.

LAKṢATULASĪVRATAKALPAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 118*a* of the MS. described under No. 7758.

Complete. From Viṣṇudharmōttara.

This Vrata consists in the worship of Viṣṇu with one hundred thousand petals of the Tulasī plant, commencing from the month

of Āṣāḍha up to the eleventh day of the bright fortnight in the month of Kartika. An image of Viṣṇu as lying down in the milky ocean should be made for the purpose of worship. This Vrata is considered to have the power of ridding one of all one's sins.

**Beginning:**

ब्रह्मोवाच—

देवदेव नमस्तुभ्यं सर्वशास्त्रविशारद ।
तुलस्या लक्षसंख्याया व्रतं ब्रूहि महामते ॥

श्रीभगवानुवाच—

चातुर्मास्यं समारभ्य यावदुद्बोधना हरेः ।
तावत्पर्यन्तमेतस्याः समर्पणमथाचरेत् ॥
आदौ मध्ये तथा चान्ते कुर्यादुद्यापनं बुधः
स्वगृह्योक्तविधानेन होमं कुर्याद्यथाविधि ॥
श्रीराब्धिशायिनस्तस्य प्रतिमां कारयेद्बुधः ।

**End:**

तुलस्या लक्षसङ्ख्याया व्रतं कृत्वा त(य)थाविधि[ः[ ॥
पापेभ्यो विविधेभ्यश्च मुक्तवान् स नृपात्मजः ।
अन्यैरपि महाभागैर्मान्धातृनहुषादिभिः ॥
कृतं यथाविधि प्रोक्तं तथावश्यं च तं कुरु ।
एवं कृते महाभाग सर्वान् कामानवाप्स्यसि ॥

**Colophon:**

इति श्रीविष्णुधर्मोत्तरे तुलसीव्रतं संपूर्णम् ॥

---

No. 8441. लक्षतुलसीव्रतोद्यापनम्.

LAKṢATULASĪVRATŌDYĀPANAM

Pages, 2. Lines, 7 on a page.

Begins on fol. 95 of the MS. described under No. 3105. Complete. From Garuḍapurāṇa.

On the manner of finishing the Vrata mentioned in the previous number.

**Beginning**:

देवदेवं नमस्कृत्य सर्वशास्त्रविशारदम् ।
सर्वावयवसंपूर्णं सर्वदेवनमस्कृतम् ॥
तुलस्या लक्षसंख्याकव्रतं ब्रूहि महामते ।
चातुर्मास्यं समारभ्य यावदुद्बोधितो हरिः ॥
तावत्पर्यन्तमेतस्याः समर्पणमथाचरेत् ।
समर्पणकृतस्यास्य स्वर्गलोकस्य राड्भवेत् ॥

* * * *

माघमासं समारभ्य वैशाखान्तं समाचरेत् ।
माधवप्रतिमां कृत्वा अर्चयेत् सुसमाहितः ॥

**End**:

इदं व्रतं सदा कार्यं चतुर्वर्गफलेप्सुभिः ।
पुंभिर्विविधैस्तत्कार्यं विधवानां तथैव च ॥
एवं कृते महाभाग मुच्यते सर्वपातकैः ।
पुरा चित्ररथो नाम (राजा माहिष्म)तीपतिः ॥
तुलस्या लक्षसंख्याकं व्रतं कृत्वा यथाविधि ।
पापेभ्यो विविधेभ्यश्च मुक्तवान् स नृपात्मजः ॥
अन्यैरपि महीपालैः मान्धा(तृनहुषादिभिः) ।
यथाविधि (श्रुतं) सर्वैरवश्यं तद्व्रतं कुरु ॥
एवं कृते महाभाग सर्वान् कामानवाप्स्यसि ।

**Colophon**:

इति श्रीगरुडपुराणे लक्षतुलसीव्रतोद्यापनं संपूर्णम् ॥

No. 8442. लक्षदीपव्रतकल्पः.

LAKṢADĪPAVRATAKALPAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 55 of the MS. described under No. 2907.

Incomplete. Forms the 37th Adhyāya of Pancarātrāgama.

This Vrata consists in worshipping Viṣṇu and placing before him one hundred thousand lights during the period between Āṣāḍha and Kārtika. This is considered to enable one to become one with Viṣṇu.

**Beginning:**

देवदेवारविन्दाक्ष मायातीत महामते ।
त्वमेव वेत्सि तत्सर्वं भूयो भूयो नमाम्यहम् ॥
दीपानां लक्षसंख्यानां व्रतं ब्रूहि महामुने ।

श्रीभगवान्—

शृणु ब्रह्मन् प्रवक्ष्यामि लक्षदीपव्रतोत्तमम् ।
चातुर्मास्ये तु संप्राप्ते अच्युते शयनं गते ।
लक्षदीपं प्रकुर्वीत यथाविभवसारतः ॥

**End:**

दीपाराधनतः कुर्याद्वैधव्यं न भवेत् कचित् ।
इदं व्रतं महापुण्यं विष्णुसायुज्यमाप्नुयात् ॥

**Colophon:**

इति पाञ्चरात्रे ब्रह्मविष्णुसंवादे दीपाराधनकथं(धनं)नाम सप्तत्रिं-शोऽध्यायः ॥

---

No. 8443. लक्षधान्यव्रतकल्पः.

LAKṢADHĀNYAVRATAKALPAḤ.

Pages, 6. Lines, 16 on a page.

Begins on fol. 63b of the MS. described under No. 3846.

Complete. From Skāndapurāṇa.

This Vrata consists in the worship of Śiva with one thousand grains.

**Beginning :**

अस्ति भूमौ महापुण्यं नैमिशाख्यं महावनम् ।
तत्र सन्ति महात्मानः ऋषयश्शौनकादयः ॥

* * * *

धान्यैर्नानाविधैश्शम्भोरर्चनात्पापनाशनम् ।
नारी वा पुरुषो वापि लक्षधान्यैर्महेश्वरम् ॥
पूजयित्वा सुरश्रेष्ठं सर्वपापैः प्रमुच्यते ।

**End :**

सूत उवाच—

तस्माद्यूयं महाभागाः कुरुध्वं श्रद्धयान्विताः ।
धान्यपूजां सदा शम्भोरिहामुत्रफलप्रदाम् ॥

**Colophon :**

इति श्रीस्कान्दपुराणे गुरुशिष्यसंवादे लक्षधान्यव्रतकल्पस्सम्पूर्णः ॥

---

No. **8444.** लक्षनमस्कारव्रतकल्पः.

LAKṢANAMASKĀRAVRATAKALPAḤ

Pages, 3. Lines, 5 on a page.

Begins on fol. 75 of the MS. described under No. 2907.

Incomplete

This Vrata consists in the worship of Viṣṇu by prostrating oneself before him one hundred thousand times commencing from the eleventh day in the bright fortnight in the month of Āṣāḍha. This is considered to have the power of cleansing one of all sins.

**Beginning :**

अम्बरीष उवाच—

इक्ष्वाकूणां कुलगुरो ब्रह्मन् धर्मग सुव्रत ।
सर्वपापक्षयकरं व्रतं सर्वोत्तमोत्तमम् ॥

* * * *

ब्रह्महत्यादिपापानां प्रायश्चित्तं यदीच्छसि ।
तदा लक्षनमस्कारं व्रतं कुरु महीपते ॥

**End:**

> आषाढस्य सिते पक्षे एकादश्यां समाहितः ।
> सङ्कल्प्य देवदेवस्य पुरतश्चक्रपाणिनः ॥
> अहं लक्षनमस्कारं करिष्यामि महामते ।
> निर्विघ्नं तद्व्रतं साङ्गं कुरु मे कमलापते ॥
>
> * * * *
>
> देवार्चनं जपं होमं न त्यजेत्तु कदाचन ।
> अतिथिं पू.

---

No. 8445. लक्षनमस्कारव्रतकल्पः.

LAKṢANAMASKĀRAVRATAKALPAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 115*a* of the MS. described under No. 7758 wherein it is called Lakṣanamaskāravidhi.

Complete. From Bhaviṣyōttarapurāṇa.

Similar to the above.

**Beginning:**

अम्बरीषः—

> इक्ष्वाकूणां कुलगुरो ब्रह्मन् सर्वज्ञ सुव्रत ।
> ब्रूहि पापक्षयकरं व्रतं सर्वोत्तमोत्तमम् ॥
>
> * * * *
>
> चातुर्मास्ये तु सम्प्राप्ते केशवे शयनं गते ।
> आषाढस्य सिते पक्ष एकादश्यां समाहितः ॥
> सङ्कल्प्य देवदेवस्य पुरतश्चक्रपाणिनः ।
> इदं लक्षनमस्कारव्रतं कुरु महीपते ॥

निर्विघ्नं तद्व्रतं शातं(स्यात्तत्) कुरु मे कृपया हरे।
व्रतेनानेन सुप्रीतस्समुद्धर जगत्पते॥
इति सङ्कल्प्य मनसा कार्त्तिक्यां तु समापयेत्।

**End:**

सर्वेषामाश्रमाणां च विहितं श्रुतिचोदितम्।
नारीणां विधवानां च दम्पतीनां विशेषतः॥

**Colophon:**

इति श्रीभविष्योत्तरपुराणे लक्षनमस्कारः सम्पूर्णः॥

---

No. **8446.** लक्षपद्मव्रतकल्पः.
LAKṢAPADMAVRATAKALPAḤ.

Pages, 4. Lines, 16 on a page.

Begins on fol. 68*a* of the MS. described under No. 3846.
Complete. From Padmapurāṇa.

This Vrata consists in worshipping Viṣṇu conceived as being present in the midst of a diagram consisting of the figures of a Svastika (a kind of lotus), Śaṅkha and Cakra in the middle surrounded by a thousand figures of the hoofs of cows. These diagrams are drawn on the ground each day until one hundred thousand figures of hoofs are drawn. The worship is to commence on the eleventh day of the bright fortnight in the month of Āṣāḍha. The observance of the Vrata is considered to enable one to obtain all prosperity.

**Beginning:**

सूत उवाच—
शृणुध्वमृषयस्सर्वे लक्षपद्मव्रतं शुभम्।
भुक्तिदं मुक्तिदं स्त्रीणां पुत्रपौत्राभिवृद्धिदम्॥
रहस्यकृतपापानां रजोमालिन्यपापिनाम्।
पांसुलानां द्विजाः स्त्रीणां प्रायश्चित्तमिदं व्रतम्॥

* * * * *

आषाढे शुक्लपक्षे तु एकादश्यामुपक्रमेत् ।
प्रत्यहं देवतावेदिं गोमयेनोपलिप्य च ॥
शालितण्डुलचूर्णेन पञ्चवर्णैस्तथा शुभैः ।
आदावेकन्तु निक्षिप्य सर्वतो भद्रदायकम् ॥
स्वस्तिकं शङ्खचक्रे च ततश्चाष्टदलं क्षिपेत् ।
अथ गोपादपद्मानि निक्षिपेच्च सहस्रकम् ॥
पूजयेत् पुरुषसूक्तेन उपचारान् समर्पयेत् ।

**End**:

ये कुर्वन्ति व्रतमिदं भक्त्या च परया मुदा ।
सा नारी सकलान् भोगान् लभते नात्र संशयः ॥

**Colophon**:

इति पद्मपुराणे लक्षपद्मव्रतकल्पस्सम्पूर्णः ॥

---

## No. 8447. लक्षपुष्पव्रतकल्पः.
## LAKṢAPUṢPAVRATAKALPAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 118*b* of the MS. described under No. 7758.

Complete. From Brahmāṇḍapurāṇa.

This Vrata consists in the worship of Viṣṇu with one hundred thousand flowers of different kinds, the worship commencing from the eleventh day of the bright fortnight in the month of Āṣāḍha and extending over a period of four months. This is considered to have the power of enabling one to realise one's desires.

**Beginning**:

पुष्पारोपणमाहात्म्यं विधानं च यथाक्रमम् ।
ब्रह्मोदितं मुनिश्रेष्ठ शृणुष्व सुमना भव ॥
अथ जातीनि रम्याणि कमलान्युत्पलानि च ।
कुमुदागस्त्यपुष्पाणि कदम्बं केतकी तथा ॥

* * * *

मासे च माधवे चैव चातुर्मास्ये विशेषतः ।
आनीय भक्त्या विप्रेन्द्र न्यसेत्तस्य च मूर्धनि ॥
लक्षान्तं वा द्विलक्षं वा यथाविभवमाचरेत् ।
मासमेकं द्विमासं वा चातुर्मास्यमथापि वा ॥
अर्चयेद्देवदेवेशं क्षीरसागरमध्यगम् ।
यतिर्वा ब्रह्मचारी वा गृहस्थो वनगोऽपि वा ॥

**End:**

तस्मात् सर्वप्रयत्नेन पुष्पपूजां समाचरेत् ।
सर्वान् कामानवाप्नोति विष्णुसायुज्यमाप्नुयात् ॥

**Colophon:**

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे पुष्पप्रशम(शंस)नं नाम पञ्चदशोऽध्यायः ॥

---

No. 8448. लक्षपुष्पव्रतकल्पः.
LAKṢAPUṢPAVRATAKALPAḤ.

**Pages, 2.** Lines, 5 on a page.

Begins on fol. 7a of the MS. described under No. 2907 wherein this was omitted to be given in the list of other works.

Complete, but wants beginning. From Bhaviṣyōttarapurāṇa. Similar to the above.

**Beginning:**

कर्तोपोष्य च पूर्वेद्युराचार्यं वरयेत्ततः ।
पुण्याहवाचनं कुर्यात्कुम्भं संस्थापयेद्बुधः ॥

**End:**

ऋत्विग्भ्यो दक्षिणां दद्यात् कुर्यात् ब्राह्मणभोजनम् ।
इदं व्रतं महापुण्यं विष्णुसायुज्यमाप्नुयात् ॥

**Colophon:**

इति भविष्योत्तरपुराणे ब्रह्मनारदसंवादे लक्षपुष्पव्रतकल्पस्संपूर्णः ॥

## No. 8449. लक्षप्रदक्षिणव्रतकल्पः.
## LAKṢAPRADAKṢIṆAVRATAKALPAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 10*a* of the MS. described under No. 3105.

Complete. From Viṣṇudharmōttara.

Contains the story relating to the observance of the Vrata which consists in going round the image of Viṣṇu one hundred thousand times during the period between the eleventh day of the bright fortnight in the month of Āṣāḍha and the corresponding day in the month of Kārtika.

**Beginning:**

कृष्ण कृष्ण महाबाहो सर्वाघौघविनाशन ।
येन व्रतेन चीर्णेन सर्वपापक्षयो भवेत् ॥
* * * *
सङ्कल्प्य कुर्यान्नियतः कार्तिक्यां विजितेन्द्रियः ।
लक्षं समाप्य पश्चात्तु कुर्यादुद्यापनं कृतम् ॥

**End:**

. . . . राजेन्द्र कृत्वेदं व्रतमुत्तमम् ।
विमुक्तस्सर्वपापेभ्यः आपदस्तारयिष्यसि ॥

**Colophon:**

इति श्रीवि(ष्णु)धर्मे लक्षप्रक्षिणव्रतकल्पस्समाप्तः ॥

---

## No. 8450. लक्षप्रदक्षिणव्रतकल्पः.
## LAKṢAPRADAKṢIṆAVRATAKALPAḤ.

Pages, 3. Lines, 16 on a page.

Begins on fol. 67*a* of the MS. described under No. 3846.

Complete. From Bhaviṣyōttarapurāṇa.

On the manner of performing the Vrata referred to under the previous number. This Vrata is considered to have the power of cleansing one of all his sins.

**Beginning:**

ये चान्ये पापिनो लोके दानधर्मविवर्जिताः ।
नास्तिका भिन्नमर्यादा हेतुकाः कितवाः शठाः ॥
व्रतहीना व्रतभ्रष्टा दुराचारास्तु डाम्भिकाः ।
अमैश्वर्याविरहिता ब्रह्मज्ञानाविवर्जिताः ॥
वेदाभ्यासविहीनाश्च शास्त्रमार्गविवर्जिताः ।
मातापितृविरोद्धारः गुरुश्वशुरद्रोहिणः ॥
एतेषां निष्कृतिं नाथ कृपयाब्जज मे वद ।
हरिणा निर्मितं पूर्वं व्रतं लक्षप्रदक्षिणम् ॥
सर्वेषामेव पापानां मूलोच्छेदकरं शुभम् ।

* * * *

नारायणे जगन्नाथे योगनिद्रामुपेयुषि ।
प्रारब्धव्यं व्रतमिदमेकादश्यां जितेन्द्रिय(यै)ः ॥
तदारभ्य व्रतमिदं कुर्याद्यावत्प्रबोधनम् ।
द्वादश्यां वा चतुर्दश्यां पौर्णमास्यामथापि वा ॥
व्रतस्यास्य ततः कुर्यादुद्यापनमथोदितम् ।

**End:**

ये कुर्वन्ति व्रतमिदं ये पठन्ति च वैभवम् ।
ये लिखन्तीदमाख्यानं यास्यन्ति हरिमन्दिरम् ॥

**Colophon:**

इति श्रीभविष्योत्तरपुराणे लक्षप्रदक्षिणव्रतकल्पस्सम्पूर्णः ॥

---

No. 8451. लक्षप्रदक्षिणव्रतकल्पः.

LAKṢAPRADAKṢIṆAVRATAKALPAḤ.

Page, 1. Lines, 7 on page.

Begins on fol. 121*b* of the MS. described under No. 7758.

Incomplete.

Similar to the above.

**Beginning :**

युधिष्ठिर उवाच--

कृष्ण कृष्ण महाबाहो सर्वाघौघविनाशन ।
येन व्रतेन चीर्णेन सर्वपापक्षयो भवेत् ॥
सर्वेषामाश्रमाणां च सवर्णानां स्त्रियामपि ।

* * * *

लक्षप्रदक्षिणं नाम व्रतं चैव सुदुर्लभम् ।
किं दानं को विधिः का वा देवता काल एव च ॥
चातुर्मास्ये तु सम्प्राप्ते पञ्चगव्याच्छुचिर्भवेत् ।

**End :**

सङ्कल्प्य तु ततः कुर्यात्कार्त्तिक्यन्ते जितेन्द्रियः ।
वर्षे समाप्य पक्षान्तु(न्ते) कुर्यादुद्यापनं व्रती ॥
आचार्यं वरयेद्विद्वान् ब्रह्माणं च ऋ.

---

No. 8452. लक्षबिल्वव्रतोद्यापनम्.

LAKṢABILVAVRATODYĀPANAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 42*a* of the MS. described under No 8239.

Complete but wants beginning. From Skāndapurāṇa.

On the manner of completing the Vrata which consists in the worship of Śiva with one hundred thousand Bilva leaves.

**Beginning :**

त्र्यम्बकेति मन्त्रेण तिलैश्च चरुणा तथा ।
आज्याहुतिं ततो दद्यात् तस्य नामान्यनुस्मरन् ॥

शिवाय स्वाहा विकृताय स्वाहा हराय स्वाहा शब्दाय स्वाहा प्रद्ताय स्वाहा विद्ताय स्वाहा भवाय स्वाहा रुद्राय स्वाहा.

**End :**

पुरा चित्ररथो नाम राजा माहिष्मतीपतिः ।
बिल्वस्य लक्षसङ्ख्याकं व्रतं कृत्वा यथाविधि ॥

पापेभ्यो विविधेभ्यश्च मुक्तवान् स नृपात्मजः ।
अन्यैरपि महीपालैर्मान्धातृनहुषादिभिः ॥
श्रुतं यथाविधि स्वर्णैरवश्यं तद्व्रतं कुरु ।
एवं कृते महाभाग सर्वान् कामानवाप्स्यसि ॥

**Colophon:**

इति श्रीस्कन्दपुराणे लक्षबिल्वव्रतोद्यापनं सम्पूर्णम् ॥

---

No. **8453.** लक्षलिङ्गोद्यापनविधिः.

LAKṢALIṄGŌDYĀPANAVIDHIḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 60*b* of the MS. described under No. 3675, wherein this was omitted to be included in the list of other works.

Complete. From Liṅgapurāṇa.

This Vrata consists in making one hundred thousand images of Liṅga in one month commencing from Śrāvaṇa and worshipping them. The Vrata may, it is stated, be completed in the month of Kārtikā, Māgha, or Vaiśākha.

**Beginning:**

तचद्व्रतं पुरा सूतः(श्रुतं पूर्व)रस्माभिः कमलापते ।
लक्षलिङ्गप्रपूजान्ते फलाफलमिदं शृणु ॥
* * *
लक्षलिङ्गं प्रपूज्यान्ते ब्रह्मलोकमवाप्नुयात् ।
कोटिभिः शिवसायुज्यं लभते नात्र संशयः ॥
नभस्येव तदारभ्य मासमेकं समापयेत् ।
कार्त्तिक्यां माघवैशाखे कुर्यादुद्यापनं विधिम् ॥

**End:**

एवं कुरुध्वं सततं लिङ्गस्याभ्यर्चनं विधिम् ।
इति सूतवचः श्रुत्वा सन्तुष्टा मुनयोऽभवन् ॥

**Colophon:**

इति श्रीलिङ्गपुराणे ईश्वरकुमारसंवादे लक्षलिङ्गोद्यापनविधिः समाप्तः ॥

No. 8454. लक्षवर्तिव्रतकल्पः.
LAKṢAVARTIVRATAKALPAḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 577·.

Complete. From Vāyupurāṇa.

This Vrata consists in the worship of Nārāyaṇa and Lakṣmī by lighting and placing before the images one hundred thousand wicks, *i.e.*, lights. This may be observed in the month of Kārtika Vaiśākha or Māgha.

**Beginning:**

आर्यावर्ते पुरा काचिद्वेश्यामूल्लक्षणाह्वया ।
तस्या भुजङ्गः शूद्रोऽभूद्दासो नाम युवा बली ॥
सा लक्षणा ऋतुस्नातो स्थिता गोदावरीतटे ।
लक्षवर्तिव्रतस्यास्य विधानं कीदृशं वद ॥
कस्मिन् मासे तु कर्तव्यं कस्योपाये समर्पणम् ।

* * * *

कालो हि कार्त्तिको मासो वैशाखो माघ एव च ।
सहस्रगुणित दत्ते व्रतमेतद्धि कार्त्तिके ॥
तस्मात्कोटिगुणं दत्ते माघे मासि व्रतोत्तमम् ।
तस्मादनन्तगुणितं फलं वैशाखमासि वै ॥
एतन्मासत्रये यस्माद्यस्मिन्मासि समापयेत् ।
तस्मान्मासद्वयात्पूर्वं प्रारब्धव्यं व्रतं त्विदम् ॥
अन्तिमे मासि कुर्वीत समाप्य तु विचक्षणः ।
सहस्रवर्तिभिः कुर्यादारार्तिं विष्णवेऽन्वहम् ॥

**End:**

धौतवस्त्रं परीधाय त्रिराचम्य च वारिणा ॥
गायत्र्या मन्त्रितं चाम्भः प्रोक्षयेन्मूर्ध्नि वै द्विजः ।
सोऽपि स्नानफलं प्राप्य मोदते विष्णुमन्दिरे ॥

**Colophon :**

इति वायुपुराणे लक्षवर्तिव्रतकल्पस्सम्पूर्णः ॥

---

No. **8455.** लक्षवर्तिव्रतकल्पः.

LAKṢAVARTIVRATAKALPAḤ.

Pages, 8. Lines 6 on a page.

Begins on fol. 35*a* of the MS. described under No. 5773.
Complete. From Vāyupurāṇa.
Same as the above.

---

No. **8456.** लक्षवर्तिव्रतकल्पः.

LAKṢAVARTIVRATAKALPAḤ

Pages, 3. Lines, 6 on a page.

Begins on fol. 8*b* of the MS. described under No. 3105.
Complete.
Similar to the above.

**Beginning :**

लक्षवर्तिव्रतस्यास्य विधानं कीदृशं वद ।
कस्मिन् मासे तु कर्तव्यं कस्य वा नु समर्पणम् ॥
उद्यापनं कथं कार्यं किं फलं तस्य वा मुने ।
तया पृष्टो याजकोऽपि लोकानां हितकाम्यया ॥
फलं विधानं यत् सर्वं तदवोचन्महामतिः ।
कालो हि कार्तिको मासो वैशाखो माघ एव वा ॥
तस्मान्मासत्रयात्पूर्वं प्रारब्धव्यं व्रतन्त्विदम् ।
अन्तिमे मासि कुर्वीत समाप्तन्तु विचक्षणः ॥
सहस्रवर्तिभिः कुर्यादारार्तिं विष्णवेऽन्वहम् ।

**End:**

अथवा दशपलं कांस्यं तथा घृतसमन्वितम् ।
सुवर्णवर्तिसंयुक्तमाचार्याय निवेदयेत् ॥

**Colophon:**

इति लक्षवर्तिव्रतं सम्पूर्णम् ॥

---

No. 8457 लक्षवर्तिव्रतकल्पः.
LAKṢAVARTIVRATAKALPAḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 71*a* of the MS. described under No. 3375.
Complete.
Same as the above.

---

No. 8458. लक्षवर्तिव्रतकल्पः.
LAKṢAVARTIVRATAKALPAḤ.

Pages, 11. Lines, 7 on a page.

Begins on fol. 76*a* of the MS. described under No. 2907.
Complete. From Vāyupurāṇa.
Similar to the above.

अथ कृष्णचतुर्दश्यां शिवरात्रिव्रतम्। तत्रार्धरात्रव्यापिन्यां कार्यम्।
तदुक्तं नारदीयसंहितायाम्—

अर्धरात्रयुता यत्र माघे कृष्णचतुर्दशी ।
शिवरात्रिव्रतं तत्र अश्वमेधफलं लभेत् ॥
ईशानसंहितायामपि—माघे कृष्णचतुर्दश्यामादिदेवो महानिशि ।
शिवलिङ्गमभूत्तत्र कोटिसूर्यसमप्रभम् ॥
तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः ॥ इति ॥

**End:**

अश्वमेधसहस्राणि वाजपेयशतानि च ।
प्राप्नोति तत्फलं सर्वं नात्र कार्या विचारणा ॥

**Colophon:**

इति श्रीलिङ्गपुराणे उमामहेश्वरसंवादे शिवरात्रिव्रतं संपूर्णम् ॥

---

### No. 8543. शिवरात्रिव्रतकल्पः.
### ŚIVARĀTRIVRATAKALPAḤ

Pages, 6. Lines, 6 on a page.

Begins on fol. 96a of the MS. described under No. 7758.

Complete.

Similar to the above.

Deals chiefly with the determination of the day on which the Vrata is to be observed.

**Beginning:**

अथ शिवरात्रिव्रतम् ।

अथ चतुर्वर्गचिन्तामणिप्रयोगपारिजातस्मृतिभास्करादीन्ग्रन्थानालोच्य स्कन्दपुराणोक्तशिवरात्रिव्रतानुष्ठानप्रकारो लिख्यते—

शिवयोगभारमघटिकातृतीययामप्रथमघटिकायां तिथौ पूर्वेद्युरेवास्तमयानन्तरभाविघटिकाचतुष्ट(य)यामात्मकप्रदोषरात्रिद्वितीययाम[चर्वेद्युनिशीथात् पूर्वमारभ्य परेद्युःकात्मक]निशीथोभयात्मकव्याप्तौ पूर्वविद्धायां परेद्युरेव प्रदोषनिशीथोभयव्याप्तौ परविद्धायां पूर्वेद्युः प्रदोषादूर्ध्वमारभ्य परेद्युः प्रदोषाद्दर्शकसमाप्तौ पूर्वविद्धायां परेद्युर्निशीथादारभ्य उपर्यारभ्य परेद्युः प्रदोषमात्रव्याप्तौ परविद्धायां पूर्वेद्युः निशीथात्पूर्वमारभ्य परेद्युः प्रदोष-

व्याप्तौ पूर्वविद्धायां परेद्युर्निशीथादुपर्यारभ्य परेद्युः प्रदोषमात्रव्याप्तौ परविद्धायां पूर्वेद्युः प्रदोषादूर्ध्वमारभ्य परेद्युर्दर्शकसमाप्तौ पूर्वविद्धा। माघकृष्णचतुर्दश्यां व्रतमाचरेत् । . . . . . . . . . . .

**End:**

पूजाजागरणोपवासाः प्रार्थनावसा(नेऽनुष्ठे)याः उपवासाशक्त एकभुक्तं कृत्वा पूजाजागरणे एव कुर्यात् ।

**Colophon:**

इति स्कन्दपुराणोक्तशिवरात्रिव्रतप्रयोगः समाप्तः ॥

---

## No. 8544. शिवरात्रिव्रतफलम्.
## ŚIVARĀTRIVRATAPHALAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 156*a* of the MS. described under No. 781.

Complete.

On the effect of observing the Śivarātrivrata.

**Beginning:**

शिवरात्रिव्रतफलम्—

अश्वमेधसहस्राणां शतं कृत्वा तु यत्फलम् ।
शिवरात्रिव्रतं कृत्वा तत्फलं समवाप्नुयात् ॥
कपिलादानकोटीनां कर्ता यल्लभते फलम् ।
शिवरात्रिव्रतं कृत्वा तत्फलं लभते नरः ॥

**End:**

गवां हत्वा सहस्राणि चण्डालीगमनायुतम् ।
शिवरात्रिव्रतं कृत्वा तानि नश्यन्ति तत्क्षणात् ॥

---

## No. 8545. शिवरात्रिव्रतोद्यापनम्.
## ŚIVARĀTRIVRATODYĀPANAM.

Pages, 12. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 8166.

Complete. From Brahmāṇḍapurāṇa.

On the manner of completing the Śivarātrivrata. It is stated that the Vrata may be completed after observing it for fourteen, seven, three or one year.

**Beginning:**

सूत सूत महाप्राज्ञ सर्वशास्त्रविशारद ।
शिवरात्रिव्रतस्यास्य व्रतो(व्रद्य)द्यापनमादरात् ॥

सूत उवाच—

शृणुध्वमृषयस्सर्वे नैमिषीया द्विजोत्तमाः ।
चतुर्दशीव्रतस्यास्य वदाम्युद्यापनं शुभम् ॥
चतुर्दश समा वापि सप्त वापि त्रिकास्समाः ।
वर्षं वा नियमाद्भक्तः कृत्वा(कुर्या)द्व्रतमनुत्तमम् ॥

अनुज्ञा, विघ्नेश्वरपूजा, सङ्कल्पः, आचार्यवर्ण(रणं) कृत्वा ।

**End:**

फलदानताम्बूलदानानि कृत्वा, आशीर्वादं कृत्वा, शिवलिङ्गदानं रुद्राक्षदानं च कृत्वा ॥

**Colophon:**

इति ब्रह्माण्डपुराणे उपरिभागे व्रतखण्डे शिवरात्रिव्रतोद्यापनं समाप्तम् ॥

---

## No. 8546. शिवरात्रिव्रतोद्यापनम्.
## ŚIVARĀTRIVRATODYĀPANAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 71*a* of the MS. described under No. 3105, wherein it was included in Śivarātrivratakalpa in the list of other works.

Complete. From Skāndapurāṇa as quoted in Hēmādri's work. Similar to the above.

**Beginning:**

अथोद्यापनम् । हेमाद्रौ स्कान्दे स्कन्द उवाच—

व्रतस्योद्यापनं कर्म कथं कार्यं च मानवैः ।
को विधिः कानि कार्याणि कथयस्व मम प्रभो ॥

ईश्वर उवाच—

शृणु षण्मुख तत्त्वेन लोकानां हितकाम्यया ।
उद्यापनविधिं चैव कथयामि तवाग्रतः ॥
चतुर्दशाब्दं कर्तव्यं शिवरात्रिव्रतं शुभम् ।
एकभुक्तं त्रयोदश्यां चतुर्दश्यामुपोषणम् ॥
सम्पाद्य सर्वसंभारान् मण्डपं तत्र कारयेत् ॥

**End:**

व्रतमेतत् कृतं यत्र पूर्णं वापूर्णमेव वा ।
सर्वं संपूर्णतां यातु प्रसादाद्भवतो मम ॥
इति संप्रार्थ्य तान् विप्रान् प्रणम्य च पुनः पुनः ।
ततश्च ब्राह्मणैस्सार्धं सायं भुञ्जीत सुव्रती ॥

**Colophon:**

इति हेमाद्रौ स्कान्दे शिवरात्र्युद्यापनं समाप्तम् ॥

---

## No. 8547. शिवरात्र्यर्घ्यप्रदानम्.
## ŚIVARĀTRYARGHYAPRADĀNAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 79*a* of the MS. described under No. 430.

Complete.

On the manner of offering oblations of water to Śiva on the Śivarātri day

**Beginning:**

श्रीगोविन्द गोविन्द पूर्वोक्तैवंगुणविशेषणविशिष्टायां शुभतिथौ श्रीभवानीशङ्करप्रेरणया श्रीभवानीशङ्करप्रीत्यर्थं शिवरात्रिमुपोष्य व्रताङ्गार्घ्यप्रदानानि करिष्ये ।

माघे कृष्णचतुर्दश्यां निराहरो महेश्वर ।
नक्तं भोक्ष्यामि देवेश अर्पयामि सदाशिव ॥
ओं श्रीसाम्बसदाशिवाय नमः इदमर्घ्यं समर्पयामि ।

**End:**

अनेन शिवरात्रि(मु)उपोष्य (तद)ङ्गार्घ्यप्रदानेन भगवान् सर्वात्मकः श्रीभवानीशङ्करः प्रीयताम् । श्रीभवानीशङ्करस्सुप्रीतो वरदो भवतु ॥

---

No. **8548.** शिवरात्र्यर्घ्यश्लोकाः.

ŚIVARĀTRYARGHYAŚLŌKĀḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 21*a* of the MS. described under No. 5773, and not on 19*a* as shown therein.

Complete.

Similar to the above.

**Beginning:**

नमश्शिवाय शान्ताय सर्वपापहराय च ।
शिवरात्रौ ददाम्यर्घ्यं भक्त्या तुभ्यं महाप्रभो ॥
नमश्शिवाय शान्ताय भुक्तिमुक्तिप्रदाय च ।
शिवरात्रौ ददाम्यर्घ्यं सर्वाभीष्टप्रदायकम् ॥

**End:**

माघमासेऽसिते पक्षे पार्वत्या सह शङ्कर ।
गृहाणार्घ्यं मया दत्तं शिवरात्रौ प्रसीद मे ॥

---

No. **8549.** श्रवणद्वादशीव्रतकल्पः.

ŚRAVAṆADVĀDAŚĪVRATAKALPAḤ.

Pages, 37. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 8171.

Complete. From Bhaviṣyōttarapurāṇa.

This Vrata consists in the worship of Vāmana on the twelfth day of the bright fortnight in the month of Bhādrapada when the day is associated with the Śravaṇa asterism. This is considered to have the power of removing one's sins and enabling one to become merged in Viṣṇu. The story relating to the Vrata as found in the Saurapurāṇa is also given here.

**Beginning:**

मासे भाद्रपदे शुक्ले द्वादशी श्रवणान्विता ।
सर्वपापहरा शुक्ला                 क्ले महाफला ॥
नद्याश्च सरसि स्नात्वा द्वादशीं समुपोषितः ।
पापक्षयमवाप्नोति विष्णोस्सायुज्यमुत्तमम् ॥
दशम्यामेकभुक्तन्तु दन्तधावनपूर्वकम् ।
आचम्य विधिवत् पश्चात् गृहीत्वा नियमं प्रति ॥
संस्मृत्य वामनं देवं नियमस्थस्स्वपेद्भुवि ॥

* * * *

पुरुषो वाथ नारी वा करोत्येतद्व्रतोत्तमम् ।
पापक्षयमवाप्नोति विष्णुसायुज्यमाप्नुयात् ॥

**Colophon:**

इति भविष्योत्तरपुराणे श्रवणद्वादशीव्रतं समाप्तम् ॥
अथ कथाप्रारम्भः सौरपुराणे याज्ञवल्क्यं प्रति भास्करः—
व्रतस्यास्य च माहात्म्यं पुरावृत्तं शृणु द्विज ।
वक्ष्याम्यहं मुनिश्रेष्ठ सेतिहासं पुरातनम् ॥
वैश्यः कश्चित् पुरा ब्रह्मन् आसीत् बहुधनो भुवि ।
कन्याकुब्जाख्यनगरे सत्यधर्मपरायणः ॥

**End:**

इमां पुण्यकथां श्रुत्वा भक्तियुक्तेन चेतसा ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

**Colophon:**

इति सौरपुराणे सूर्ययाज्ञवल्क्यसंवादे श्रवणद्वादशीकथा समाप्ता ॥

No. 8550. श्रवणद्वादशीव्रतकल्पः.

ŚRAVAṆADVĀDAŚĪVRATAKALPAḤ.

Pages, 29. Lines, 4 on a page.

Begins on fol. 1a of the MS. described under No. 8240.

Complete. From Nāradiyapurāṇa.

Similar to the above.

**Beginning:**

उपवासासमर्थानां सदैव पुरुषोत्तम ।
या च वै द्वादशी पुण्या तद्व्रतस्य(द्वदस्व) विधानतः ॥
मासि भाद्रपदे शुक्लद्वादशी श्रवणान्विता ।
सर्वाहारव्रतं पुण्यमुपवासमहाफलम् ॥

See under the previous number for the end.

**Colophon:**

इति श्रीनारदीयपुराणे याज्ञवल्क्यसूर्यसंवादे श्रवणद्वादशीव्रतं नाम त्रयस्त्रिंशोऽध्यायः ॥

---

No. 8551. श्रवणद्वादशीव्रतकल्पः.

ŚRAVAṆADVĀDAŚĪVRATAKALPAḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 1a of the MS. described under No. 8218.

Complete. From Matsyapurāṇa.

Similar to the above.

**Beginning:**

याज्ञवल्क्यस्सुरश्रेष्ठं भास्करं ग्रहनायकम् ।
कृताञ्जलिपुटो भूत्वा इदं वचनमब्रवीत् ॥
व्रतानां चैव सर्वेषां दानानां चैव सर्वतः ।
यज्ञादीनां(च सर्वेषां ज)पादीनां विशेषतः ॥
सर्वेषां पुण्यविधीनां यत् फलं लभते नरः ।
तत्पुण्यस्य फलाधिक्यं यद्व्रतं लभते नरः ॥
तद्व्रतं वद मे देव सर्वकामफलप्रदम् ।

भास्कर उवाच—

पुष्ये भाद्रपदे मासे शुक्लपक्षे द्विजोत्तम ।
एकादशी मुहूर्तं वा तदर्धं वा कलापि वा ॥
श्रवणेन समायुक्ता बुधवारेण संयुता ।
द्वादशी च महापुण्या श्रवणेन युता पुनः ॥
दुर्लभात्यन्तफलदा तिथिर्वै विष्णुशृङ्खला ।

**End:**

इदं सर्वं मयाख्यातं श्रवणद्वादशीव्रतम् ।
कृतं पापहरं नृणां स्वर्गभोगफलप्रदम् ॥

**Colophon:**

इति मत्स्यपुराणे सूर्ययाज्ञवल्क्यसंवादे दधिवामनश्रवणद्वादशीव्रत-कल्पस्सम्पूर्णः ॥

---

No. 8552. श्रवणद्वादशीव्रतकल्पः.

ŚRAVAṆADVĀDAŚĪVRATAKALPAḤ.

Pages, 16. Lines, 5 on a page.

Begins on fol. 68a of the MS. described under No 8233.

Complete. From Brahmavaivartapurāṇa.

Similar to the above.

**Beginning:**

याज्ञवल्क्यः—

कथमाराधनं विष्णोः क्रियते विष्णुतत्परैः ।
तिथिनक्षत्रसंयोगे व्रतं किंचिदिहोच्यते ॥
येन लक्ष्मीस्तथा सौख्यं धनं च विपुला मतिः ।
स्वल्पायासाद्बहुफलं तन्मे ब्रूहि दिवाकर ॥

दिवाकरः—

तिथिनक्षत्रसंयोगे व्रतं शृणु महामते ।
कृते जन्मनि पापेभ्यो मुच्यते नात्र संशयः ॥

* * * *

श्रवणेन युता ब्रह्मन् द्वादशी पुण्यदा भवेत् ।
घटिकैका यदा दृष्टा श्रवणेन युता तिथिः ॥
तदा सा सकला पुण्या द्वादशी श्रवणान्विता ।
तस्यां तिथौ समुत्पन्नो वामनः पुरुषोत्तमः ॥

**End:**

नास्तिकाय न दातव्यं विधानं नाप्यवैष्णवे ।
मानवाय च भक्ताय प्रदद्याच्च हिताय च ॥
य इदं शृणुयाद्भक्त्या श्रावयेद्वा समाहितः ।
सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥

**Colophon:**

इति श्रीब्रह्मकैवर्ते श्रवणद्वादशीव्रतं संपूर्णम् ॥

---

No. 8553. श्रवणद्वादशीव्रतकल्पः.

ŚRAVAṆADVĀDAŚĪVRATAKALPAḤ.

Substance, palm-leaf. Size, 13⅞ × 1⅛ inches. Pages, 14. Lines, 6 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Complete.

Same as the above.

See under the previous number for the Beginning.

**End:**

यथोक्तविधिना प्रातः भोजनं पृषदाज्यकम् ।
पूर्वं दत्वा ब्राह्मणेभ्यः पश्चाद्भुञ्जीत वाग्यतः ॥

**Colophon:**

इत्यर्चनं सम्पूर्णम् ॥

---

No. 8554. श्रवणद्वादशीव्रतकल्पः.

ŚRAVAṆADVĀDAŚĪVRATAKALPAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 18*b* of the MS. described under No. 8258.

Complete.

Similar to the above.

**Beginning :**

अतिविमलसुगात्रं रुक्मपात्रस्थमन्नं
सुललितदधिखण्डं पाणिना दक्षिणेन ।
कलशममृतपूर्णं वामहस्ते दधानं
तरति सकलदुःखं वामनं भावयेद्यः ॥

श्रीवामनाय नमः—ध्यानम् ॥

आगच्छ वामनोपेन्द्र अदितेर्गर्भसंभव ।
श्रवणद्वादशीपूजां गृहाण त्वं त्रिविक्रम ॥ आवाहनम् ।

**End :**

पूगीफलसमायुक्तम्—ताम्बूलम् । प्रदक्षिणम् ।
नर्य प्रजां मे गोपाय—इति नीराजनम् । प्रार्थनम् ।

नमो नमस्ते गोविन्द नमस्ते जलशायिने ।
द्वादश्यान गृहाणार्घ्यं युक्तायां श्रवणेन च ॥ इदमर्घ्यम् ।

---

No. 8555. श्रवणद्वादशीव्रतकल्पः.
ŚRAVAṆADVĀDAŚIVRATAKALPAḤ.

Pages, 16. Lines, 6 on a page.

Begins on fol. 47*a* of the MS. described under No. 2907, wherein it was shown under the name of Vāmanajayantikalpa.

Complete. From Saurapurāṇa.

Similar to the above.

**Beginning :**

चन्द्रमण्डलमध्यस्थं शुद्धस्फटिकसन्निभम् ।
दध्योदनं वामहस्ते दक्षिणे कलशामृतम् ॥
शुक्लमाल्याम्बरधरं सर्वाभरणभूषितम् ।
त्रियम्बकं महादेवं नृत्यन्तं देवसन्निधौ ॥
चतुर्मुखादिदेवैश्च स्तोत्राराधनतोषितम् ।

सनकादिमुनिश्रेष्ठैस्सर्वदेवैरुपासितम् ।
वामनं च प्रभुं ध्यायेद्दुर्गमोत्तारणाय च ॥

परमात्मने नमः—ध्यानम् । . . . . . . .

इति पूजाविधानं सम्पूर्णम् ॥

भविष्योत्तरे—

इदमन्य(त्)प्रवक्ष्यामि सर्वपापप्रणाशनम् ।
पुत्रदं भाग्यदं नृणां सर्वाभीष्टप्रदायकम् ॥

**End:**

इमां पुण्यकथां श्रुत्वा भक्तियुक्तेन चेतसा ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं व्रजेद्ध्रुवम् ॥

**Colophon:**

इति सौरपुराणे श्रवणद्वादशीव्रतकल्पस्संपूर्णः ॥

---

No. 8556. श्रवणद्वादशीव्रतकल्पः.

ŚRAVAṆADVĀDAŚĪVRATAKALPAḤ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 77*b* of the MS. described under No. 2840.

Complete.

Similar to the above.

**Beginning:**

याज्ञवल्क्य उवाच—

जया च विजया चैव किंफलं किंपरायणम् ।
. . वशिष्टं यत् पुण्यं तत् सर्वं वद सुव्रत ॥
द्वादशी विष्णुदयिता द्वादशी वैष्णवी तिथिः ।
श्रवणेन समायुक्ता कदाचिद्यदि लभ्यते ॥
शुक्लपक्षे द्विजश्रेष्ठ विजया सा प्रकीर्तिता ।
उपोष्या सा प्रयत्नेन सर्वपापक्षयावहा ॥

**End:**

सप्तद्वीपाधिपत्यं च प्राप्नुयान्नात्र संशयः ।
सर्वान् भोगानवाप्नोति भुक्तिं मुक्तिं च गच्छति ॥

**Colophon:**

इति श्रवणद्वादशीकल्पस्समाप्तः ॥

---

No. 8557. श्रवणद्वादशीव्रतोद्यापनम्.
ŚRAVAṆADVĀDAŚĪVRATŌDYĀPANAM.

Pages, 11. Lines, 4 on a page.

Begins on fol. 19*b* of the MS. described under No. 8171.
Complete. From Brahmāṇḍapurāṇa.
On the manner of completing the Śravaṇadvādaśīvrata.

**Beginning:**

ऋषय ऊचुः—
उद्यापनविधिं ब्रह्मन् श्रोतुमिच्छामहे वयम् ।
श्रवणस्य व्रतस्यास्य सूतपुत्र महाद्युते ॥

सूतः—
वर्षत्रये तु सम्पूर्णे मासि भाद्रपदे व्रती ।
एकादशी द्वादशी वा श्रवणर्क्षेण संयुता ॥
तस्या उद्यापनं कुर्यात् मध्यवर्षेण संयुते ।
अङ्कुरार्पणपूर्वं तु वरयेच्छ्रोत्रियं द्विजम् ॥

**End:**

एवं समाप्य विधिवदुद्यापनमुदारधीः ।
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥

**Colophon:**

इति श्रीब्रह्माण्डपुराणे श्रवणद्वादशीव्रतोद्यापनं नाम चतुर्विंशोऽध्यायः ॥

## No. 8558. श्रावणशनिवारव्रतम्.
## ŚRĀVAṆAŚANIVĀRAVRATAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 34*a* of the MS. described under No. 2902, wherein this is shown as Śanivāravrata in the list of other works.

Complete. From Skandapurāṇa.

On the Vrata which consists in the worship of the Saturn on that Saturday of the month of Śrāvaṇa which is associated with the Prōṣṭhapada asterism.

**Beginning:**

आदित्यपुत्राय शनैश्चराय नीलाभवर्मासिनखोज्वलाय ।
दृष्ट्वा रहस्यं प्रणतोऽस्मि नित्यं फलप्रदो मे भव सूर्यपुत्र ॥ ध्यानम् ।
शनैश्चराय आवाहनम् । कृष्णाय आसनम् । नीलवर्णाय पाद्यम् । श्वेतकण्ठाय अर्घ्यम् । नीलमुखाय आचमनीयम् । नीलोत्पलदलाय स्नानम् . . . . . . . . . . . . . . . .

शनैश्चर उवाच—

श्रावण्यां मन्दवारे तु दन्तधावनपूर्वकम् ।
स्नानञ्च विधिना कुर्यान्नित्यकर्म समाचरेत् ॥
श्रावणस्य चतुर्वारे एकप्रोष्ठपदो भवेत् ।
कर्तव्यं पञ्चवारे तु तेन तुष्टोऽस्म्यहं नृप ॥

**End:**

कोणस्थः पिङ्गलो बभ्रुः कृष्णो रौद्रो वृको यमः ।
सौरिः शनैश्चरो मन्दः पिप्पलस्थो धनुर्धरः ॥
एतानि शनिनामानि जपेदश्वत्थसन्निधौ ।
शनैश्चरकृता पीडा न कदाचित् भविष्यति ॥

**Colophon:**

इति श्रीस्कन्दपुराणे दशरथशनैश्चरसंवादे श्रावणशनिवारव्रतं समाप्तम् ॥

No. 8559. सङ्कटचतुर्थीव्रतकल्पः.

SAṄKAṬACATURTHĪVRATAKALPAḤ.

Pages, 14. Lines, 6 on a page.

Begins on fol. 20*a* of the MS. described under No. 8197.

Complete. From Skandapurāṇa.

This Vrata consists in the worship of Gaṇēśa on that day in the month of Śrāvaṇa when the Caturthi tithi exists at the time of the moon rise. This is considered to have the power of extricating one from difficulties.

**Beginning :**

निराहारोऽद्य देवेश यावचन्द्रोदयो भवेत् ।
भोक्ष्यामि पूजयित्वा त्वां गणेशश्शरणं मम ॥
इति संकल्प्य चैवादौ ततः पूजां समाचरेत् ।

एवंगुणविशेषणविशिष्टायां शुभतिथौ अस्माकं सहकुटुम्बानां स्कन्दपुराणोक्तसङ्कटविनायकचतुर्थीव्रतकल्पोक्तसंपूर्णसकलफलावाप्त्यर्थं यथाशक्ति षोडशोपचारपूजां करिष्ये । कलशाराधनम् ।

लम्बोदरं चतुर्बाहुं त्रिणेत्रं रक्तवर्णकम् ।
सिद्धलक्ष्मीसमेतञ्च प्रसन्नास्यं विचिन्तयेत् ॥ इति ध्यानम् ।

* * * *

श्रावणे बहुले पक्षे चतुर्थी या विधूदये ।
तस्मिन् दिने व्रतं श्राव्यं सङ्कटाख्यं सुरेश्वरि ॥

**End :**

एवं व्रतं समादिष्टं यत्पृष्टोऽहं मतं व्रतम् ।
भवद्भिस्तु किमर्थन्तु कथ्यं स्यादिव उच्यताम् ॥

**Colophon :**

इति श्रीस्कान्दपुराणे श्रीकृष्णऋषिसंवादे सङ्कटचतुर्थीव्रतकल्पस्संपूर्णः ॥

## No. 8560. सङ्क्रान्तिव्रतदीपोद्यापनम्.
## SAṄKRĀNTIVRATADĪPODYĀPANAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 37*a* of the MS. described under No. 3105.

Complete.

This Vrata consists in lighting up two sacred lamps, one fed with oil and another with ghee, on the days when the sun passes from one zodiacal sign to another. This Vrata is considered to have the power of enabling one to reach the world of Viṣṇu or Śiva according as he worships the former or the latter.

**Beginning:**

अथ संक्रान्तिव्रतदीपोद्यापनविधिरुच्यते—

सङ्क्रान्तौ पञ्च वर्षाणि आज्येनैकं द्वितीयकम् ॥
तैलेनोभयदीपाभ्यां कारयेदिष्टसिद्धये ।
कृत्वैवं पञ्चवर्षे च पुण्ये काले शुचिव्रतः ॥

* * * *

एवं पञ्चसु वर्षेषु यदि स्त्री यदि वा पुमान् ।
दीपव्रतसमाप्तौ तु कुर्यादुद्यापनं व्रती ॥

**End:**

कुर्यात् स्वीकृत्य विप्राणामाशीर्वचनमुत्तमम् ।
ततो भुक्त्वा स्वयं धीमान् बन्धुभिस्स्वजनैस्सह ॥
एवं यः कुरुते भक्त्या नारी वाथ सुवासिनी ।
धनार्थी प्राप्नुयाद्द्रव्यं पुत्रार्थी पुत्रमाप्नुयात् ॥

**Colophon:**

इति सङ्क्रान्तिदीपोद्यापनविधिस्समाप्तः ॥

---

## No. 8561. सन्तानगोपालव्रतम्.
## SANTĀNAGOPĀLAVRATAM.

Pages, 6. Lines, 4 on a page.

Begins on fol. 154*a* of the MS. described under No. 3055.

Complete. From Kūrmapurāṇa.

This Vrata consists in the worship of a golden image of Gōpāla made of one pala of gold and in making a present of it to a suitable Brāhmaṇa. The Vrata is to be observed within sixteen days after a woma has her monthly course, and it is considered to have the power of removing barrenness.

**Beginning:**

अथातस्संप्रवक्ष्यामि पुत्राप्तिकरं शुभम् ।
ब्राह्मणाः क्षत्रिया वैश्याश्शूद्रा ये वर्णसङ्कराः ॥
तेषां गृहस्थधर्माय न चेत्पुरुषसन्ततिः ।
आमुष्मिकफलायास्ते हरेर्नामपदं तथा ॥
तस्मात्सन्तानगोपालदानं भक्त्या समाचरेत् ।

**End:**

कृत्वा प्रणम्य देवेशं प्रार्थयेद्भक्तिपूर्वकम् ।
काकवन्ध्या च वन्ध्यात्वं(त्वात्) मृतवन्ध्या प्रमुच्यते ॥
पुत्रत्वं दीर्घमायुष्टं सत्यं सत्यं न संशयः ।
स चिरायुस्सुखी पुत्रो जायते वत्सरादपि ॥

**Colophon:**

इति श्रीकूर्मपुराणे सन्तानगोपालविधिः ॥

---

### No. 8562. सरस्वतीकल्पः.
### SARASVATĪKALPAḤ.

Pages, 10. Lines, 6 on a page.

Begins on fol. 27*a* of the MS. described under No. 8166.

Complete.

On the manner of worshipping Sarasvatī, the goddess of learning.

**Beginning:**

सङ्कल्पः—अस्माकम् . . . र्थं महासरस्वतीमुद्दिश्य महासरस्वतीप्रसादसिद्ध्यर्थं महासरस्वतीपूजां करिष्ये । कलशपूजां करिष्ये । महागणपतिपूजां करिष्ये । विघ्नेश्वरं सम्पूज्य

चतुर्भुजां महादेवीं वाणीं सर्वाङ्गसुन्दरीम् ।
श्वेतमाल्याम्बरधरां श्वेतगन्धानुलेपनाम् ॥
अस्मिन् पुस्तकमण्डले दुर्गालक्ष्मी सरस्वतीं ध्यायामि ।

**End:**

गीतं समर्पयामि, वाद्यं समर्पयामि, नाट्यं समर्पयामि, समस्त-राजोपचारान् समर्पयामि । महासरस्वतीस्वरूपस्य . नम् । हिरण्य- . . . महासरस्वती . . . दे ॥

**Colophon:**

सरस्वतीकल्पस्समाप्तः ॥

---

No. 8563. सरस्वतीकल्पः.

SARASVATĪKALPAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 11*a* of the MS. described under No. 8199.
Incomplete.
Similar to the above.

**Beginning:**

या कुन्देन्दुतुषारहारधवला . . . जाड्यापहा ॥
सरस्वतीं ध्यायामि ।
आद्यामशेषविद्यानामारूढां हंसमुत्तमम् ।
आवाहयामि देवि त्वामायुरारोग्यवृद्धये ॥
आवाहनं समर्पयामि ॥

**End:**

मल्लिका मालती जाजी पद्मपाटलकेतकी ।
पुन्नागशतपत्राद्यैः (दि) पुष्पाणि प्रतिगृह्यताम् ॥
अथाङ्गपूजा—
सरस्वत्यै नमः पादौ पूजयामि.

## No. 8564. सरस्वतीकल्पः.
## SARASVATĪKALPAḤ.

Pages, 11. Lines, 5 on a page.

Begins on fol. 51a of the MS. described under No. 5263.

Complete. From Bhaviṣyōttarapurāṇa.

Similar to the above. It is stated that the worship is to be commenced on the day associated with the Mūla asterism in the bright fortnight in the month of Āśvija.

**Beginning :**

पूर्णेन्दुबिम्बसमकान्तिमुमेशमुख्यैः
देवैः प्रपूजितपदां जलजातनेत्राम् ।
कर्पूरसुन्दरतनुं नवहारभूषां
कल्याणपाणिकमलां शशिखण्डमौलिम् ॥

* * * *

सिंहासनेऽरुणमये रविकोटिरम्ये
संस्थां वलित्रययुतां वरदां वरेण्याम् ।
ध्यायेत्सदा विविधभूषणभूषिताङ्गीं
देवीं गिरां शुभकरीमतिनिम्ननाभिम् ॥ इति ध्यानम् ।
अत्रागच्छ जगद्वन्द्ये सर्वलोकैकपूजिते ।
मया कृतामिमां पूजां गृहाण परमेश्वरि ॥ इत्यावाहनम् ।

* * * *

ईश्वरः—

शृणु देवि प्रवक्ष्यामि भारतीपूजनं महत् ।
आश्विजे मासि सम्प्राप्ते शुक्लपक्षे शुभे दिने ॥
मूलादौ पूजयेद्देवीं श्रवणान्ते विसर्जयेत् ।
शुचिर्भूत्वा तदा देवि दन्तधावनपूर्वकम् ॥
नद्यां तटाके कूपे वा स्नानं कृत्वा च मन्त्रतः ।

**End:**

भुवनभरणकान्तापूजनं यस्तु भक्त्या
पठति यदि लिखित्वा स्थापयेद्वेश्मनीदम् ।
स भवति धनयुक्तः पुत्रपौत्रैस्समेतः
सकलदुरितमुक्तः पार्वतीशप्रसादात् ॥

**Colophon:**

इति भविष्योत्तरपुराणे उमामहेश्वरसंवादे सरस्वतीव्रतकल्पसम्पूर्णः ॥

---

## No. 8565. सरस्वतीव्रतकल्पः.
## SARASVATĪVRATAKALPAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 66 of the MS. described under No. 8258, wherein this is ent-red under the name of Śāradāvratapūjā in the list of ·ther works.

Complete.

Similar tc the above. It is however stated that the Varta is to be observed on the ninth day of the bright fortnight in the month of Āśvija.

**Beginning:**

अथातस्संप्रवक्ष्यामि देव्याः पूजां समृद्धिदाम् ।
सर्वतः पूजयेद्देवीं भारतीं सर्वमातरम् ॥
महानवम्यां प्राप्तायां पूजां कुर्वीत यत्नतः ।
मासि चाश्वयुजे प्राप्ते शुक्लपक्षे समागते ॥
या तिथिर्नवमी सद्भिः सा महानवमी मता ।

**End:**

पूगीफलसमायुक्तं ताम्बूलम् ।
नमोविधानलम्पटैः नमत्किरीटकोटिभिः ।
नमस्कृतां सुरासुरैर्नमामि भारतीमिमाम् ॥ नमस्कारः ।
प्र णो देवी सरस्वतीति वाक्येन मन्त्रपुष्पम् ।

प्रार्थना छत्रं चामरं नृत्तं गीतम् ॥

**Colophon :**

समाप्तम् ॥

---

No. **8566.** सरस्वतीव्रतपूजाकल्पः.

SARASVATĪVRATAPŪJĀKALPAḤ.

Pages, 11. Lines, 6 on a page.

Begins on fol. 30*a* of the MS. described under No. 8180.

Complete. From Brahmāṇḍapurāṇa.

Similar to the above.

**Beginning :**

देशकालौ सङ्कीर्त्य अस्माकं सहकुटुम्बानाम् . . दुर्गालक्ष्मीसरस्वती-मुद्दिश्य दुर्गालक्ष्मीसरस्वतीप्रीत्यर्थं दुर्गालक्ष्मीसरस्वतीपूजां करिष्ये—इति सङ्कल्प्य, कलशपूजां कृत्वा, पूजोपकरणानि प्रोक्ष्य । अथ पूजारम्भः—हेमप्रख्यामिन्दुखण्डात्तमौलिं सचारि(शङ्खाभी)ष्टाभीतिहन्त्री(स्तां)त्रिणेत्राम् । हेमाब्जस्थां पीतवस्त्रां प्रसन्नां देवीं दुर्गां दिव्यरूपां नमामि ॥

* * * *

जातवेदस इति मन्त्रेण—

आवाहयामि देवेशि सिद्धगन्धर्वपूजिते ।
ज्ञानमूर्ते भद्रकालि दिव्यरूपे सुरेश्वरि ॥ आवाहनम् ।

**End:**

दुर्गालक्ष्मीसरस्वतीदेवतायै नमः—नीराजनं समर्पयामि ।

न्यूनातिरिक्तानि परिस्फुटानि यानीह कर्माणि मया कृतानि ।
क्षन्तव्यानि वै तानि मम क्षमस्व प्रयाहि तुष्टा पुनरागमाय ॥
यज्ञेन यज्ञमिति मन्त्रेण उद्वासयेत् ॥

**Colophon :**

इति ब्रह्माण्डपुराणोक्तदुर्गालक्ष्मीसरस्वतीपूजाविधानं सम्पूर्णम् ॥

No. 8567. सर्वतोभद्रोद्धारः.
SARVATOBHADRODDHĀRAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 64*a* of the MS. described under No. 8171.

Complete. A portion of Anantavratapūjā.

On the manner of drawing the diagram on which should be placed the image of worship or the vessels of water to be used during the worship prescribed for the various Vratas.

**Beginning:**

मण्डलस्य क्रमं राजन् लक्षणं चावधारय ।
शास्त्रे भागवतेनैव सांख्येनोक्तं महात्मना ॥
गोमयेनोपलिप्योर्वी चतुरश्रं यथा भवेत् ।
बाहुमात्रमरत्निं वा कर्ता सूत्रेण पातयेत् ॥
प्राचीमुदीचीमष्टाष्ट रेखाश्च ऋजवस्तथा ।
एकोनपञ्चाशत् स्थानं भविष्यति न संशयः ॥

**End:**

क्षौमसूत्रसमायुक्तं कुम्भं संस्थापयेद्बुधः ।
कुम्भे च मण्डले चैव बिम्बे चैव समर्चयेत् ॥

**Colophon:**

इति श्रीमदनन्तव्रतपूजायां साङ्ख्येनोक्तसर्वतोभद्रस्योद्धारक्रमः ॥

---

No. 8568. सावित्रीव्रतकल्पः.
SĀVITRĪVRATAKALPAḤ.

Pages, 16. Lines, 6 on a page.

Begins on fol. 38*a* of the MS. described under No. 3105.

Complete. From Skāndapurāṇa.

The Vrata consists in the worship of Sāvitrī with the object of enabling one's husband and children to obtain long life and prosperity.

**Beginning:**

अथ व्रतविधिः—आचम्य, मासपक्षाद्युल्लिख्य, मम भर्तुः पुत्राणामायुरारोग्यप्राप्तये जन्मनि अवैधव्यप्राप्तये च सावित्रिव्रतं करिष्ये इति संकल्प्य ।

वट सिञ्चामि ते मूलं सलिलैरमृतोपमैः ।
सूत्रेण वेष्टये भक्त्या गन्धपुष्पाक्षतैश्शुभैः ॥
नमो वै च वटायेति भ्रामयन्ति प्रदक्षिणम् ।

इति वटं संपूज्य सावित्रीं पूजयेत् ॥

* * * *

अवियोगो यथा देव सावित्रीसहितस्य ते ।
अवियोगस्तथास्माकं भूयाज्जन्मनि जन्मनि ॥

इति प्रार्थना । इति पूजाविधिस्समाप्तः ॥

अथ कथा ।

स्कान्दे सनत्कुमार उवाच—

कुलस्त्रीणां व्रतं देव महाभाग्यं तथैव च ।
अवैधव्यकरं स्त्रीणां पुत्रपौत्रप्रदायकम् ॥

ईश्वर उवाच—

आसीन्महीषु धर्मात्मा ज्ञानी परमधार्मिकः ।
नाम्ना चाश्वपतिर्वीरो वेदवेदाङ्गपारगः ॥
अनपत्यो महाबाहुस्सर्वैश्वर्यसमन्वितः ।
सपत्नीकस्तपस्तेपे समाराधयते नृप(ः)॥

* * * *

त्रिदिनं लङ्घयित्वा तु चतुर्थे दिवसे शुभे ।
चन्द्रायार्घ्यं प्रदद्याच्च पूजयित्वा सुवासिनीम् ।
सावित्रीञ्च प्रसाविनी गन्धधूपनिवेदनैः ।
मिथुनानि यथाशक्त्या भोजयित्वा यथासुखम् ॥

**End:**

सर्वान् मनोरथान् प्राप्य अन्ते रुद्रोऽपि जायते ॥

**Colophon :**

इति स्कान्दे सावित्रीव्रतं संपूर्णम् ॥

---

## No. 8569. सावित्रीव्रतोद्यापनम्.
## SĀVITRĪVRATŌDYĀPANAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 45*b* of the MS. described under No. 3105, wherein this is shown as Vaṭasāvitrīvratōdyāpana.

Complete.

On the manner of completing the Sāvitrīvrata referred to under the previous number.

**Beginning :**

संप्राप्ते तु पुनर्ज्येष्ठे लघुभुक् द्वादशीं नयेत् ।
दन्तानां धावनं कृत्वा नियमं कारयेत्ततः ॥
त्रिरात्रं लङ्घयित्वाथ चतुर्थे दिवसे त्वहम् ।
मृष्टान्नानि यथाशक्त्या भोजयित्वा द्विजोत्तमान् ॥
भोज्ये(क्ष्ये ऽ)हं तु जगद्धात्रि निर्विघ्नं कुरु मे शुभे ।

**End :**

चिरायुषस्सुभोग्यास्स्युस्सुखजन्मशतत्रयम् ।
भर्त्रा च सहिता साध्वी ब्रह्मलोके महीयते ॥

---

## No. 8570. सूर्यनारायणव्रतकल्पः.
## SŪRYANĀRĀYAṆAVRATAKALPAḤ.

Pages, 28. Lines, 4 on a page.

Begins on fol. 36*a* of the MS. described under No. 8168.

Incomplete.

This Vrata consists in the worship of the sun-god on every Sunday commencing from the month of Āśvayuja and continuing up to the seventh day of the bright fortnight in the month of Māgha. This is considered to have the power of enabling one to beget children and to obtain prosperity in life.

**Beginning:**

एवंगुणविशेषणविशिष्टायां तिथौ आश्वयुजमासमारभ्य माघशुद्ध-सप्तमीपर्यन्तं प्रत्येकं भानुवासरं श्रीसूर्यनारायणमर्चयेत्। सूर्यनारायणस्य चतुरश्रभूमिं गोमयेनोपलिप्य तन्मध्ये कर्णिकायां शोभनमष्टदलं कृत्वा।

* * * *

पुत्रं देहि धनं देहि सौभाग्यं च सुवासिनि।
अवैधव्यं धनं धान्यं देहि मे करुणार्णव॥ प्रार्थनम्।

इति पूजाविधानं संपूर्णम्॥

सूत उवाच—
पितुर्गृहे वर्तमाना कुन्ती व्यासं ददर्श ह।
नमः कृत्वा तु सद्भक्त्या पाद्यार्घ्याचमनीयकम्॥

**End:**

प्रार्थयामास तां देवीं वरं प्राप्य द्विजोत्तमः।
स विप्रस्स्वगृहं गत्वा भार्यायै सर्वमब्रवीत्॥

तदारभ्य कृतं सर्वैः.

---

No. 8571. सूर्याचन्द्रमोव्रतकल्पः.

SŪRYĀCANDRAMOVRATAKALPAḤ.

Pages, 16. Lines, 8 on a page.

Begins on fol. 82*a* of the MS. described under No. 2907.

Complete. From Skandapurāṇa.

This Vrata consists in the worship of the sun and the moon before midday. The month and the day when the Vrata should be commenced depends upon the object which the observer wishes to realize.

**Beginning:**

सङ्कल्पानन्तरं पूजां कुर्यात्।

पद्मासनः पद्मकरो द्विबाहुस्सप्तद्युतिस्सप्ततुरङ्गवाहः।
दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः॥
यदद्य सूर्यो नागा इति ध्यानम्।

* * * *

सूर्याचन्द्रमसोस्तु विशेषः—

चित्रं देवानामिति तपनाय सूर्यमावाहयामि । सोमं धेनुमिति शशिनमावाहयामि । . . . . . . . . . . . . .

इति पूजाविधानं संपूर्णम् ॥

सूत उवाच—

व्रतमन्यत् प्रवक्ष्यामि शृणुध्वमृषिसत्तमाः ।
शङ्करेण पुरा गौर्यै प्रोक्तं लोकहिताय च ॥

* * * *

शङ्कर उवाच—

पुत्रार्थी माघमासे तु पूर्णिमायामुपक्रमेत् ।
धनकामी पञ्चदश्यामूर्जे कुर्यादुपक्रमम् ॥
सर्वकामी माघमासे सप्तम्यां स्नानमाचरेत् ।
पूर्वाह्णे सङ्गवे काले अभ्यर्च्य शशिनं रविम् ॥

**End:**

इति प्रोक्तं शङ्करेण पार्वत्या जातकाम्यया ।
श्रुत्वेदं सुव्रतं विप्राः सर्वान् कामानवाप्स्यथ ॥
ये शृण्वन्तीदमाख्यानं पठन्ति श्रद्धयान्विताः ।
ते सर्वे पापनिर्मुक्ता यान्ति ब्रह्म सनातनम् ।

**Colophon:**

इति स्कन्दपुराणे सूर्याचन्द्रमसोर्व्रतकल्पस्संपूर्णः ॥

---

### No. 8572. सूर्याचन्द्रमोव्रतकल्पः.
### SŪRYĀCANDRAMŌVRATAKALPAḤ.

Pages, 11. Lines, 5 on a page.

Begins on fol. 39a of the MS. described under No. 5773.

Complete. Wants beginning.

Similar to the above; it is stated that the Vrata should be commenced ordinarily on the seventh day of the bright fortnight in the month of Māgha.

**Beginning:**

नमो नमस्तेऽस्तु गदाधराय नमो नमस्तेऽस्तु कलाधराय ।

अथ प्रदक्षिणनमस्कारः ।

नमोऽस्तु सूर्याय नमोऽस्तु भानवे नमोऽस्तु वैश्वानरजातवेदसे ।
त्वमेव चार्घ्यं प्रतिगृह्ण . . . देवादिदेवाय नमो नमस्ते ॥ पुनरर्घ्यम् ।

सुधाकर नमस्तेऽस्तु नमस्ते ज्योतिषां पते ।

गृहाणार्घ्यं मया दत्तं पाहि मां मृगलाञ्छन ॥ चन्द्राय पुनरर्घ्यम् ।

* * * *

माघमासे शुक्लपक्षे सप्तमी प्रवरा तिथिः ।
व्रतप्रारम्भणं कुर्यात् कथाश्रवणपूर्वकम् ॥
वर्षे तु द्वादशे मासे अवधिर्माघसप्तमी ।
प्रत्यहं तु कथां श्रुत्वा सूर्याराधनपूर्वकम् ॥
सूतकादिनिमित्ते च रजोदोषादिकेषु च ।
न त्यजन्ति कथां चैव करिष्ये व्रतमुत्तमम् ॥

**End:**

सूर्यसोमव्रतफलं मया वक्तुं न शक्यते ।
नारी वा पुरुषो वापि यः कुर्याद्व्रतमुत्तमम् ॥
स कामान् सकलान् भुक्त्वा सूर्यलोके महीयते ।
ये पठन्तीदमाख्यानं शृण्वन्ति श्रद्धयान्विताः ॥
सर्वपापविनिर्मुक्ता यास्यन्ति परमं पदम् । इति ।

* * * *

नमस्ते रोहिणीनाथ नमस्ते दिव्यतेजसे ।
दानेनानेन सर्वात्मन्नभीष्टफलदो भव ॥

---

No. **8573.** सूर्याचन्द्रव्रतोद्यापनकल्पः.

SŪRYĀCANDRAVRATŌDYĀPANAKALPAḤ.

Pages, 13. Lines, 7 on a page.

Begins on fol. 27*a* of the MS. described under No. 5765.

Complete. From Bhaviṣyōttarapurāṇa.

On the manner of completing the Vrata mentioned under the previous number.

**Beginning:**

एवंगुणविशेषणविशिष्टायां शुभतिथौ अस्माकं सहकुटुम्बानां . . . सूर्याचन्द्रमसोः प्रीत्यर्थं भविष्योत्तरपुराणोक्तमार्गेण सूर्याचन्द्रव्रतोद्यापनं यथाविधिप्रकारेण करिष्ये । अथाचार्यऋत्विग्ब्रह्मवरणं कृत्वा । कलशपूजां कृत्वा ।

* * * *

भास्करः प्रतिगृह्णाति भास्करो वै ददाति च ।
भास्करस्तारको भा(द्वा)भ्यां भास्करोवै(राव) नमोऽस्तु ते ॥

चन्द्रः—

नमस्ते रोहिणीदेव नमस्ते दिव्यतेजसे ।
दानेनानेन सर्वात्मन् सुप्रीतो भव सर्वदा ॥

इति पूजाविधानं संपूर्णम् ॥

नारद उवाच—

नारदो मुनिशार्दूलः ब्रह्मलोकमुपागतः ।
चतुर्मुखं समासाद्य प्रणिपत्येदमब्रवीत् ॥
तात सर्वसुरश्रेष्ठ सर्वलोकपितामह ।
विदितं मानुषे लोके मानवा बहुसंकटैः ॥

* * * *

कन्यका ऊचुः—

माघमासे शुक्लपक्षे रथसप्तमिकातिथौ ।
कृत्वा पुण्यशुचिस्नानं स्पृष्ट्वा व्रतपरायणः ॥
पूर्वाह्णकेष्वनुष्ठानं दन्तधावनपूर्वकम् ।
विधानं सर्वविप्रेन्द्र सरित्तीरे समाहितः ॥

**End:**

सूर्यचन्द्रप्रभावेण विष्णुलोकं च शाश्वतम् ।
य इदं शृणुयान्नित्यं स याति परमां गतिम् ॥

**Colophon :**

इति भविष्योत्तरपुराणे ब्रह्मनारदसंवादे सूर्याचन्द्रव्रतोद्यापनकल्पः सम्पूर्णः ॥

---

No. 8574. सूर्याचन्द्रव्रतोद्यापनकल्पः.

SŪRYĀCANDRAVRATŌDYĀPANAKALPAḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 21*a* of the MS. described under No. 5773

Incomplete.

Similar to the above.

**Beginning :**

एवंगुणतिथौ अस्माकं स—ह्यार्थं धर्मार्थ . . . . . .

. . . इह जन्मनि – पापक्षयार्थम् इह लोके पुत्रपौत्रादिभिस्सह साग्रशतवर्षपर्यन्तं चिरकालसकलसंपत्सुखमनुभूय अवाप्तसमस्तकामयोः ब्रह्मेन्द्रादिसमस्तगीर्वाणस्तूयमानयो. सूर्याचन्द्रमसोः सालोक्यसामीप्यसारूप्यसायुज्यादिचतु – र्मो – र्थ. श्रीसूर्यचन्द्रावुद्दिश्य श्रीसूर्यचन्द्रप्रीत्यर्थं भविष्यत्पुराणोक्तप्रकारेण श्रीसूर्यचन्द्रव्रतोद्यापनं करिष्ये । पुण्याहं कृत्वाचार्यब्रह्मवरणं कलशपीठार्चनं शङ्खपूजां च कुर्यात् ।

* * * *

एवं प्रकारेण चतुर्यामान् पूजां कृत्वा नित्यकर्माणि निर्वर्त्य देवपूजां कृत्वा होमं कृत्वा गोदानं कुर्यात् । कलशमार्जनं कृत्वा प्रतिमादानम् ।

पार्वत्युवाच—

कैलासशिखरे रम्ये पार्वतीपरमेश्वरौ ।
ब्रह्मा विष्णुश्च सहितौ इन्द्राग्नियमनैरृताः ॥

**End :**

कुलवृद्धिं भ्रातृवृद्धिं सुवासित्वमवन्ध्यताम् ।
सर्वदानफलं तद्वत् सर्वव्रतफलं तथा ॥

No. 8575. सोमवत्यमावास्याव्रतकल्पः.

SÔMAVATYAMĀVĀSYĀVRATAKALPAḤ.

Pages, 11. Lines, 6 on a page.

Begins on fol. 32a of the MS. described under No. 3105.
Complete. From Bhaviṣyôttarapurāṇa.
Similar to the work described under No. 8195.

**Beginning:**

शरतल्पगतं भीष्ममुपगम्य युधिष्ठिरः ।
कृतप्रणामो धर्मात्मा हितं वचनमुक्तवान् ॥

युधिष्ठिर उवाच—

हतेषु कुरुमुख्येषु भीमसेनेन कोपिना ।
तथा परेषु (मत्तेषु) हतेषु युधि जिष्णुना ॥

* * * *

शृणु राजन् प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
यस्याचरणमात्रेण सन्ततिश्चिरजीविनी ॥

अमावास्या यदा पार्थ सोमवारयुता भवेत् ।
तस्यामश्वत्थमागत्य पूजयित्वा जनार्दनम् ।

अष्टोत्तरशतं कुर्यात् तस्मिन् वृक्षे प्रदक्षिणम् ।

**End:**

पूर्णाहुतिं च जुहुयात् गां च दद्यात्पयस्विनीम् ।
द्वादश ब्राह्मणा भोज्या घृतपायसलड्डुकैः ॥

दश दानानि वस्त्राणि तेभ्यो दद्याच्च दक्षिणाम् ।
प्रणम्य दण्डवद्भूमौ प्रार्थयित्वा विसर्जयेत् ॥

**Colophon:**

इति भविष्योत्तरे सोद्यापनं सोमवत्यमावास्याव्रतम् ॥

No. 8576. सोमवारव्रतकल्पः.

SŌMAVĀRAVRATAKALPAḤ

Pages, 7. Lines, 5 on a page.

Begins on fol. 21*b* of the MS. described under No. 7758, and not on fol. 21*a* as shown therein.

Complete. From Skāndapurāṇa.

This Vrata consists in worshipping Śiva and Pārvatī on Mondays. The gift of a lamp in the month of Kārttika also forms a part of the observance of the Vrata.

**Beginning:**

उमया सहितं देवं प्रसन्नं परमेश्वरम् ।
अङ्काधिरोपितस्कन्दहेरम्बं वृषवाहनम् ॥
व्याघ्रचर्मपरीताङ्गं सोमं सोमविभूषणम् ।
ध्यायेच्चतुर्भुजं शम्भुं चन्द्रमौक्ति(क)त[म]प्रभम् ॥

उमामहेश्वराय नमः ध्यानं समर्पयामि ।

**End:**

दीपदानमन्त्रः—

शालिपिष्टे स्थिता गौरी दीप्ता साक्षान्महेश्वर ।
कार्त्तिक्यां दीपदानेन प्रीतो भव सदाशिव ॥

**Colophon:**

इति स्कान्दे पुराणे सोमवारव्रतकल्पस्संपूर्णः ।

पूजयेच्चार्पयेदर्घ्यं मासनक्तव्रती नृप ।
पार्वतीकान्तदेवेश पद्मजार्च्याङ्घ्रिपङ्कज ॥ इदमर्घ्यम् ।
अर्घ्यं गृहाण दैत्यारे नक्तं चेन्दुउ(न्दोरु)मापते । इदमर्घ्यम् ॥

---

No. 8577. सोमवारव्रतकल्पः.

SŌMAVĀRAVRATAKALPAḤ.

Pages, 16. Lines, 6 on a page.

Begins on fol. 51*a* of the MS. described under No. 8177.

Complete.

Similar to the above.

**Beginning:**

सोमवारव्रतं शम्भो करिष्ये तव सन्निधौ ।
निर्विघ्नं कुरु मे देव सर्वाभीष्टफलप्रद ॥

श्रीउमामहेश्वराभ्यां नमः, शिवाय नमः, रुद्राय नमः, पशुपतये नमः, नीलग्रीवाय नमः . . . . . . पार्वतीपतये नम इति पुष्पाञ्जलिं दद्यात् ।

ब्रह्मादिदेवदेवेशं त्रिणेत्रं चन्द्रशेखरम् ।
व्याघ्रचर्माम्बरधरं सोममूर्तिधरं विभुम् ॥
मृगटङ्कधरं नित्यं वरदाभयपाणिन(क)म् ।
भस्मोद्धूलितसर्वाङ्गं नागयज्ञोपवीतिनम् ॥
चतुर्भुजमुदाराङ्गं नीलकण्ठमुमापतिम् ।
वरदं सर्वदेवानां ध्यायेदेकाग्रमानसः ॥

श्रीउमामहेश्वराभ्यां नमः —ध्यानम् । अथ पीठपूजा

**End:**

दुःखदारिद्र्यरोगैश्च दग्धोऽहं पार्वतीप्रभो ।
इदमर्घ्यं प्रदास्यामि सोमो यच्छतु मे शिवम् ॥

**Colophon:**

सोमवारव्रतकल्पः ॥

---

No. **8578.** सोमवारव्रतकल्पः.

SŌMAVĀRAVRATAKALPAḤ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 57*a* of the MS. described under No. 8231.

Complete.

Similar to the above.

**Beginning:**

सोमवारव्रतं शम्भो करिष्ये तव सन्निधौ
निर्विघ्नं कुरु देवेश सर्वाभीष्टफलप्रद ॥

श्रीउमामहेश्वराय शिवाय रुद्राय पशुपतये . . . पार्वती
पतये—इति पुष्पाञ्जलिं दद्यात् ।

ब्रह्मादिदेवदेवेशं त्रिणेत्रं चन्द्रशेखरम् ।
व्याघ्रचर्मधरं देवं सोममूर्तिधरं विभुम् ॥
वरदं सर्वदेवानां ध्यायेच्चैकाग्रमानसः ।

आधारशक्त्यै नमः ।

**End:**

दुःखदारिद्र्यनाशार्थं दासोऽहं पार्वतीपते ।
शिवप्रीतिकरं ज्ञानं सोमे ज्ञानं प्रयच्छ मे ॥ अर्घ्यम् ।

---

No. 8579. सोमवारव्रतकल्पः.

SŌMAVĀRAVRATAKALPAḤ

Pages, 4. Lines, 6 on a page.

Begins on fol. 58a of the MS. described under No. 7758.
Incomplete.
Similar to the above

**Beginning:**

सनत्कुमार उवाच—

सोमवारस्य माहात्म्यं कथयस्व महामुने ।
किं पुण्यं किं फलं नृणां ब्रूहि सर्वमशेषतः ॥

श्रीनन्दीश्वरः—

साधु पृष्टोऽसि (स्मि) धर्मज्ञ सोमवारव्रतं शुभम् ।
शिवतुष्टिप्रदं सम्यक् शिवलोके महीयते ॥

**End:**

तिथिष्वन्येषु या पूजा प्रोक्ता पुण्यप्रदायिनी ।
सोमवारे तु नियमात् तदा पूजादिभिर्भवेत् ॥

---

### No. 8580. सोमवारव्रतकल्पः.
### SŌMAVĀRAVRATAKALPAḤ.

Pages, 6. Lines, 6 on a page.
Begins on fol. 24a of the MS. described under No. 8240.
Complete.
Similar to the above.
See under the previous number for the beginning.

**End:**

संसारघोररूपेऽस्मिन् मग्नमुद्धर मां प्रभो ।
व्रतेनानेन सुप्रीतः सर्वदा भव शङ्कर ॥

**Colophon:**

सोमवारव्रतकल्पस्सम्पूर्णः ॥

कैलासवासो गौरीशो भगवान् भगवत्प्रभुः ।
चराचरात्मकं लिङ्गं पापं हरतु शङ्करः ॥ लिङ्गदानमन्त्रः।
दीपं ज्ञानप्रदं नित्यमन्धकारनिवारणम् ।
तस्मादस्य प्रदानेन अत(द)श्शान्तिं प्रयच्छ मे ॥

---

### No. 8581. सोमवारव्रतकल्पः.
### SŌMAVĀRAVRATAKALPAḤ.

Pages, 26. Lines, 4 on a page.
Begins on fol. 1a of the MS. described under No. 8314.
Complete.
Similar to the above.

**Beginning:**

सोमवारव्रतं शम्भो करिष्ये तव (सन्निधौ) ।

उमया सहितं देवं प्रसन्नं परमेश्वरम् ।
आकाशरू(गङ्गाधिरो)पितस्कन्दहेरम्बं वृषवाहनम् ॥
ब्रह्मादिवन्द्यपादाब्जं त्रिणेत्रं चन्द्रशेखरम् ।
व्याघ्रचर्मधरं देवं सोममूर्तिधरं शिवम् ॥
मृगटङ्कधरं नित्यं वरदाभयपाणिकम् ।
भस्मोद्धूलितसर्वाङ्गं नागयज्ञोपवीतिनम् ॥
चतुर्बाहुमुदाराङ्गं नलिकण्ठमुमापतिम् ।
वरदं सर्वदेवानां मनसा . . . . ॥
श्रीमहादेवाय नमः ध्यानम् ॥

**End:**

यवैस्तण्डुलसंयुक्तैः तिलगोधूमयावकैः ।
तावद्वर्षसहस्राणि शिवलोके महीयते ॥
कन्यादानशतं तुरङ्गनियुतं गोकोटिदानं फलं
श्रीविष्णुप्रतिमानरूपशतकं हेमाद्रिकोटीशतम् ।
स्यादेकादशलक्षजं प्रतिदिनं चाराधयेच्छ्रीश्वरम्
एतत्पुण्ययुतेन मे गिरिसुते सोमे च नक्तं फलम् ॥

**Colophon:**

सोमवारव्रतकल्पस्समाप्तः ॥

---

No. **8582.** सोमवारव्रतकल्पः.

SŌMAVĀRAVRATAKALPAḤ.

Pages, 6. Lines, 12 on a page.

Begins on fol. 14*a* of the MS. described under No. 8198.

Complete.

Same work as the above

## No. 8583. सोमवारव्रतकल्पः.

## SÔMAVÂRAVRATAKALPAḤ.

Pages, 9. Lines, 5 on a page.

Begins on fol. 21*a* of the MS. described under No. 8258.

Complete.

Same work as the above.

---

## No. 8584. सोमवारव्रतकल्पः.

## SÔMAVÂRAVRATAKALPAḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 65*a* of the MS. described under No. 3055.

Complete.

Similar to the above.

**Beginning:**

ईश्वरः—

प्रवक्ष्याम्यथ देवेश सोमवारव्रतं शुभम् ।
सकृत्कृतेन मनसा सोमलोकं स गच्छति ॥
प्रक्रान्ते कार्त्तिके माघे मार्गशुक्लदिने भवेत् ।
प्रथमं सोमवारस्तु तद्भक्तेनैव पूजयेत् ॥
यदा श्रद्धा भवेत् कर्तुः सोमवारव्रतं प्रति ।
तदा पूजां कारयित्वा ब्राह्मणार्चनमारभेत् ॥
माघे मार्गे यथा चैत्रे गृह्णीयात् सोमवारकम् ।
यस्मिन्मासे आरभेत तस्मिन् तत् कारयेद्व्रतम् ॥

**End:**

चतुर्वेदेषु विप्रेषु प्रदत्तस्य हि यत् फलम् ।
तत् फलं लभते देवि मानवो भक्तिसंयुतः ॥

**Colophon:**

इति श्रीसोमवारव्रतकल्पसंपूर्णः ॥

No. 8585. सोमवारव्रतकल्पः.

SŌMAVĀRAVRATAKALPAH.

Pages, 20. Lines, 7 on a page.

Begins on fol. 34a of the MS. described under No. 307, wherein this is shown under the name of Sōmavāravratamāhātmya.

Adhyāyas 19 and 20 in the Hālāsyamāhātmya of Agastyasaṁhitā in Skāndapurāṇa.

Similar to the above.

**Beginning:**

. . . . . शृणुध्वं मुनिपुङ्गवाः ।
सोमवारव्रतेनापि यथाविधिकृतेन च ॥
प्रातस्सायञ्च कृतया सोमसुन्दरसेवया ।
सर्वासां सम्पदां सिद्धिस्तेजसामपि (जायते) ॥

* * * *

अधुना संप्रवक्ष्यामि सोमवारव्रतं महत् ।
यस्यानुष्ठानमात्रेण शम्भोस्सायुज्यरूपिणी ॥
दुर्लभासीच्च जन्तूनां सुलभा मुक्तिरुत्तमा ।

* * * *

कार्त्तिके मासि मार्गे वा मासेष्वन्येषु वा पुनः ।
कर्तुं श्रद्धा भवेद्यस्मिन् सोमवारव्रतं प्रति ॥
मलादिदोषरहिते तस्मिन्मासे समारभेत् ।
सोमवारव्रतविधौ मासाश्चान्द्रमसा वराः ॥

* * * *

**Colophon:**

इति स्कान्दे पुराणे अगस्त्यसंहितायां हालास्यमाहात्म्ये सोमवारव्रतविधिर्नाम एकोनविंशोऽध्यायः ॥

**End:**

मतिन्ददाति यश्चापि व्रतस्य करणानि च ।
स्वर्गे वसन्ति ते सर्वे यावदिन्द्राश्चतुर्दश ॥

**Colophon:**

इति अगस्त्यसंहितायां हालास्यमाहात्म्ये विंशोऽध्यायः ॥

इत्थमुग्रो महादेवस्सुन्दरेशशिवात्मजः ।
सोमवारव्रतश्चक्रे सोमसुन्दरसन्निधौ ॥

* * * *

सोमवारे च यो भक्त्या पूजयेत्सोमसुन्दरम् ।
सुमहत्या(हापा)तकान्मुक्तस्सुमहत्पदमाप्नुयात् ॥

---

## No 8586. सोमवारव्रतोद्यापनकल्पः.

## SŌMAVĀRAVRATŌDYĀPANAKALPAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 68*a* of the MS. described under No. 3055.

Complete.

On the manner of completing the Vrata mentioned under the previous number.

**Beginning:**

उद्यापनम् —

व्रतस्योद्यापनविधिं शृणु देवि प्रयत्नतः ।
मयोक्तेन विधानेन व्रतं संवत्सरं चरेत् ॥
व्रतान्ते प्रतिमां कृत्वा रौप्यसोमं चतुर्भुजम् ।
कर्षमात्रसुवर्णेन तदर्धार्धेन तत्र तु ॥
त्रयोदशघटान् श्वेतवस्त्रयुग्मोपशोभितान् ।
संपूर्णानि च भक्ष्यैश्च वंशपात्राणि पार्वति ॥

**End:**

इदं ददौ च यश्चापि व्रतस्य करणाय च ।
एते(व)सन्ति मे श्लो(लो)के यावदिन्द्राश्चतुर्दश ॥

**Colophon:**

इति कामिकातन्त्रे सोमवारव्रतोद्यापनकल्पस्संपूर्णः ॥

कन्यादानशतं सुवर्णसहितं गोकोटिदानं फलं
श्रीविष्णुप्रतिरूपदानशतजं हेमाद्रिकोटीव्रतम् ।

कोट्येकादशलक्षजं हरिदिने चाराधने श्रीहरेः
एतत्पुण्यगुणाधिकं गिरिसुता(ते)सोमे च नक्तं फलम् ॥

---

No. 8587. सोमवारव्रतोद्यापनकल्पः.

SŌMAVĀRAVRATŌDYĀPANAKALPAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 54*a* of the MS. described under No 7758.

Complete. From Skāndapurāṇa.

Similar to the above.

**Beginning:**

(सोम)न(क्त)व्रतं तच्च परिपूर्तिर्भवेन्मम । व्रतग्रहणमन्त्रः —

सोमवारे दिवा स्थित्वा निराहारो महेश्वर ।
नक्तं भोक्ष्यामि देवेश प्रसीद शशिशेखर ॥

इति मन्त्रं पठित्वा तु गृहीत्वा नियमं व्रती ।
पूजयेन्नक्तवेलायामृक्षाणां दर्शने सति ॥

* * * *

उद्यापनविधिं वक्ष्ये सोमनाथव्रतस्य तु ।
प्रारब्धे तद्व्रतश्चैतत् माघमासेऽथ चैत्रके ॥
शुद्धकाले यदा वापि कार्त्तिके च विशेषतः ।
यन्मासे प्रारभेदेतत् तस्मिन्नुद्यापनञ्चरेत् ॥
वर्षे वा वर्षमध्ये वा प्रारम्भे वापि कारयेत् ।
वर्षमेकं व्रतं कृत्वा षण्मासं वा द्विमासकम् ॥
अशक्तः कार्त्तिके कृत्वा उद्यापनमथाचरेत् ।

**End:**

हेमाद्रिव्रतकोटिदानफलदं नृणां यदेकादशी
चीर्णा तच्छतवासरैकफलदा काचिज्जयन्ती तिथिः ।

विख्याता शिवरात्रिपर्वणि भवेत्पुण्यं जयन्तीशते
तत्तादृक् शतकं फलमिति सूत्रे(लं जनयते)तत्सोमवारव्रते ॥

**Colophon:**

इति श्रीस्कान्दपुराणे उमामहेश्वरसंवादे सोमवारव्रतोद्यापनकल्पः ॥

---

No. 8588. सोमवारव्रतोद्यापनकल्पः.

SŌMAVĀRAVRATŌDYĀPANAKALPAḤ.

Pages, 17. Lines, 7 on a page.

Begins on fol. 124*b* of the MS. described under No. 775-.
Complete.
Similar to the above.

**Beginning:**

अथ सोमवारव्रतोद्यापनविधिः । अपरः—

कैलासशिखरे रम्ये नानारत्नप्रभोज्ज्वले ।
सिंहासने समासीनं शंकरं लोकशंकरम् ॥
बालेन्दुशेखरं देवं त्रिणेत्रं शूलधारिणम् ।
व्याघ्रचर्माम्बरधरं भस्मोद्धूलितविग्रहम् ॥
निरीक्ष्य गिरिजा साध्वी लोकानुग्रहकाम्यया ।
सोमवारस्य माहात्म्यं व्रतस्योद्यापनं विधिम् ॥

* * *

कार्तिक्यामिन्दुवारेण कर्मण्यनुमते दिने ।
मार्गशीर्षे तथा माघे वैशाखे शुक्लपक्षके ॥
चतुर्दश्यान्तु कर्तव्यममायामिन्दुवासरे ।
उद्यापनविधिं तत्र प्रशस्तमतिदुर्लभम् ॥

**End:**

यो दद्यान्मेदिनीं मर्त्यः तस्य पुण्यशतस्य च ।
एतानि सर्वपुण्यानि शतकोटिगुणानि च ॥

**Colophon:**

इति स्कान्दे पुराणे प्रतिसर्गलक्षणकाण्डे पश्चांशे चतुर्थोध्याये उमा महेश्वरसंवादे सोमवारव्रतोद्यापनं नाम पञ्चविंशस्सर्गः ॥

---

No. 8589. सोमवारव्रतोद्यापनकल्पः.

SÔMAVÂRAVRATÔDYÂPANAKALPAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 4*a* of the MS. described under No. 8233.

Complete. From Śivarahasya.

Similar to the above.

**Beginning:**

त्रियम्बकेति मन्त्रेण होमयेच्च तिलायुतम् ।
अग्निशङ्करयोरृग्भिः . . . हावयेत्तिलान् ॥
ततो जयादिकं कुर्याद्धोमशेषं समापयेत् ।
पूर्णाहुतिं ततो हुत्वा प्रणीतामार्जनं चरेत् ॥
अग्निं प्रदक्षिणीकृत्य नमस्कारं ततो न्यसेत् ।
ब्राह्मणेभ्यो यथाशक्त्या दक्षिणाञ्च प्रदापयेत् ॥

**End:**

तस्माद्दुःखविनिर्मुक्तः सर्वभोगसमन्वितः ।
शिवलोके महाभोगान् प्राप्य तत्र शिवं व्रजेत् ॥

**Colophon:**

इति शिवरहस्ये सोमवारव्रतोद्यापनं संपूर्णम् ॥

---

No. 8590. सोमवारव्रतोद्यापनकल्पः.

SÔMAVÂRAVRATÔDYÂPANAKALPAḤ.

Pages, 5. Lines, 26 on a page.

Begins on fol. 12*a* of the MS. described under No. 2288.

Complete.

Similar to the above.

**Beginning:**

शिव सर्वेश देवेश सोमवारव्रतं प्रति ।
उद्यापनव्रतं सम्यक् कथयस्व विधानतः ॥

ईश्वरः—

साधु पृष्टं महादेवि सर्वेषां च कुतूहलम् ।
सोमवारव्रतस्यास्य वक्ष्याम्युद्यापनं शृणु ॥
एकभुक्तं च नक्तं च निशि भुक्तमुपोषितम् ।
एवं चतुर्विधं ज्ञेयं देहदार्ढ्यानुसारतः ॥
चरेद्द्वादश वर्षाणि सर्वकामार्थसिद्धये ।
संप्राप्ते द्वादशे वर्षे अन्ते चेन्दुसुवासरे ॥
विधायोद्यापनं कर्म सर्वकामार्थसिद्धये ।
मामेवाप्नोति तत्पश्चात् पुनरेकं ब्रवीमि ते ॥
कार्त्तिकं मासमारभ्य द्वादशमासमाचरेत् ।

**End:**

तेषां जन्मसहस्रेऽपि न लोको जायते क्वचित् ॥
न दारिद्र्यं न रोगश्च सन्ततिच्छेद एव च ।
कुलकोटिं समुद्धृत्य शिवलोके सदास्थिताः ॥

**Colophon:**

इति स्कान्दपुराणोक्तसोमवारव्रत(तोद्यापन)कल्पस्समाप्तः ॥

---

No. 8591. सोमवारव्रतोद्यापनकल्पः.

SŌMAVĀRAVRATŌDYĀPANAKALPAḤ.

Pages, 11. Lines, 7 on a page.

Begins on fol. 105*a* of the MS. described under No. 2907
Complete. From Skāndapurāṇa.
Same as the above.

No. 8592. सोमवारव्रतोद्यापनकल्पः.
SŌMAVĀRAVRATŌDYĀPANAKALPAḤ.

Pages, 9. Lines, 9 on a page.

Begins on fol. 1*b* of the MS. described under No. 8199
Complete.
Similar to the above.

**Beginning:**

आदौ विघ्नेश्वरपूजां कृत्वा पुण्याहवाचनं कुर्यात् ।

कल्पोक्तप्रकारेण पूर्ववन्नित्यपूजां कृत्वा . . . स्कान्दपुराणोक्त-
प्रकारेण सोमवारव्रतोद्यापनं करिष्ये—

सोमवारव्रतं शम्भो करिष्यामि तवाज्ञया ॥
तत्समग्रफलावाप्त्यै कुर्यामुद्यापनं विभो ॥

**End:**

उपायनदानदशदानानि कुर्यात् । अथ दम्पतीपूजां च भूरि
दक्षिणां ब्राह्मणभोजनं च कुर्यात् ॥

**Colophon:**

सोमवारव्रतोद्यापनं समाप्तम् ॥

---

No. 8593. सोमवारव्रतोद्यापनकल्पः.
SŌMAVĀRAVRATŌDYĀPANAKALPAḤ.

Pages, 11. Lines, 5 on a page.

Begins on fol. 61*a* of the MS. described under No. 8200.
Complete.
Similar to the above.

**Beginning:**

कार्त्तिक्यां सोमवारे च शुक्लपक्षे विशेषतः ।
अश्वयुङ्मासि वैशाखे माघमे कृष्णपक्षके ॥
आद्ये मध्ये ततोऽन्ते वा कुर्यादुद्यापनं शुभम् ।
व्रतोद्यापनहीनं तु निष्फलं भवति ध्रुवम् ॥

तस्मात्सर्वप्रयत्नेन उद्यापनमथाचरेत् ।
वृश्चिके मासि विप्रेन्द्र आद्यन्ते सोमवासरे ॥
उद्यापनं प्रकर्तव्यमथ वा फाल्गुने मतम् ।
सर्वमासेषु सर्वेषु कर्तव्यं कर्तुरिष्टदम् ॥

* * * *

एकवर्षं द्विवर्षं वा वर्षत्रयमथापि वा ।
वर्षद्वादशपर्यन्तं क्रमात्सङ्कल्पमाचरेत् ॥

**End:**

वस्त्रादि दक्षिणां दत्वा नमस्कारं प्रदक्षिणम् ।
फलदानं ततः कुर्यात्पश्चाद्ब्राह्मणभोजनम् ॥

**Colophon:**

इति ब्रह्मोत्तरखण्डे सोमवारव्रतमाहात्म्ये सीमन्तिनीकृतप्रशंसायां गौरीशङ्करसंवादे अष्टमोऽध्यायः ॥

एवं या कुरुते नारी सर्वपापैः प्रमुच्यते ।
सर्वान् कामानवाप्नोति सर्वमङ्गलवर्धनम् ॥
पशुपुत्रं च सौभाग्यं लभते वाञ्छितं फलम् ।
दश वर्षसहस्राणि मम लोकमवाप्नुयात् ॥

**Colophon:**

इति सोमवारव्रतोद्यापनविधिस्समाप्तः ।

---

No. **8594.** सोमवारव्रतोद्यापनकल्पः.

SŌMAVĀRAVRATŌDYĀPANAKALPAH.

**Pages, 21. Lines, 26 on a page.**

Begins on fol. 1*b* of the MS. described under No. 2288.
Complete.
Similar to the above.

**Beginning :**

आदौ पुण्याहं कृत्वा मण्डपादिकं यथोक्तलक्षणं विधाय, तद्यथा—

नवपञ्चत्रिहस्तैर्वा मण्डप कारयेद्गुरुः ।
नवपञ्चकृतं ज्ञेयं द्वादशस्तम्भसंयुतम् ॥
चतुस्तम्भसमायुक्तं त्रिहस्तकृतमण्डपम् ।
एतेषां मण्डपानां च पञ्चहस्तोन्नतं विदुः ॥

**End :**

भक्ष्यादिसहितेन रसषट्कसमन्वितेन सव्यञ्जनेन घृतपायसयुक्तेन मृष्टान्नेन तोषयित्वा ताम्बूलानि दत्वा मन्त्राक्षतानि संगृह्य तेषामनुज्ञां सम्प्राप्य आगन्तुकैरन्नादिभिस्सह पारणं कुर्यात् ॥

**Colophon :**

इति श्रीस्कन्दपुराणोक्तसोमवारव्रतोद्यापनपद्धतिस्समाप्ता ॥

---

No. 8595. सोमवारव्रतोद्यापनकल्पः.
SŌMAVĀRAVRATŌDYĀPANAKALPAḤ

Pages, 2. Lines, 7 on a page.

Begins on fol. 97*a* of the MS. described under No. 2840.
Complete.
Similar to the above.

**Beginning :**

सोमवारव्रतस्याच(स्य) समापनविधिं परम् ।
कथयस्व गणेशान नन्दीश्वर महाप्रभो ॥

नन्दिकेश्वर उवाच—

चर्यं व्रतमिदं कृत्वा उद्यापनविधिर्भवेत् ।
उत्तरायणतो(गे) सूर्ये शुक्लपक्षे शुभे दिने ॥
यावज्जीवं पुनः कुर्यात् सोमवारे शिवार्चनम् ।
संवत्सरान्ते विधिवदाचार्यं वरयद्व्रती ॥

पुष्पमण्टपिकायाञ्च सर्वभोगसमान्वितम् ।
तन्मध्ये स्थापयेत् कुम्भं चारुवस्त्रेण वेष्टितम् ॥

**End:**

एवं कृत्वा व्रती सम्यक् कृतकार्यश्च पारणम् ।
एवं कृत्वा नरः कुर्वन् शिवलोकमवाप्नुयात् ॥
व्रतानां प्रवरं ह्येतत् देवानां प्रवरो हरः ।
अतस्सर्वात्मना कार्यं व्रतमेतद्विजर्षभ ॥
अभियोगकरं ह्येतत् पुत्रपौत्रप्रवर्धनम् ।
एवं कृत्वा पुरा देवी अर्धनारीश्वरी भवेत् ॥

**Colophon:**

इति लैङ्ग्य(ङ्ग)सारे सोमवारव्रतोद्यापनविधिस्समाप्तः ॥

---

## No. 8596. सोमवारार्घ्यप्रदानम्.
## SŌMAVĀRĀRGHYAPRADĀNAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 79*b* of the MS. described under No. 430.

Complete.

Gives the stanzas which are enjoined to be repeated at the time of giving the water-offerings in connection with the Sōmavāravrata.

**Beginning:**

इन्दुवारे दिवा स्थित्वा निराहारो महेश्वर ।
नक्तं भोक्ष्यामि देवेश अर्पयामि सदाशिव ॥
श्रीसदाशिवाय नमः इदमर्घ्यं समर्पयामि ।

**End:**

अनेनार्घ्यप्रदानेन भगवान् सर्वात्मकः श्रीसदाशिवः प्रीयतां श्रीसदाशिवः प्रीतो वरदो भवतु ॥

आत्मनो द्विगुणच्छाया पश्चात्सूर्यं(र्ये)प्रतिष्ठितं(ता) ।
तन्नक्तं नक्तमित्याहुः न नक्तं निशि भोजनम् ॥

## No. 8597. सोमवाराश्वत्थपूजाविधिः.

## SŌMAVĀRĀŚVATTHAPŪJĀVIDHIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 50*a* of the MS. described under No. 7233.
Complete.

This is also called Amāsōmavārāśvatthapūjāvidhi and is similar to Amāsōmavāravratakalpa described under No. 8199.

**Beginning:**

सोमवारामावास्यायां पूजाविधिः—

अमायुक्तसोमवारे अश्वत्थनारायणपूजां करिष्ये—इति सङ्कल्प्य,

अश्वत्थ सर्वपापानि शतजन्मार्जितानि च ।
नुदस्व त्वं वृक्षराज सर्वैश्वर्यप्रदायक ॥ ध्यानम् ।
वृन्दारकैस्सदा सेव्यं शङ्खचक्रगदाधरम् ।
आवाहयामि वृक्षेन्द्र त्वयि नारायणं विभुम् ॥ आवाहनम् ।

**End:**

कदलीनारिकेलादिगुडमध्वाज्यसंयुतम् ।
भक्ष्यभोज्यसमायुक्तं नैवेद्यं प्रतिगृह्यताम् ॥ नैवेद्यम् ।
. ताम्बूलनीराजनमन्त्रपुष्पं कुर्यात् ॥

**Colophon:**

अमासोमवाराश्वत्थपूजाविधिस्समाप्तः ॥

---

## No. 8598. स्वर्णगौरीव्रतकथा.

## SVARṆAGAURĪVRATAKATHĀ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 46*a* of the MS. described under No. 8171.
Complete. From Skāndapurāṇa.

Gives the story illustrating the importance of the Svarṇagaurīvrata.

**Beginning:**

स्कन्द उवाच—

पुरा कैलासशिखरे सिद्धगन्धर्वसेविते ।
उमया सहितः स्कन्दः पप्रच्छ शिवमव्ययम् ॥
व्रतं कथय देवेश पुत्रपौत्रप्रवर्धनम् ।
साधु पृष्टं महाभाग कथयामि षडानन ॥
स्वर्णगौरीव्रतं नाम सर्वसंपत्करं नृणाम् ।

* * * *

तावूचुर्योषितस्सर्वा भाद्रे मासि तृतियके ।
प्रारब्धव्यं व्रतमिदं गौर्याष्षोडश वत्सरान् ॥

**End:**

यश्शोभनं व्रतमिदं कथितं शिवेन
कुर्यान्मम प्रियतरो वनिता च गौर्याः ।
प्राप्य श्रियं समधिकां भुवि शत्रुसङ्घान्
निर्जित्य निर्मलपदं स च सा च याति ॥

**Colophon:**

इति स्कान्दे पुराणे गौरीखण्डे स्वर्णगौरीकथा समाप्ता ॥

---

### No. 8599. स्वर्णगौरीव्रतकथा.

SVARṆAGAURĪVRATAKATHĀ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 25*a* of the MS. described under No. 8239.

Complete.

Same as the above.

---

### No. 8600. स्वर्णगौरीव्रतकथा.

SVARṆAGAURĪVRATAKATHĀ.

Pages, 6. Lines, 4 on a page.

Begins on fol. 188*b* of the MS. described under No. 1116.

Complete.

Same as the above.

## No. 8601. स्वर्णगौरीव्रतकल्पः.
## SVARṆAGAURĪVRATAKALPAḤ

Pages, 5. Lines, 7 on a page.

Begins on fol. 96b of the MS. described under No. 2907.

Complete.

Deals with the manner of conducting the worship connected with the Vrata. Contains also the story described under the last number.

**Beginning :**

चतुर्भुजां त्रिणेत्रां च सार्धचन्द्रविभूषिताम् ।
ध्यायेद्गौरी महादेवी चन्द्रकान्तसमप्रभाम् ॥ ध्यायामि ।
लोकमाते(त)र्मनोरम्ये सृष्टिस्थित्यन्तकारिणि ।
आवाहयामि देवि त्वां मातरं शिववल्लभाम् ॥ आवाहयामि ।

See under number 8598 for the end.

---

## No. 8602. स्वर्णगौरीव्रतकल्पः.
## SVARNAGAURĪVRATAKALPAḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 79a of the MS. described under No. 8179.

Incomplete.

Similar to the above. It is stated that the Vrata should be commenced on the second day of the Śrāvaṇa month and should be observed for a period of 16 years. The completion of the Vrata should be celebrated on that Sunday of the Māgha month which falls near the 7th day of the bright fortnight.

**Beginning :**

गौरि कल्याणि वरदे कामाक्षी वीत(दीन)वत्सला ।
उमाया(करोम्या)वाहनंचैव प्रसीद सुरवन्दिते ॥ आवाहनम् ।
दिव्यरत्नसहस्राढ्यदिव्यमुक्तातिशोभितैः ।
चारुसिंहासनन्देवि अर्पयामि सदाशिवे ॥

* * * *

श्रीगौरी प्रतिगृह्णाति स्वर्णगौरी ददाति च ।
श्रीगौरी तार(रि)कोभाभ्यां श्रीगौरी संप्रसीदते(तु) ।।

श्रियै जातेति नीराजनम् । गौरी मिमायेति मन्त्रपुष्पम् ।

सनत्कुमार उवाच—

पुरा कैलासशिखरे सिद्धगन्धर्वसेविते ।
उमया सहितं स्कन्दः पप्रच्छ शिवमव्ययम् ॥

* * * *

ता ऊचुर्योषितस्सर्वा नभोमासे द्वितीयके ।
प्रारब्धव्यं व्रतमिदं गौर्याः षोडशवार्षिकम् ॥

**End:**

तासामुद्यापनन्दद्याद्व्रतस्य परिपूर्तये ।
वर्षे वर्षे तु कर्तव्यं व्रतं षोडशवार्षिकम् ॥

* * *

एवङ्कुर्याद्व्रती सम्यक् प्रत्येकं भानुवासरे ।
माघमासे शुक्लपक्षे सप्तमी यावदन्तिके ॥
षष्ठ्यामुपोष्य विधिवत् सप्तम्यामुदये शुचिः ।
पूर्ववद्रविमभ्यर्च्य प्रतिमां वस्त्रसंयुताम् ॥
आचार्येणाग्निमादाय होमं कुर्याद्विचक्षणः ।
सघृतं पायसान्नञ्च जुहुयात्सौरमन्त्रतः ॥

* * * *

स्वर्णमाघफलं लब्धं येन केन व्रतोत्तमे ।
महादेव्या फलं दत्तं पार्वत्या कृपया मम ॥

---

No. 8603. स्वर्णगौरीव्रतकल्पः.

SVARṆAGAURĪVRATAKALPAḤ.

Pages, 16. Lines, 6 on a page.

Begins on fol. 9*a* of the MS. described under No. 8238.

Complete.

Similar to the above. The Vrata is considered to confer long life on one's husband.

**Beginning:**

एवंगुणविशेषणविशिष्टायां शुभतिथौ वर्षे वर्षे प्रयुक्ताचरितसंपूर्णसमग्रसकलफलावाप्त्यर्थं दीर्घसौमङ्गल्यप्राप्त्यर्थं कल्पोक्तप्रकारेण स्वर्णगौरीव्रतं करिष्ये ।

कलशपूजां कुर्यात् ।
ध्यायेच्चतुर्भुजां देवीं चन्द्रार्धकृतशेखराम् ॥
सर्वाभरणसंयुक्तां भक्ताभीष्टवरप्रदाम् ।
स्वर्णगौर्यै नमः ध्यायामि ।

* * * *

कात्यायन्यै नमस्तुभ्यं गन्धपुष्पाक्षतैर्युतम् ।

भक्त्या दत्तं मया देवि गृहाण परमेश्वरि ॥ पुनरर्घ्यम् ।

यस्य स्मृत्येति । पूजाविधानं संपूर्णम् । वायनदानं शूर्पदानं सुवासिनीपूजा ।

**End:**

तत्र कृत्वा व्रतं देव्या भूयः स्वभवनं ययौ ।
रममाणो महादेव्या मदिरामदमत्तया ॥

**Colophon:**

इति स्कान्दपुराणे स्वर्णगौरीव्रतं संपूर्णम् ॥

---

## No. 8604. स्वर्णगौरीव्रतकल्पः.

## SVARṆAGAURĪVRATAKALPAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 36*a* of the MS. described under No. 8180.

Complete.

Similar to the above.

**Beginning :**

ध्यायेच्चतुर्भुजां देवीं . . . फलप्रदाम् ॥
एहि गौरि वरारोहे सर्वमङ्गलदायिनि ।
वहन् मम वरान्दातुं चण्डिके ते नमाम्यहम् ॥ आवाहनम् ।

The remaining portion here is the same as in the work described under No. 8602.

---

## No. 8605. स्वस्तिकव्रतकल्पः.
## SVASTIKAVRATAKALPAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 51*b* of the MS. described under No. 3105.

Complete. From Bhaviṣyōttarapurāṇa.

Deals with the manner of conducting this Vrata which consists in worshipping Viṣṇu and Lakṣmī as being present in diagrams drawn with colored rice flour, the diagrams being in number 108, 1000 or any desired number. This Vrata should be begun in Āṣāḍha and completed in Āśvayuja.

**Beginning:**

अथ आषाढाद्याश्विनान्तं स्वस्तिकव्रतं कर्णाटकेषु प्रसिद्धं हि।
लोकानां मोदते(दं)देवं प्राहुरेवं मनीषिणः ।
गोपालमदनाख्यानं नत्त्वां स्वार्थस्य सिद्धये ॥
युधिष्ठिर उवाच—
व्रतानि सर्वसिद्धानां कथितानि त्वया विभो ।
तथापि स्वस्तिकं नाम कथितं कृपया प्रभो ॥
नैव तस्य विधानन्तु कथितं ते सुरेश्वर ।
का चेयं देवता तत्र किं दानं को विधिर्भवेत् ॥

* * * *

आषाढे मासि राजेन्द्र प्रथमं चरणं भवेत् ।
आश्विने तु समाप्तिर्वै कर्तव्या स्वस्तिकारणम् ॥

धनिना तु कृतं विप्र गोदानादिपुरस्कृतम् ।
कर्तव्यं फलसिद्ध्यर्थं नात्र कार्या विचारणा ॥

**End:**

देयं शिष्याय पुत्राय फलानां तस्य सिद्धये ।
एवं ज्ञात्वा तु तत्सर्वं चकारेदं युधिष्ठिरः ॥

**Colophon:**

इति भविष्योत्तरे स्वस्तिकव्रतम् ॥

---

## No. 8606. हरितालिकाव्रतकल्पः.

## HARITĀLIKĀVRATAKALPAḤ

Pages, 24. Lines, 3 on a page.

Begins on fol. 142a of the MS. described under No. 3055.

Complete.

Deals with the manner of observing the Vrata which consists in worshipping Śiva and Pārvatī on the Monday which falls on the third day in the bright fortnight of the Bhādrapada month and which is associated with the asterism Hasta. The Vrata should be properly called Hāritālikā as it was observed by Pārvatī when she was *taken away* from her father by her *companions* in order to enable her to avoid marrying Viṣṇu as arranged by her father.

**Beginning:**

नित्यकर्माणि कृत्वा रात्रौ पूजासमये मङ्गलस्नानं विधाय मण्डपे तोरणं यथासंभवं निधाय आचम्य तिथ्यादि सङ्कीर्त्य पूर्वोक्तैवंगुणाविशेषणविशिष्टायां शुभतिथौ मम चतुर्विधपुरुषार्थफलसिद्ध्यर्थमनेकजन्मनि सौभाग्यारोग्यार्थं वन्ध्यात्ववैधव्यकन्याप्रसूतित्वनिरसनार्थं सर्वकामनासिद्ध्यर्थं हरितालिकामहाव्रतं करिष्ये ।

* * * *

मन्दारमालाङ्कितशेखरायै कपालमालाङ्कितशेखराय ।
दिव्याम्बरायै च दिगम्बराय नमश्शिवायै च नमश्शिवाय ॥
इति ध्यानम् ।
आवाहयाम्यहं देवि महादेवसमन्विते ।
इमां मया कृतां पूजां गृहाण परमेश्वरि ॥ आवाहनम् ।

* * * *

इति प्रार्थना नमस्कारः वायनदानम् ।
इति पूजाविधानम् ।

* * * *

भाद्रे मासे सिते पक्षे तृतीयाहस्तसोमयुक् ।
तस्यानुष्ठानमात्रेण सर्वपापैः प्रमुच्यते ॥

**End:**

तस्मिन् पात्रे च निक्षिप्य पक्वान्नैर्विविधैः फलैः ।
वायनं च पुरा दद्यात्तस्यान्ते पारणं चरेत् ॥

---

## No. 8607. हरितालिकाव्रतकल्पः.
## HARITĀLIKĀVRATAKALPAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 14*a* of the MS. described under No. 6460.
Wants beginning.

Similar to the above. This Vrata is considered to have the power of securing happiness and salvation.

**Beginning:**

. . . . . (पार्व)ती सखिभिर्वृता ।
दृष्ट्वा तत्र नदीतीरे वनमध्ये महातटे ।
उपविष्टालिभिस्सार्धमन्नाहारविवर्जिता ॥

* * * *

व्रतराजमिदं प्रोक्तं शृणु देवि यथा भवेत् ।
आलिभिर्हरिता यस्मात्तस्मात्त्वं हरितालिका ॥

पार्वत्युवाच—

नाम्नेदं कथितं नाथ विधिवद्वद मे प्रभो ।

**End:**

काञ्चनं रौप्यपात्रं च वेणुमृन्मयभाजनम् ।
दापयेत् बहुलोकाय तदनन्तरपारणम् ॥
एवं विधिं या कुरुते च नारी
भर्त्रा समं सा लभते सुखं च ।
प्रयाणकाले समनुष्यरूपं
सायुज्यमुक्तिं व्रजते च मुक्तिम् ॥
अश्वमेधसहस्राणि वाजपेयशतानि च ।
कथाश्रवणमात्रेण तत्फलं लभते भुवि ॥
एतत्ते कथितं देवि तवाग्रे व्रतमुत्तमम् ।
समर्पणविधिं वक्ष्ये सङ्गमे च यथोदितम् ॥
गोभिर्हिरण्यदानानि वस्त्रदानं तथोत्तमम् ।
ततः क्षमा च कर्तव्या सर्वकामार्थसिद्धये ॥

**Colophon:**

इति श्रीलिङ्गपुराणे ईश्वरपार्वतीसंवादे हरितालिकाव्रतं संपूर्णम् ॥

---

### 7. (*a*) PŪJĀ (VĒDIC AND TĀNTRIC).

Ordinarily Pūjā consists in worshipping the deity by means of Upacāras or ceremonial offerings of which sixteen, eighteen and sometimes sixty-four are recognized. The eighteen well-known Upacāras are—

आवाहनासनं पाद्यमर्घ्यमाचमनीयकम् ।
मधुपर्कं तथा स्नानं वस्त्रं चैवोपवीतकम् ॥

गन्धं पुष्पं च धूपं च तथा दीपं प्रकल्पयेत् ।
नैवेद्यं चैव ताम्बूलं प्रदक्षिणनमस्कृती ।
उद्वासनं च क्रमशः कुर्यात्पूजापरायणः ॥

These offerings are given either with Vedic Mantras or with syllabic Mantras mentioned in the Tantras. The offerings of the Pūjā are sometimes pictured by the devotee to his imagination with the help of eulogistic verses or hymns. Then it is called **मानसिकपूजा.** As a preliminary to Pūjā and forming part of it are conducted what are called कलशपूजा, शङ्खपूजा, पीठपूजा, आत्मपूजा and आवरणपूजा.

## No. **8608.** आत्ममानसिकपूजा.
## ĀTMAMĀNASIKAPŪJĀ

*Pages*, 4. Lines, 7 on a page.

Begins on fol. 2*b* of the MS. describe dunder No. 2423, but has been omitted to be given in the list of other works thereunder.

Complete.

Deals with the manner of conducting mentally the worship of the Self.

**Beginning :**

चिदाकाशे आत्मभीममानसिकपूजामात्मपूजां च करिष्ये—
पीठं यस्या धरित्री जलधरकलशं लिङ्गमाकाशमूर्तिः
नक्षत्रं पुष्पमाला ग्रहगणकुसुमं नेत्रचन्द्रार्कवह्निम् ।
कुक्षिस्सप्तसमुद्रं भुजगिरिशिखरं सप्तपातालपादं
वेदं वक्त्रं षडङ्गं दशदिशवदनं दिव्यलिङ्गं नमामि ॥
आराधयामि मणिसन्निभमात्मलिङ्गं
मायापुरीहृदयपङ्कजसन्निविष्टम् ।
श्रद्धानदीविमलचित्तजलाभिषेकैः
नित्यं समाधिकुसुमैर्नपुनर्भवाय ॥

**End:**

छत्रं चामरयोर्युगं व्यजनकं पादार्चनं निर्मलं
वीणाभेरिमृदङ्गताळहलगलगी(लयबद्धी)तं च नित्यं सदा ।
* * * *
साष्टाङ्गं प्रणतोऽस्मि तं तव विभो सङ्कल्पये तुष्यताम् ॥
आत्मा त्वं . . . . . . . तवाराधनम् ॥
हृत्पुण्डरीकान्तर . . . . परानन्दमयं महेशम् ॥

---

## No. 8609. आत्ममानसिकपूजा.
## ĀTMAMĀNASIKAPŪJĀ.

Substance, palm-leaf. Size, 13½ × 1½ inches. Pages, 3. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol 8a. The other works herein are Candraśēkharāṣṭaka 1a, Cāṭuślōkas 3a, Dakṣiṇāmūrtyaṣṭaka 4a, Ātmaliṅgārcana 6a, Patañjalistōtra 6b, Viśvanāthāṣṭaka 9b, Navagrahastōtra 10a, Rāghavāṣṭaka 11b, Gaurīdaśaka 12b, Mārkaṇḍēyastōtra 14a, Śivaśaṅkarāṣṭaka 14b, Tyāgarājadaṇḍaka 16a.

Complete.

Similar to the above.

**Beginning:**

आराधयामि मणिसन्निभमात्मलिङ्गं
मायापुरीहृदयपङ्कजसन्निविष्टम् ।
श्रद्धानदीविमलचित्तजलाभिषेकैः
नित्यं समाधिकुसुमैरपुनर्भवाय ॥

**End:**

छत्रं चामरयोर्युगं व्यजनकं सन्दर्शकं निर्मलं
वीणाभेरिमृदङ्गकाहलकलागीतं च नृत्तं तथा ।
साष्टाङ्गप्रणतिं स्तुतिं बहुविधामेतत्समस्तं मया
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥

## No. 8610. आत्ममानसिकपूजा.
## ĀTMAMĀNASIKAPŪJĀ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 52a of the MS. described under No. 2040.

Complete.

Similar to the above.

By Sankaracarya.

**Beginning:**

आत्मलिङ्गपूजाविधिः—

एकोऽवशिष्टबोधोऽहमिति निश्चयवह्निना ।
प्रज्वाल्य द्वैतगहनं वीतशोकस्सुखी भव ॥
अहमेकोऽवशिष्टोऽस्मीत्येवमावाहयेच्छिवम् ।
आसनं कल्पयेत्पश्चात् स्वप्रकाशं निरञ्जनम् ॥
पुण्यपापरजस्सङ्गो मम नास्तीति चिन्तनम् ।
पाद्यं समर्पयेद्विद्वान् कलिकल्मषनाशनम् ॥

**End:**

इति वेदान्तमार्गेण स्वात्मलिङ्गं प्रपूजयेत् ।
आत्मन्येव च तिष्ठन्ति सर्ववेदान्तसङ्ग्रहः ॥

**Colophon:**

इति परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करविरचितं स्वात्ममानसिकपूजा(विधानं)सम्पूर्णम् ॥

---

## No. 8611. आत्मलिङ्गार्चनम्.
## ĀTMALIṄGĀRCANAM.

Pages, 5. Lines, 22 on a page.

Begins on fol. 61b of the MS. described under No. 1021.

Complete.

Similar to the above. There are some additional stanzas in the beginning and in the end. This too appears to be by Śaṅkarācārya

**Beginning:**

पूर्णस्यावाहनं कुत्र सर्वाधारस्य चासनम् ।
स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमनं कुतः ॥
निर्मलस्य कुतस्स्नानं वासो विश्वोदरस्य च ।
अगोत्रस्य(त्व)वर्णस्य कुतस्तस्योपवीतकम् ॥

* * * *

अहमेकोऽवशिष्टोऽस्मीत्येवमावाहयेच्छिवम् ।
आसनं कल्पयेत्पश्चात् स्वप्रतिष्ठात्मचिन्तनम् ॥

**End:**

सर्वदुर्वासनाजालं पदपांसुमिव त्यजन् ।
विधूयाज्ञानदुःखौघं मोक्षानन्दं समश्नुते ॥

**Colophon:**

इति श्रीमदाचार्यविरचितायां वेदान्तकल्पोक्तमात्मलिङ्गार्चनं समाप्तम् ॥

---

## No. 8612. आत्मलिङ्गार्चनम्.
## ĀTMALIṄGĀRCANAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 6*a* of the MS. described under No. 8610.

Similar to the above; but fragmentary.

See under the previous number for the beginning.

**End:**

प्रदक्षिणमनन्तस्य अद्वितीयस्य मारुतः ।
अन्तर्बहिश्च पूर्णस्य कथमुद्वासनं विभो ॥

**Colophon:**

दक्षिणामूर्तिमानसपूजाविधिस्सम्पूर्णः ॥

---

## No. 8613. आयुधाराधनम्.
## ĀYUDHĀRĀDHANAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 68*a* of the MS. described under No. 2840.

Complete.

Śounakiya.

Deals with the manner of conducting the worship of the weapons of war in order to secure victory.

**Beginning:**

आयुधाराधनं यज्ञे प्रयाणे समुपस्थिते ।
(नृपः) कुर्यात् प्रबोधाय सर्वसिद्धिकरं परम ॥
स्नातः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः ।
शुचौ देशे समासीनः प्राङ्मुखः प्रयतः शुचिः ॥
चापमादाय सगुणं प्रोक्षितं शुक्लवारिणा ।
धान्यराशिषु विन्यस्य सशरं क्षौमवेष्टितम् ॥
तस्य दक्षिणतः खड्गं विन्यस्यैवमतन्द्रितः ।
कुन्तमुत्तरतो न्यस्य पूजयेद्गन्धमाल्यकैः ॥

**End:**

नमः कृत्वा प्रयत्नेन स्तुत्वात्रेयं नरेश्वरः ।
इष्टान् कामानवाप्नोति स्वेन(सेनां)वान् पुनरेष्यति ॥

**Colophon:**

इति शौनकीये आयुधाराधनविधिः ॥

---

### No. 8614. आराधनक्रमः.

### ĀRĀDHANAKRAMAḤ

Pages, 14. Lines, 6 on a page.

Begins on fol. 4b of the MS. described under No. 5915.

Complete.

Deals with the manner of conducting the worship of Viṣṇu, the devotional Mantras to be repeated while performing the various acts of devotion being the Puruṣasūkta.

**Beginning:**

पुरुषसूक्तमन्त्रस्य अन्तर्यामिभगवान् नारायण ऋषिः, अनुष्टुप् छन्दः, अन्ततस्तिसृणां त्रिष्टुप् छन्दः, परमव्योमवासी भगवान् नारा-

यणो देवता . . . श्रीमगवदाराधने विनियोगः । यथाशक्ति द्वय-मष्टाक्षरं पुरुषसूक्तं च जपित्वा ।

अष्टाविंशतिकृत्वस्तु मन्त्रमावृत्य चेतसा ।
प्राणायामत्रयं कुर्यात्सान्निधावासने स्थितः ॥
स्वशेषभूतेन मया स्वकैस्सर्वपरिच्छदैः ।
विधातुं प्रीतमात्मानं देवः प्रक्रमते स्वयम् ॥

इत्यनुसन्धाय पार्श्वे जलकुम्भं निधाय ।

**End:**

ओं नमो नारायणाय श्रीमते नारायणाय नमः श्रीभूमिनीलासमेतं समस्तपरिवारैस्समेतं श्रीवेङ्कटेशं पुनरागमनाय मदनुग्रहाय हृदयकमले प्रतिष्ठापयामि ॥

**Colophon:**

आराधनप्रकारस्समाप्तः ॥

---

## No. 8615. आवरणपूजा.

## ĀVARAṆAPŪJĀ.

Pages, 5. Lines, 11 on a page.

Begins on fol. 101*a* of the MS. described under No. 5683. Complete.

Deals with the manner of conducting the worship of the subsidiary dieties of Paramātman with the help of Haṁsa-mantra

**Beginning:**

सौरपीठे देवस्य पूजा—

अङ्गैः प्रथमावृतिः, प्रागादिदिक्षु स्थितैः ऋतुवसुनवनरैः अग्न्यादिविदिक्षु स्थिताभिः अब्जागोजाऋतजाआद्रिजाभिः शक्तिभिः द्वितीयावृतिः, इन्द्रादिभिस्तृतीया, एवमावाहयेत् । एतन्मन्त्रं प्रतिलोममुच्चार्य महावाक्यार्थत्वेनानुसन्धानं सकलसंसृतिमोक्षसाधनमिति ।

**End:**

तत्तुरीयं नित्यशुद्धमुक्तस्वभावं प्रज्ञानघनं परिपूर्णं परमानन्दं ब्रह्मै-
वास्मि । अज्ञानतत्कार्येऽनध्यस्ते बाधिते च इत्थं महावाक्यार्थब्रह्मात्माव-
स्थानलक्षणं समाधियोगनिष्ठस्समः परोऽपि पुरुषस्य मोक्षलक्ष्मीः कर-
तले तिष्ठतीति ॥

---

No. 8616. ईश्वरार्चनम्.

ĪŚVARĀRCANAM.

Substance, palm-leaf. Size, 13¼ × 1½ inches. Pages, 39. Lines, 5 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 91a. The other work herein is Mahēśamānasamahōtsava 1a.

Almost complete.

Deals with the manner of conducting the worship of Īśvara (Śiva).

**Beginning:**

विघ्नेश्वरमविघ्नार्थं नत्वा वच्मीश्वरार्चनम् ।
अशेषदेवतार्चायाः पूर्वरङ्गः पुरोच्यते ॥
शौचमाचमनं दन्तधावनं स्नानपुण्ड्रके ।
कृत्वा सन्ध्यामुपास्याग्नौ होमं कुर्यात् क्रमात्पुरः ॥
प्रक्षालिताङ्घ्रिराचम्य सपवित्रकरः शुचिः ॥
द्विजः पूजागृहद्वारसमीपं शनकैर्व्रजेत् ॥

* * * *

धृत्वाथ भस्मना तिर्यक् त्रिपुण्ड्रं चन्दनेन वा ।
उक्तस्थानेषु रुद्राक्षान् विभृयान्मन्त्रवित्तमः ॥
वश्यमासनमास्थाय स्वस्तिकाख्यं स्मृतीरितम् ।
एकाग्रबुद्धिर्मौनी स्यात् यावत्सम्पूर्यतेऽर्चना ॥

**End:**

उपचारश्लोकमन्त्रांस्तदर्थज्ञानपूर्वकम् ।
उच्चारयेदर्चकश्चेदर्चा मानसिकी भवेत् ॥

पदार्थानुपचारार्थान् साक्षादग्रेऽर्पयेद्यदि ।
कायिक्यपि न चेद्वेद सार्चा केवलवाचिकी ॥

* * * *

स्थितोऽस्मि त्वां पश्यंश्चिरममिवयैवं तव कृते
मदर्थासु स्थाणोर्हृदयपरिचर्यासु विमुखः ॥

---

No. 8617. उत्सवाङ्गमन्त्रपुष्पम्

UTSAVĀṄGAMANTRAPUṢPAM.

Substance, palm-leaf. Size, 16¾ × 1⅝ inches. Pages, 46. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

Contains the hymns and verses from the Védas, Itihāsas, Purāṇas, Tamil Prabandhas, etc., which are intended to be repeated at the time of flower-offering during the worship conducted as part of a temple festival.

**Beginning:**

अग्निमीडे . . . आगमत् । प्रजापतिरकामयत . . . उभयान् प्रीणाति । बन्धुशीललक्षणसम्पन्नामरोगामुपयच्छेत बन्धुशील-लक्षणसम्पन्नश्श्रुतवानरोग इति । सम्पन्नस्त्वां मनश्चक्षुषोर्निबन्धस्तस्यामृद्धिर्नेतरदाद्रियेत इत्येके ।

ईदृशे वर्तमाने तु तूर्यदुन्दुभिनिनादिते ।
त्रिरग्निं संपरिक्रम्य ऊहुर्भार्या महौजसः ॥

**End:**

वहति महिलामाद्यो वेषान्त्रयीमुखरैर्मुखैः
वरतनुतया वामो भागश्शिवस्य विवर्तते ।
तदपि परमं तत्त्वं गोपीजनस्य वशंवदं
मदनकदनैर्न क्लिश्यन्ते यतीश्वरसंश्रयाः ॥
इह रङ्गपति . . . . . . . . . सूरिः ॥
पद्मा . . . . . . . . . . श्रियम् ॥

---

## No. 8618. उमामहेश्वरपूजा.
## UMĀMAHĒŚVARAPŪJĀ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 1143.

Incomplete

Deals with the manner of conducting the worship of Umā and Mahēśvara.

**Beginning:**

आब्रह्मलोकादशेषादालोकालोकपर्वतात् ।
ये वसन्ति द्विजा देवास्तेभ्यो नित्यं नमाम्यहम् ॥
अपसर्पन्तु ये भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारः ते गच्छन्तु शिवाज्ञया ॥

* * * *

प्राणानायम्य सङ्कल्प्य उमामहेश्वरपूजां करिष्ये । कलशपूजां च करिष्ये । अथ उपस्पृश्य कलशस्य मूले बिन्दुना सह पञ्चकोणं विलिख्य रं—अग्निमण्डलाय नमः दशधर्मप्रदकलात्मने पात्रासनाय नमः । सं—सूर्यमण्डलाय द्वादशवसुप्रदकलात्मने कलशाय नमः—कलशपूजा ।

**End:**

नालाय कन्दाय साम्बाय योगपीठात्मने नानाविधपुष्पाणि । शिवस्य प्राणप्रतिष्ठां कुर्यात् ॥

## No. 8619. कलशपूजाप्रकारः.
## KALAŚAPŪJĀPRAKĀRAḤ.

Pages, 7 Lines, 5 on a page.

Begins on fol 106a of the MS. described under No. 6414.

Incomplete.

Deals with the manner of conducting the worship of the vessel containing the water requisite for the worship of the deity.

**Beginning:**

कलशपूजा—

अन्नेण कलशमासाद्य भूमिर्भूम्नेति अभिमन्त्र्य भूमिर्भूम्ना द्यौर्वरिणा-न्तरिक्षं महित्वा। उपस्थे ते—धायादधे—इति भूमिमभिमृश्य, या जाता ओषधय इति धान्यं निक्षिप्य।

**End:**

गन्धद्वारां . . . . . ह्वये श्रियम्—इति गोमयं नि-क्षिप्य आप्यायस्वेत्यस्य मन्त्रस्य गौतम ऋषिः.

---

## No. 8620. गणपतिपूजाविधानम्.
## GAṆAPATIPŪJĀVIDHĀNAM.

Pages, 24. Lines, 9 on a page.

Begins on fol. 4a of the MS. described under No. 5683.

Incomplete.

Deals with the manner of conducting the worship of Gaṇapati according to Vāmācāra, one of the methods of worship adopted by the followers of Śāktism.

**Begininng:**

महागणपतिपद्धतिः—

विधिवत्संविल्सेवनं कृत्वा यथाशक्ति मूलमन्त्रं जप्त्वा दीपानभितो दत्वा सङ्कल्प्य श्रीमहागणपतिमुद्दिश्य महागणपतिप्रीत्यर्थं सम्भवता नि-

यमेन सम्भवद्भिर्द्रव्यैः यावच्छक्त्या ध्यानावाहनादिषोडशोपचारपूजां करिष्ये ।

विरोधिजनविमुखासन्नपूजामण्डपं प्रविश्य तत्र पश्चिमद्वारशाखयोः गं गणपतये नमः, वं वटुकाय नमः—इति सम्पूज्य वामपादपुरस्सरमन्तः प्रविश्य मृद्वासने चात्मासनाय नम इति प्राङ्मुख उदङ्मुखो वोपविश्य ओं ऐं ह्रीं श्रीं गं गणपतये नम इति हृदि सञ्चिन्त्य ।

**End:**

मदजललोलुपमधुकरमालां निजकर्णतालताडनया ।
निर्वास्यन्मुहुर्मुहुरमुकैरनुगैश्च सेवितो युगपत् ॥

एवं स्वरूपध्यानम् ।

---

No. 8621. गणपतिपूजाविधानम्.
GAṆAPATIPŪJĀVIDHĀNAM.

Pages, 6. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 8284.

Complete.

This gives the manner of conducting the worship of Gaṇapati as a preliminary to the performance of any ceremony with a view to ensure its unimpeded progress and completion.

**Beginning:**

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्नराजो गणाधिपः ॥

* * * *

श्रीमहागणपतिमुद्दिश्य श्रीमहागणपतिप्रीत्यर्थं ध्यानावाहनादिषोडशोपचारपूजां करिष्ये । तदङ्गकलशपूजां करिष्ये । . . . . श्रीमहागणाधिपतये नमः ध्यायामि, ध्यानं समर्पयामि, आवाहयामि, आसनं समर्पयामि ।

**End:**

उत्तरे कर्मण्यविघ्नमस्तु। गणाधिपतिप्रसादं शिरसा गृह्णामि। गणाधिपतिमुद्वासयामि ॥

No. **8622.** गणपतिपूजाविधानम्.

GAṆAPATIPŪJĀVIDHĀNAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 130*a* of the MS. described under No. 781.

Complete.

Similar to the above.

**Beginning:**

यं ब्रह्म वेदान्तविदो वदन्ति . - तस्मै नमो विघ्नविनायकाय॥

* * * *

आयुरारोग्यैश्वर्याभिवृद्ध्यर्थे गणाधिपतिपूजां करिष्य। गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नश्शृण्वन्नूतिभिस्सीद सादनम्। श्रीगणाधिपतये नमः ध्यायामि। आवाहयामि। आसनं समर्पयामि।

**End:**

एतानि षोडश (षोडशैतानि) नामानि यः पठेच्छृणुयादपि॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा।
सङ्ग्रामे सर्वकार्येषु विघ्नस्तस्य न जायते॥

श्रीगणाधिपतये नमः॥

**Colophon:**

विघ्नेश्वरपूजनं सम्पूर्णम्॥

No. **8623.** गुरुबसवलिङ्गपूजा.

GURUBASAVALIṄGAPŪJĀ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 89*a* of the MS. described under No. 781.

Complete.

Deals with the manner of conducting the worship of Guru, Basava and Liṅga according to Liṅgayet system. The MS. is dated Wednesday the 12th day of the bright fortnight in the month of Phālguna of Plavaṅga.

**Beginning:**

सदाचारः शिवे भक्तिः लिङ्गे जङ्गम एकधीः ।
लाञ्छनेन शरण्यश्च भक्तस्थलसुबुद्धिमान् ॥
परस्त्रियं परार्थञ्च वर्जितं भावशुद्धिमान् ।
लिङ्गनिष्ठनियुक्तात्मा महेश्वर(श)स्थलमुत्तमम् ॥
लिङ्गार्पितप्रसादार्थी सुभोगी लिङ्गसंयुतः ॥

* * * *

अजलं जलमिश्रन्तु स्वपापी ब्रह्मघातकः ।
जङ्गमं पादतीर्थञ्च इष्टलिङ्गन्तु मज्जनम् ॥

**End:**

यद्यद्द्रव्यास्वादनेन तृप्तिर्भवति यादृशी ।
तां तां सद्भावहस्तेन भावलिङ्गे निवेदयेत् ॥

---

No. 8624. चण्डीपूजा.

CAṆḌĪPŪJĀ.

Pages, 9. Lines, 10 on a page.

Begins on fol. 27*b* of the MS. described under No. 4338, wherein this has been omitted to be shown among the other works.

Complete.

Deals with the manner of conducting the worship of Caṇḍī or Bhadrakālī. By Kamalākara, the author of Nirṇayasindhu, and the son of Rāmakṛṣṇa, the son of Nārāyaṇa.

**Beginning:**

अथ पूजा—

षट्कोणेषु आग्नेयादिकोणेषु पुरतः पश्चात् सहस्रार्चिष इत्यादि-षडङ्गानि संपूज्य अष्टदलेषु पूर्वादिदिक्षु अग्नये जातवेदसे नम इति

अष्टौ मूर्तित्रिकोणमध्ये च स्फूं पद्मरागार्यै—इत्यादिपूर्वोक्तसप्तजिह्वं सम्पूज्य चतुरश्रे इन्द्रादीन् सायुधान् सम्पूज्य ।

**End :**

गच्छ गच्छ वरं स्थानं स्वस्थानं देवि चण्डिके ।
व्रज स्रोतोजलं वृद्ध्यै स्थीयतां च जले त्विह ॥

* * * *

इदमेव पूजाहोमबल्यादिविधानं नवरात्रेऽपि ज्ञेयम् ।
विशेषस्तु मत्कृतनिर्णयसिन्धौ नवरात्रनिर्णये ज्ञेयम् ।

श्रीमन्नारायणाख्यात्समजनि विबुधो रामकृष्णाभिधानः
तत्सूनुस्सर्वविद्याम्बुधिनिजचुलकीकारतः कुम्भजन्मा ॥
दृष्ट्वा नानानिबन्धान् स्वयदतुलं (मपि विदधे) ग्रन्थमब्जाकराख्यं
पित्रोः पादाब्जभृङ्गो रघुपतिपदयोः स्वश्रमं प्रार्थ(र्प)यच्च ॥

यो भट्ट(भाट्ट)तन्त्रगणनार्णवकर्णधारः
शास्त्रान्तरेषु निखिलेष्वपि मर्मभेदी ।
योऽत्र श्रमोऽस्ति विहितः कमलाकरेण
प्रीतोऽधुनास्तु सुकृती बुधरामकृष्णः ॥

---

## No. 8625. चतुर्विंशतिमूर्तिलक्षणम्.

## CATURVIMŚATIMŪRTILAKṢAṆAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 107a of the MS. described under No. 2898.
Complete.
Describes the characteristics of the 24 kinds of Viṣṇu's image.

**Beginning :**

शङ्खचक्रे पद्मगदे केशवस्य । खड्गपद्मगदाचक्रं नारायणस्य । गदाचक्रशङ्खपद्मं माधवस्य । चक्रगदाशङ्खपद्मं गोविन्दस्य ।

**End:**

पद्मगदाचक्रशङ्खं जनार्दनस्य । शङ्खगदे चक्रपद्मे उपेन्द्रस्य । शङ्खचक्रपद्मगदा हरेः । शङ्खगदापद्मचक्रं श्रीकृष्णस्य ॥

**Colophon:**

इति चतुर्विंशतिलक्षणानि ॥

---

No. **8626.** चतुस्सन्ध्यापूजाक्रमः.

CATUSSANDHYĀPŪJĀKRAMAḤ.

Pages, 8. Lines, 10 on a page.

Begins on fol. 52*a* of the MS. described under No. 5647.

Complete.

Deals with the manner of conducting the worship of Dēvī four times every day, *i.e.*, at sunrise, midday, sunset and midnight.

**Beginning:**

सन्ध्या । सा चतुर्विधा—प्रातर्मध्याह्नसायाह्नार्धरात्रभेदात् । तथाचोक्तं त्रिपुरार्णवे—

सन्ध्या चतुर्विधा ज्ञेया बाला कौमारयौवना ।
प्रौढा च निष्कला चैते सन्ध्यादेव्यः प्रकीर्तिताः ॥
प्रातःकाले महादेवी विद्या वागीश्वरी मता ।
कामेश्वरी च मध्याह्ने सायाह्ने पुरभैरवी ॥
मध्यरात्रे महादेवी ज्ञेया त्रिपुरसुन्दरी । इति ।

तत्र विधिवदाचम्य मूलविद्यया शिखां बद्ध्वा तयैव प्राणायामत्रयं कृत्वा मूलविद्यया ऋष्यादिकरषडङ्गन्यासान्तं कृत्वा ।

**End:**

वर्गश्चक्रं योनिरिति पर्यायः । सेकः अभिषेकः । स्थिरो निश्चलः । भक्तिमान् पत्र. . . . . . . प्रपावितः । काम्यजपः केवल-

नित्यविधानामेव । अन्येऽपि काम्यप्रयोगा बहवस्सन्ति । तेऽप्यत्र ग्रन्थगौरवभयान्नास्माभिर्लिखिता गुरुतश्शास्त्रतो बोद्धव्याः ॥

---

## No. 8627. चिदम्बरेश्वरपूजाविधानम्.

### CIDAMBAREŚVARAPŪJĀVIDHĀNAM.

Substance, palm-leaf. Size, 8½ × 1¼ inches. Pages, 14. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 3a. The other works herein are Cidambara-ṣaḍakṣarastōtra 1a, Cidambarāṣṭaka 10a, Cidambaraviṣayamu (Telugu) 11a.

Complete.

Deals with the manner of conducting the worship of Cidambaraguru: by Śivasūri.

**Beginning :**

श्रीमद्गुरुं सकलभूषणभूषिताङ्गं दिव्याम्बरं स्मेर(स्मितविकासि)मुखारविन्दम् ।

चिन्मुद्रयाञ्चितकरं महनीयमूर्तिं ध्यायेत्सदा हृदि चिदम्बरमादिदेवम् ॥

श्रीचिदम्बरगुरवे नमः ध्यानं समर्पयामि ।

आवाहयामि देवेश देव्या सह जगद्गुरो ।
त्वां चिदम्बरपूजार्थं शीघ्रमायाहि सर्वदा ॥ आवाहनम् ।

**End :**

मया कृतामिमां पूजां समादाय जगत्प्रभो ।
क्षमस्व मेऽपराधांश्च भक्तोऽयमिति त्वं(भो)गुरो ॥
चिदम्बरगुरोः पूजा भक्तेन शिवसूरिणा ।
रचितैवम्प्रकारेण परिग्राह्या सुपण्डितैः ॥

**Colophon :**

इति पूजाविधानं सम्पूर्णम् ॥

## No. 8628. त्रिपुरसुन्दरीमानसपूजा.

## TRIPURASUNDARĪMĀNASAPŪJĀ.

Pages, 9. Lines, 7 on a page.

Begins on fol. 53*a* of the MS. described under No. 673

Complete.

Deals with the manner of worshipping Dēvi or Tripurasundari mentally : by Śaṅkarācārya.

**Beginning :**

उषसि मागधमङ्गलगायकैर्झटिति जागृहि जागृहि जागृहि ।
अतिकृपार्द्रकटाक्षनिरीक्षणैर्जगदिदं जगदम्ब सुखीकुरु ॥
कनकमय(वेद्य)वितर्दिशोभमानं दिशि दिशि पूर्णसुवर्णकुम्भयुक्तम् ।
मयि कृपया (हि) समर्चनं ग्रहीतुं मणिमयमण्टपमध्यमेहि मातः ॥

**End :**

प्रत्यहं भक्तिसंयुक्तो यः पूजनमिदं पठेत् ।
(क्षिप्रं देवी)प्रसादेन वत्सरात्स कविर्भवेत् ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादकृतौ बाला-त्रिपुरसुन्दरीमानसिकपूजाविधानं सम्पूर्णम् ॥

---

## No. 8629. त्रिपुरसुन्दरीमानसपूजा.

## TRIPURASUNDARĪMĀNASAPŪJĀ.

Pages, 5. Lines, 11 on a page.

Begins on fol. 50*b* of the MS. described under No. 560, but is mentioned therein as Dēvicatuṣṣaṣṭipūjāvidhānam.

Complete.

Same as the above.

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यवीराचार्यपरोक्षसाक्षात्कारश्रीमद्गो-विन्दभगवत्पादपूज्यश्रीमच्छङ्कराचार्यविरचितं ललितात्रिपुरसुन्दरीचतुष्ष-ष्ट्युपचारमानसपूजास्तोत्रं सम्पूर्णम् ॥

## No. 8630. त्रिपुरापूजा.
## TRIPURĀPŪJĀ.

Pages, 8. Lines, 19 on a page.

Begins on fol. 56b of the MS. described under No. 2886.

Complete.

This gives the manner of conducting the worship of Tripurā or Dēvī.

**Beginning:**

अथ मौनी यागमन्दिरमागत्य गोमयोपलिप्तद्वारस्थण्डिलाभ्यन्तरस्थ . . . . . . . . . . . . . . . पश्चिमे द्वारे तिष्ठन् दक्षवामयोरूर्ध्वभागे च ऐं श्रीं ह्रीं भद्रकाल्यै नमः, ऐं श्रीं ह्रीं भैरवाय नमः, ऐं श्रीं ह्रीं लम्बोदराय नमः, इति क्रमेण तिस्रो द्वारदेवतास्सम्पूज्य ।

**End:**

आनन्दनन्दनाथाय गुरवे परमेष्ठिने ॥
बालभावानुसारेण ममेदं हि विचेष्टितम् ।
मातृवात्सल्यसदृशं त्वया देवि विधीयताम् ॥

एवमादिभिरन्याभिर्यथावकाशं स्तुतिभिरखिललोकमातरमभिष्टूय सुवासिनीं पूजयेत् । अथ सन्निहिते गुरौ तं पादुकामन्त्रेण ॥

---

## No. 8631. दक्षिणामूर्तिमानसपूजा.
## DAKṢIṆĀMŪRTIMĀNASAPŪJĀ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 37a of the MS. described under No. 5858.

Complete.

Contains the manner of conducting the meditative worship of Dakṣiṇāmūrti: by Bālavijñānēndra, the teacher of Rāmavāsudēva who was the teacher of Vijñānēndra.

**Beginning:**

स्वटवटनिकटे संस्तूयमानावभासं पद्मुजतटबद्धव्याघ्रचर्मोत्तरीयम् ।
चटुलनिटिलनेत्रं चन्द्रचूडं महेशं स्फटिकपटलदेहं भावये दक्षिणास्यम् ॥

आवाहये सुन्दरनागभूषं विज्ञानमुद्राङ्कितपञ्चशास्त्रम् ।
भस्माङ्गरागेण विभासमानं श्रीदक्षिणामूर्तिमिहात्मरूपम् ॥

**End:**

नमो नमः पापविनाशनाय नमो नमः कञ्जभवार्चिताय ।
नमो नमः कृष्णहृदि स्थिताय श्रीदक्षिणामूर्तिमहेश्वराय ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्विज्ञानेन्द्रचरणाम्भोरुहसत्तु-
तासकश्रीमद्रामवासुदेवामलाङ्घ्रियमग्रजितबालविज्ञानेन्द्रकृतं मेधादक्षिणा-
मूर्तिमानसपूजाविधानं सम्पूर्णम् ॥

---

## No. 8632. दुर्गापूजा.

## DURGĀPŪJĀ.

Substance, palm-leaf. Size, 15⅜ × 1¼ inches. Pages, 7. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 7*a*. The other works herein are Mahānyāsa-pūjāvidhi 1*a*, Rāmāṣṭōttaraśatanāmastōtra 11*a*, Rāmāṣṭōttara-śatanāmāvali 13*a*, Kṛṣṇāṣṭōttaraśatanāmastōtra 14*b*, Kṛṣṇāṣṭōttara-śatanāmāvali 15*b*, Śivāṣṭōttaraśatanāmastōtra 17*b*, Śivāṣṭōttara-śatanāmāvali 18*b*, Vināyakāṣṭōttaraśatanāmāvali 19*b*, Lakṣmyaṣṭōttaraśatanāmāvali 21*a*, Tripurasundaryaṣṭōttaraśatanāmāvali 22*a*, Lalitāṣṭōttaraśatanāmastōtra 24*a*, Lalitāṣṭōttaraśatanāmāvali 25*a*, Sūryāṣṭōttaraśatanāmāvali 26*b*, Nṛsiṁhāṣṭōttaraśatanāmāvali 27*b*, Hayagrīvāṣṭōttaraśatanāmāvali 29*a*, Hanumadaṣṭōttara-śatanāmāvali 30*b*, Vēṅkaṭēśāṣṭōttaraśatanāmāvali 34*a*, Sītārāmā-ṣṭōttaraśatanāmāvali 36*a*, Gaurīśaṅkarāṣṭōttaraśatanāmāvali 39*a*, Triśatināmāvali 43*a*, Śivasahasranāmāvali 47*a*, Viṣṇusahasranāma-

stōtra 59a, Viṣṇusahasranāmāvali 66a, Śivaśaṅkarāṣṭaka 72a, Rāmasahasranāmāvali 73a, Śivasahasranāmastōtra 84a, Śivasahasranāmāvali 92a.

Incomplete.

Deals with the manner of worshipping Durgā or Kālī.

**Beginning:**

एवङ्गुणशुभतिथौ . . . . . . . . महाकालीप्रीत्यर्थं यावच्छक्यषोडशोपचारपूजां करिष्ये । ततः कलशस्थापनं कुर्यात् । नवदुर्गां चावाह्य,

मन्त्राक्षरमयी देवीं त्रिवर्गज्ञानरूपिणीम् ।
त्रैलोक्यवन्दितां देवीं त्रिमूर्तिं पूजयाम्यहम् ॥

त्रिमूर्तिमावाहयामि ।

**End:**

महालक्ष्म्यै नमः ललाटं पूजयामि, भवान्यै नमः शिरः पूजयामि, सर्वेश्वर्यै नमः सर्वाङ्गानि पूजयामि ।

---

No. 8633. देवतापूजाविधानम्.

DEVATĀPŪJĀVIDHĀNAM.

Substance, palm-leaf (Śritāla). Size, 6⅝ × 1¼ inches. Pages, 205. Lines, 6 on a page. Character, Malayalam. Condition, good. Appearance, old.

Begins on fol. 25a. The other works herein are Visnusahasranāmāvali 1a, Pārvatistōtra 128a.

Complete.

Deals with the manner of conducting the worship of the household deities of Nambūdiri Brahmins in Malabar.

**Beginning:**

स्नातो निर्मलशुद्धसूक्ष्मवसनो धौताङ्घ्रिपाण्याननः
स्वाचान्तस्सपवित्रमुद्रितकरः श्वेतोर्ध्वपुण्ड्रोज्ज्वलः ।

प्राचीदङ्मुखवदनं निबध्य सुदृढं पद्मासनं स्वस्तिकं
वासीनः स्वगुरून् गणाधिपमथो वन्देत बद्धाञ्जलिः ॥
द्वाभ्यां कूर्चं तु कुर्वीत मूलतश्चतुरङ्गुलम् ।
ग्रन्थिरेकाङ्गुलं त्वग्रमङ्गुलित्रयसंयुतम् ॥ इति कूर्चलक्षणम् ।

**End:**

शुक्रमसीत्याज्यं, देवस्य त्वेति कुशोदकम्, आपो हि ष्ठा मयोभुव इत्यालोड्य मा नस्तोक इत्यभिमन्त्रणम् ॥

---

No. 8634. देवतापूजाविधिः.
DEVATĀPŪJĀVIDHIḤ.

Substance, palm-leaf. Size. 6¾ × 1¼ inches. Pages, 108. Lines, 6 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Begins on fol. 8*a*. The other works herein are Bhāgavatatātparya (Kanarese) 1*a*, Gāyatryartha (Kanarese) 62*a*, Jyautisasāra 73*a*, Tāratamyasaṅgraha 78*a*.

Complete.

The procedure herein laid down for conducting the worship of the deity is intended for the followers of Ānandatīrtha.

**Beginning:**

स्मृत्वा विष्णुं समुत्थायेत्यादिस्मृत्युक्तप्रकारेण ब्राह्मे मुहूर्ते उत्थाय विधिवच्छौचाचमनदन्तधावनस्नानादिकान् कृत्वा पश्चादूर्ध्वपुण्ड्रादिकान् धृत्वा . . . . . पूर्वद्वारे—द्वारश्रियै नमः, जयाय नमः, विजयाय नमः; दक्षिणद्वारे—द्वारश्रियै नमः, नन्दाय नमः, सुनन्दाय नमः ।

**End:**

सर्वेषां पाद्यादित्रयं दद्यादिति केचित् । तन्त्रसारे—
सकृत्सकृत्पुष्पमन्त्रैर्होमस्तस्य चतुर्गुणः ।

पीठावरणदेवताभ्यस्सर्वाभ्यः सकृत्सकृत्पुष्पं होमं चतुश्च कुर्यात् । . . . . . . . दद्यादित्यर्थः । तस्मात्सर्वेषु सकृत्पुष्पं समर्चयेत् ॥

---

No. 8635. देवतार्चनविधिः.
DEVATĀRCANAVIDHIḤ.

Pages, 34. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 1872, wherein it is named as Tantrasārōktapūjāpaddhatiḥ.

Complete.

Deals with the manner of conducting the worship of the deity in accordance with the views of Ānandatīrthācārya expressed in his Tantrasāra.

**Beginning:**

नारायणाय परिपूर्णगुणार्णवाय विश्वोदयस्थितिलयोनि(न्नि)यतिप्रदाय ।
ज्ञानप्रदाय विबुधासुरसौख्यदुःखसत्कारणाय विततात नमो नमस्ते ॥
. . . . . . आनन्दतीर्थमुनिवर्यमहं नमामि ॥
जयाच्युत जयानन्त जय कृष्ण हरे प्रभो ।
जय केशव लक्ष्मीशेत्युक्त्वा विष्णुं प्रवचने(पूजयेत्) ॥

पूर्वद्वारे—द्वारश्रियै नमः, जयाय नमः, विजयाय नमः । दक्षिणद्वारे—द्वारश्रियाय(यै) नमः, बलाय नमः, प्रबलाय नमः । पश्चिमद्वारे—द्वारश्रियै नमः, नन्दाय नमः, सुनन्दाय नमः । उत्तरद्वारे—द्वारश्रियै नमः, कुमुदाय नमः, कुमुदाक्षाय नमः । इति द्वारपालकान् नत्वा ।

**End:**

माध्वीर्गावो भवन्तु नः नैवेद्यं समर्पयामि ।

* * * *

अहे बुध्निय मन्त्रं मे गोपाय । यमृषयस्त्रैविदा विदुः । ऋचस्सामानि यजूंषि । सा हि श्रीरमृता सताम् ।

श्रीरस्तु ॥

## No. 8636. देवतार्चनविधिः.
## DĒVATĀRCANAVIDHIḤ.

Substance, palm-leaf. Size, 8¼ × 1⅝ inches. Pages, 16. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

This describes the worship of Rāma.

**Beginning:**

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।
कुरु घण्टे रवं तत्र देवताह्वानलाञ्छनम् ।

इति घण्टानादं कृत्वा . . . . . . . . . . श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतश्रीरामचन्द्रप्रीत्यर्थं यावच्छक्त्यध्याना-वाहनादिषोडशोपचारपूजां करिष्ये । तदङ्गकलशपूजां करिष्ये । कलशं गन्धपुष्पाक्षतैरभ्यर्च्य ।

**End:**

अनेन षोडशोपचारपूजनेन भगवान् सर्वात्मकः श्रीसीतालक्ष्मण-भरतशत्रुघ्नहनुमत्समेतश्रीरामचन्द्रो देवः सुप्रीतस्सुप्रसन्नो वरदो भवतु । न्यूनातिरिक्तं सर्वं सगुणमस्तु । तत्सत् ब्रह्मार्पणमस्तु ॥

---

## No. 8637. देवीपूजा.
## DĒVĪPŪJĀ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 50*a* of the MS. described under No. 235.

Incomplete.

Describes the manner of conducting the worship of Dēvī during the Navarātri festival, the Mantras to be repeated while performing the Pūjā being taken from Śrīsūkta.

**Beginning:**

एवङ्गुणविशेषण . . तिथौ इषमासप्रतिपदा(दमा)रभ्य नवमीपर्यन्तं श्रीसूक्तविधानेन महालक्ष्मीमहाकालीमहासरस्वतीप्रीत्यर्थं स्कन्दपुराणोक्त-प्रकारेण षोडशोपचारपूजां करिष्ये ।

अस्य श्रीसूक्तमहामन्त्रस्य आनन्दकर्दमचिक्लीतश्रीचन्द्रा ऋषयः, जातवेदाग्निश्रियो देवता ।

**End:**

रं तैजसात्मने दीपं समर्पयामि, वं अमृतात्मने अमृतनैवेद्यं समर्पयामि.

---

No. 8638. देवीपूजाविधानम्.

DĒVĪPŪJĀVIDHĀNAM.

Pages, 35. Lines, 7 on a page.

Begins on fol. 107*a* of the MS. described under No. 4369.

Complete.

Similar to the above; but in this work the Mantras to be repeated are taken from Āgamas The work is said to contain 134 Mantras and 70 Sūtras.

**Beginning:**

आदौ गणपतिं सम्पूज्य श्वेतरक्ताक्षतान् स्ववामहस्ते गृहीत्वा बहिर्द्वारपूजां कुर्यात् । दं देहल्यै नमः—द्वारवामपार्श्वे । गं गणपतये नमः—द्वारदक्षिणपार्श्वे । वं वटुकाय नमः—द्वारदक्षिणाधोभागे । क्षं क्षेत्रपालाय नमः—द्वाराधोवामभागे । सं सरस्वत्यै नमः—द्वारोर्ध्वे । इति द्वारपूजा ।

**End:**

मन्त्राश्शतं समुद्दिष्टाश्चतुस्त्रिंशदधिश्रिताः ।
सारवन्तीह सूत्राणि सप्ततिः पद्धतेः प्रिये ॥

प्रसृता भारती ज्योत्स्ना शिवानन्दोर्ध्वमण्डलात् ।
कुदेशिकमहाधर्मसन्तप्तैः सेव्यतां चिरम् ॥

यथासुखं विहरेत् ॥

## No. 8639. नवग्रहाराधनम्.
## NAVAGRAHĀRĀDHANAM.

Pages, 34. Lines, 5 on a page.

Begins on fol. 20*b* of the MS. described under No. 2421, wherein this has been wrongly called Gaṅgarādhana.

Complete.

Deals with the manner of conducting the worship of the Navagrahas or the nine planets recognized in Indian Astronomy.

**Beginning:**

आसत्येनेत्यस्य मन्त्रस्य हिरण्यस्तूप ऋषिः, सविता देवता, त्रिष्टुप् छन्दः, सूर्यग्रहप्रसादसिद्ध्यर्थे जपे विनियोगः। वेदिमध्ये लिखितकमलकर्णिकायां रथस्थसप्ताश्वार्कारुणरुधिरवपु: . . . . . . . .
ओं भूर्भुवस्सुवः सूर्यग्रह इहागच्छ ।

**End:**

जातवेदसे कश्यपो दुर्गा गायत्री अतो न इन्द्र कण्वो इस्तिर्गायत्री क्षेत्रस्य पति । भरद्वाजनिरृतिस्त्रिष्टुप् । एषो उषा दुर्गा वायुर्गायत्री । क्राणा शिशुर्वामदेव आकाशो गायत्री । आदित्यात्मा गर्गो अश्विनी गायत्री ॥

---

## No. 8640. नवचण्डीपूजा.
## NAVACAṆḌĪPŪJĀ.

Pages, 3. Lines, 16 on a page.

Begins on fol. 132*a* of the MS. described under No. 7593.

Complete.

This work specifies the time when the worship of Caṇḍī for nine days should be conducted and describes the merits accruing therefrom: by Prakāśānandanātha.

**Beginning:**

विश्वेश्वरी विश्वपूज्यां चण्डिकां प्रणमाम्यहम् ।
सर्वदेवमयीं देवीं सर्वरोगभयापहाम् ॥
. . . .

पादुकां पूजयामि तर्पयामि नम इति स्तुत्वा कुमारीपूजनं कुर्यात् ।

अनेन विधिना भूप यः कुर्याच्चण्डिकार्चनम् ।
तस्य तुष्टा महालक्ष्मीः यद्ददाति शृणुष्व तत् ॥

**End:**

एवं माघमासि कृष्णपक्षषष्ठीदिनमारभ्य अमाशिवचतुर्दशीपर्यन्तमेवमेव क्रमेण कुम्भपूजादिगुरुदक्षिणान्तं कुर्यात् । एतदुक्तफलं भवति ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्मुनीन्द्रप्रकाशानन्दनाथविरचितायां नवचण्डीपूजोपसंहारः समाप्तः ॥

---

## No. 8641. नवदुर्गापूजाविधानम्.
## NAVADURGÂPÛJÂVIDHÂNAM.

Pages, 6. Lines, 21 on a page.

Begins on fol. 70*a* of the MS. described under No. 446.

Complete.

Deals with the worship of the nine Durgâs or nine manifestations of Śakti.

**Beginning:**

महिषघ्नीं (च द्विभुजां कुमारीं सिंहवाहनीम् ।
दानवांस्तर्जयन्तिस्म(न्तीं स)खड्गखेटकरां शुभाम् ॥
घण्टाक्षस्रग्धरां दुर्गां दशारम्भव्यवस्थिताम् ।
स्थापयामि महादेवीं सर्वसौख्यप्रदायिनीम् ॥

ऐं ह्रीं क्लीं दुर्गां स्थापयामि पूजयामि नमः ।

**End:**

घोरदंष्ट्रे करालास्ये मद्यमांसबलिप्रिये ।
बलिं गृहाण देवेशि पशुरक्तं समांसकम् ॥

ऐं ह्रीं क्लीं पुनस्ताम्बूलम् ।

वह्निना योजितं दीपं कर्पूरेण च संयुतम् ।
सर्वस्यार्तिहरे देवि आर्त्रि(र्ति)क्यं प्रतिगृह्यताम् ॥

ऐं ह्रीं क्लीं श्रीदेव्यै नमः नीराजनम् ॥

---

No. 8642. नित्यक्रमविधिः.

NITYAKRAMAVIDHIḤ.

Pages, 25. Lines, 16 on a page.

Begins on fol. 7*b*a of the MS. described under No. 5560.

Complete.

Deals with the manner of conducting the worship of Dēvī as prescribed in Śrīvidyāratnasūtra.

**Beginning:**

अथ धौते वाससी परिधाय पुण्ड्रं धृत्वा मन्त्रसन्ध्यां कुर्यात् । यथा— . . . . . . . . . . . . . . .

आचम्य देशकालौ सङ्कीर्त्य श्रीललिताम्बाप्रसादसिद्ध्यर्थमर्चनमहं करिष्ये—इति सङ्कल्प्य, द्वारस्य दक्षवामशाखयोः ऊर्ध्वभागे च क्रमेण भद्रकाल्यै नमः, भैरवाय नमः, लम्बोदराय नमः—इति सम्पूज्य ।

**End:**

इति श्रीगुरुपादुकामभ्यर्च्य पात्राणि प्रक्षाल्य विधाय ब्राह्मणसुवासिनीभिर्भुक्त्वा सर्वदात्मानं कामकलारूपं भावयन् सुखेन विहरेत् ॥

**Colophon:**

इति नित्यक्रमविधिः ॥

---

No. 8643. नित्याराधनक्रमः.

NITYĀRĀDHANAKRAMAḤ.

Pages, 29. Lines, 24 on a page.

Begins on fol. 175*a* of the MS. described under No. 22.

Complete.

Deals with the manner of worshipping Viṣṇu as conducted by Vaiṣṇavas.

**Beginning :**

ओं तत्सवितुर्वरेणियं, मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः।

माध्वीर्नस्सन्त्वोषधीः —ओं भूः स्वाहा। . . . . .

भगवत्प्रीत्यर्थं सम्भवद्भिर्द्रव्यैस्सम्भवद्भिरुपचारैः ध्यानावाहनादिषोडशोपचार-पूर्वकं भगवदाराधनं करिष्ये—

अच्युताय ज्ञानाय हृदयाय नमः—अङ्गुष्ठाभ्यां नमः।

अनन्तायैश्वर्याय शिरसे स्वाहा—तर्जिनीभ्यां नमः।

**End :**

क्षमस्व मदीयानादिकर्मप्रवाहप्रवृत्तां स्वविषयायाश्च भोग्यबुद्धेर्जननी देहेन्द्रि(य)त्वेन सूक्ष्मे(ण)रूपेणावस्थितां दैवीं गुणमयी माय दासभूतः शरणागतोऽस्मि। तवास्मि दास इति वक्तारं मां तारय अथ पर्यङ्कासनं समर्प्य कवाटबन्धं कुर्यात्। तीर्थग्रहणम्—

आजन्मकृतपापानां प्रायश्चित्तं दिने दिने।
अकालमृत्युहरणं सर्वव्याधिनिवारणम्॥
समस्तपापक्षयकरं श्रीविष्णुपादोदकं पावनम्॥

---

## No. 8644. नित्यार्चनविधिः.
## NITYĀRCANAVIDHIḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 41*a* of the MS. described under No. 5717.

Complete.

Similar to the above.

This work which is also called Kriyādīpa is in Anuṣṭup metre and was composed by Bhaṭṭāraka (Parāśarabhaṭṭa).

**Beginning :**

पुंसे परस्मै लक्ष्म्यै च नमस्ते भरितां स्तुतिम्।
कुर्महेऽहाङ्क्रियालब्धसंसाराब्धितितीर्षया॥

पूर्वाचार्यान्नमस्स्तोत्रैरर्चयेद्भक्तिभावितः ।
यत्पादभक्तिर्वैकुण्ठपदप्राप्त्यविरोहिणी ॥
विष्णोर्नित्यार्चनविधिं भुक्तिमुक्तिप्रदायकम् ।
सारतः संप्रवक्ष्यामि सर्वेषां सुग्रहाय च ॥
काल्ये समुत्थाय हरेश्चिन्तयेत् प्रणमेद्वदेत् ।
रूपं पदाब्जे नामानि मनसा शिरसा गिरा ॥

* * * *

प्रक्षाल्य पादावाचम्य सुगन्धैश्चार्चनं क्रमात् ।
यागभूमिं प्रविश्याद्भिस्सम्प्रोक्ष्यास्त्रं च विन्यसेत् ॥
अष्टाविंशतिकृत्वस्तु मन्त्रमावर्त्य चेतसा ।
प्राणायामत्रयं कुर्यात्सन्निधावासने स्थितः ॥

**End:**

श्रीमत्पराङ्कुशादिभ्यो भक्तेभ्यश्च निवेदयेत् ।
विष्णोर्निवेदितं सर्वं पश्चाद्भुञ्जीत च स्वयम् ॥
कृतं भट्टारकाख्येन क्रियादीपं समुज्ज्वलम् ।
प्रेक्षध्वं पुण्डरीकाक्षपरिचर्यापरायणाः ॥

---

No. **8645.** नित्यार्चनविधिः.

NITYĀRCANAVIDHIḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 9*a* of the MS. described under No. 6460.

Incomplete.

Deals with the manner of worshipping Śiva.

**Beginning:**

वक्ष्ये शिवार्चनं पुण्यं भुक्तिमुक्तिफलप्रदम् ।
शिवार्चनन्तु द्विविधं परार्थस्वार्थभेदतः ॥
परार्थं ब्राह्मणाः कुर्युर्दीक्षिता यज्ञनन्दिताः ।
सर्वे स्वार्थं प्रकुर्वीरन् दीक्षिता ब्राह्मणादयः ॥

* * * *

उत्तमं मध्यमं नीचं यजनं तत्पुनस्त्रिधा ।
प्रत्येकं त्रिविधं चेति नवधा कालभेदतः ॥
अष्टयामेषु यजनमुत्तमोत्तममुच्यते ।
प्रातरारभ्य यामेषु सप्तसूत्तममध्यमम् ॥

* * * *

प्रातर्मध्याह्नसायाह्ने निशीथे मध्यमध्यमम् ।
प्रातर्मध्यन्दिने सायं यजनं मध्यमाधमम् ॥

**End:**

द्वारस्योत्तरशाखायामेकास्यं त्र्यम्बकं यजेत् ।
कालिन्दी कज्जलाभासां कच्छ . . . जसंस्थिताम् ॥
कृष्णाम्बरविभूषाढ्यामेकवक्त्रां द्विलोचनाम् ।
सचामरसुधाकुम्भा कुम्भा ।

---

No. 8646. पञ्चदशीमानसपूजा.

PAÑCADAŚĪMĀNASAPŪJĀ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 48*a* of the MS. described under No. 5858.

Gives the stanzas to be repeated for conducting mentally the worship of Dēvī, the stanzas beginning with the various letters of the Śrīvidyāmantra.

**Beginning:**

कल्लोलोल्लसितामृताब्धिलहरीमध्ये विराजन्मणि-
द्वीपे कल्पकवाटिकापरिवृते कादम्बवाट्युज्ज्वले ।
रत्नस्तम्भसहस्रनिर्मितसभामध्ये विमानोत्तमे
चिन्तारत्नविनिर्मिते जननि ते सिंहासनं भावये ॥

* * * *

ईशानादिपदं शिवैकफलकं रत्नासनं ते शुभं
पाद्यं कुङ्कुमचन्दनादिभरितं चार्घ्यं सरत्नाक्षतम् ।
शुद्धैराचमनीयकं तव जलैर्भक्त्या मया कल्पितं
कारुण्यामृतवारिधे तदखिलं सन्तुष्टये कल्प्यताम् ॥

**End:**

श्रीमन्त्राक्षरमालया परशिवां यः पूजयेच्चेतसा
सन्ध्यासु प्रतिवासरं तव पुरो मातर्जपेन्मन्त्रवित् ।
तस्य क्षोणिभुजो भवन्ति वशगा लक्ष्मीश्चिरस्थायिनी
वाणी निर्मलसूक्तिभारभरिता जागर्ति दीर्घं वयः ॥

**Colophon:**

इति श्रीमच्छङ्कराचार्यविरचितं मानसिकषोडशोपचारपूजास्तोत्रं सम्पूर्णम् ॥

---

## No. 8647. पञ्चमयागविधिः.

## PAÑCAMAYĀGAVIDHIḤ.

Pages, 23. Lines, 6 on a page.

Begins on fol. 145*b* of the MS. described under No. 537 and 7247.

Complete. Forms the 15th Taraṅga of Saubhāgyaratnākara.

Prescribes the manner of conducting the worship of the woman who serves as a medium of Dēvī and who is chosen from among the Mātaṅgī class, *i.e.*, the Pañcamas. This worship is supposed to lead to Mukti (salvation).

By Viśadānandanātha, son of Saccidānandanātha.

**Beginning:**

अथ पञ्चमयागविधिः—

तत्र साधकः कृतात्मपूजनक्रियः स्वशिरसि गुरुपादुकां ध्यात्वा संपूज्य प्रणम्य वक्ष्यमाणप्रकारेण श्रीगुर्वाज्ञामादाय, सर्वलक्षणसंपन्नां ब्रह्मविद्यादिदीक्षितां दूतीं प्रातर्निमन्त्रितः साधकस्स्वयं गत्वा प्रणम्य, समा-

हूयानीय, पूजास्थाने मृद्वासने समुपवेश्य, तस्याः पादमुष्णजलेन प्रक्षाल्य, सुखोपाविष्टां तां प्रणम्य कृताञ्जलिस्सन् भवति श्रीपरदेवतापूजार्थं त्वं दूती भूत्वा मां कृतार्थं कुर्विति प्रार्थ्य, देव्या अमृतस्त्वासने उप-वे(वि)श्य, कृताञ्जलिरित्यादि श्रीपरदेवताप्रीत्यर्थं दूतीयजनमहं करिष्ये इति सङ्कल्प्य

* * * *

अथ पूजाफलं वक्ष्ये उत्तरादुत्तरोत्तरम् ।
स्वशक्त्या अयुतं पुण्यं परशक्तिप्रपूजने ॥
ततो वेश्यादिना(तो) ज्ञेया रजकी च ततोऽधिका ।
रजक्याः क्षुरकी श्रेष्ठा क्षुरक्याश्चर्मकारिणी ॥

* * * *

तथा ब्रह्मयामले नारद उवाच—
सर्वज्ञ जगतां नाथ शाक्तं चेच्छति चोदितम् ।
मातङ्गीपूजनं तत्र कथं मुक्तिप्रदायकम् ॥
अर्चने प्रथिता वेश्या वेश्या सा तु रजस्वला ।
रजस्वला च मातङ्गी सा दूती सर्वमङ्गला ॥
एतत्प्रोक्तं त्वया पूर्वमिदानीं तद्विपर्ययः ।

**End:**

अभ्यङ्ग(ञ्ज)नं विना देवि कुष्ठी भवति पार्वति ।
विना दन्तक्षतं देवि लोके भवति निन्दितः ॥
पञ्चमी तु सकृद्धत्वा सावित्री जायते ध्रुवम् ।
द्वितीयेन तु लक्ष्मीस्स्यात् तृतीये पार्वती भवेत् ॥
ततो दद्यात्सुखाधिक्यं तस्याः पुण्यं न गण्यते ।
आलिङ्गने हरेद्रोगान् धनधान्यादि चुम्बने ॥
नखदन्तक्षताद्यैश्च तदा मोक्षः प्रजायते ।
सायुज्यं सङ्गमेन स्यात् सत्यमेव न संशयः ॥

**Colophon :**

इति सच्चिदानन्दनाथचरणारविन्दद्वन्द्वान्तेवासिश्रीविशदानन्दनाथेन विरचिते सौभाग्यरत्नाकरे पञ्चदशतरङ्गे पञ्चमयागविधिरयं समाप्तः ॥

---

## No. 8648. परमेश्वरपूजा.

## PARAMEŚVARAPŪJĀ.

Pages, 17. Lines, 6 on a page.

Begins on fol. 24*a* of the MS. described under No. 217.
Complete.

Deals with the manner of conducting the worship of Parameśvara or Śiva.

**Beginning :**

एवङ्गुणविशेषणविशिष्टायां पुण्यतिथौ श्रीपरमेश्वरमुद्दिश्य श्रीपरमेश्वरदेवताप्रीत्यर्थं सम्भवता प्रकारेण सम्भवता नियमेन सम्भवाद्भिर्द्रव्यैः सम्भवद्भिरुपचारैः यावच्छक्यश्रीपरमेश्वरपूजां करिष्ये। आदौ कलशशङ्खपीठपूजां करिष्ये।

कलशस्य मुखे शम्भुः कण्ठे रुद्रस्समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥

**End :**

त्वं यज्ञस्त्वं वषट्कारः त्वमिन्द्रस्त्वꣳरुद्रः त्वं विष्णुः त्वं ब्रह्मा त्वं प्रजापतिः । त्व [तताप]आ(मा)पो ज्योती रसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ।

राजाधिराजाय प्रसह्य साहिने । नमो वयं वैश्रवणाय कुर्महे । स मे कामान् कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय । श्रीमहाराजाय नमः—इति मन्त्रपुष्पम् ॥

## No. 8649. पार्थिवलिङ्गपूजाविधानम्.
## PĀRTHIVALIṄGAPŪJĀVIDHĀNAM.

Pages, 27. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 5885

Complete.

Deals with the manner of conducting the worship of a Linga made of earth. This is considered to be necessary for ensuring the efficacy of other devotional acts

**Beginning:**

नारद उवाच—

धर्मकामार्थमोक्षाणां साधनं परमं हितम् ।
तत्सर्वं कथयाशु त्वमनुग्राह्योऽस्मि चेत्तव ॥

* * * *

ईश्वर उवाच—

शृणु नारद वक्ष्यामि शिवपूजाविधानकम् ।
यस्यानुष्ठानमात्रेण कृतकृत्यो भवेन्नरः ॥

अकृत्वा पार्थिवं लिङ्गं योऽन्यं देवं प्रपूजयेत् ।
वृथा भवति सा पूजा स्नानदानादिकं वृथा ॥

**End:**

ओं ह्रौं ह्रीं जूं सः ओं नमश्शिवाय प्रसन्नपारिजाताय स्वाहा ।

इमं मन्त्रं पूजान्ते नित्यमष्टोत्तरशतं जपेत् । अनेनैव मन्त्रेण नित्यमेकादशाहुतिर्जुहुयात् ॥

**Colophon:**

इति पार्थिवलिङ्गपूजाविधानं समाप्तम् ॥

---

## No. 8650. पार्थिवलिङ्गपूजाविधिः.
## PĀRTHIVALIṄGAPŪJĀVIDHIḤ.

Pages, 17. Lines, 5 on a page.

Begins on fol. 165*a* of the MS. described under No. 29.

Incomplete.

Similar to the above.

**Beginning:**

आचम्य प्राणानायम्य सङ्कल्प्य शुभतिथौ परमेश्वरप्रेरणया श्री-परमेश्वरप्रीत्यर्थं . . . . . . . . . . . . पार्थिव-पूजां करिष्ये ।

अपसर्पन्तु ये भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारः ते गच्छन्तु शिवाज्ञया ॥

**End:**

असुनीते पुनरस्मासु चक्षुः । पुनः प्राणमिह नो धेहि भोगम् । ज्योक् पश्येम सूर्यमुच्चरन्तमनुमते मृडया न स्वस्ति । अमृतं वै प्राण-ममृतमापः प्राणानेव यथास्थानमुपह्वयते ।

---

No. 8651. पार्थिवलिङ्गपूजाविधिः.

PĀRTHIVALIṄGAPŪJĀVIDHIḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 160*a* of the MS. described under No. 29.
Complete.
Similar to the above.

**Beginning:**

सर्वाधारधरे देवि त्वद्रूपां मृत्तिकामिमाम् ।
ग्रहीष्यामि प्रसन्नात्मन् लिङ्गार्थं भवति प्रभो ॥

भूमिं प्रार्थ्य, सद्योजातं प्रपद्यामीति मृदं गृहीत्वा, वामदे-वाय नम इति मृदं संशोध्य ।

**End:**

शङ्करस्य चरिता कथामृतं . . सम्भवन्तु मम जन्मजन्मनि ॥
अपराधसहस्राणि . . क्षमस्व परमेश्वर ॥

No. 8652. पार्थिवलिङ्गपूजाविधिः.
PĀRTHIVALIṄGAPŪJĀVIDHIḤ.

Substance, palm-leaf. Size, 6¼ × 1⅜ inches. Pages, 18. Lines, 4 on a page. Character, Telugu. Condition, injured. Appearance, new.

Complete.

Similar to the above. The Mantras to be uttered here are what are prescribed in the Kālāgnirudrōpaniṣad.

**Beginning:**

अथ कालाग्निरुद्रोपनिषद्विधिना सर्वाङ्गं भस्मनोद्धूल्य, भस्यङ्गं रुद्राक्षं धृत्वा, सदाशिवं मनसा स्मरन् उदीचीं गत्वा, भूमिं प्रार्थ्य, शुचौ देशे बद्धाङ्गुलि मृदमुपाकृत्य, त्रिवारं कण्टकवालुकादिरहिता मृत्तिका ये पथामित्यानीय, नमो रुद्रेभ्य इति संस्थाप्य ।

**End:**

इति स्तुत्वा प्रणम्याथ जले लिङ्गं विसर्जयेत् ॥
ईशानस्सर्वविद्यानामोङ्कारं भुवनेश्वर ।
मन्दिरं गच्छ भगवन् पुनरायाहि शङ्कर ॥

---

No. 8653. पार्थिवलिङ्गपूजाविधिः.
PĀRTHIVALIṄGAPŪJĀVIDHIḤ.

Substance, palm-leaf. Size, 14¼ × 1½ inches. Pages, 30. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1a. The other work herein is Mahānyāsa 16a.

Complete.

Similar to the above. The method here given is as prescribed in Kāmikāgama. The MS. is dated Thursday (Puṣyanakṣatra), the 7th day of the bright fortnight in the month of Vaiśākha of Pramādi.

**Beginning:**

उत्तिष्ठन्तु भूतपिशाचा ये ते भूमिभारकाः ।
एतेषामविरोधेन ब्रह्मकर्म समारभे ॥

ओं भूः ओं भुवः । . . . . . . . .

देवदेवस्य पार्वतीसमेतपार्थिवेश्वरस्य कामिकागमोक्तप्रकारेण नित्यार्चनविधानं करिष्ये । तदङ्गकलशाराधनं कुर्यात् ।

**End:**

हृत्पद्मकर्णिकामध्ये उमया सह शङ्कर ।
प्रविश त्वं महादेव सर्वैरावरणैस्सह ॥

इति लिङ्गमाघ्राय—

कैलासशिखरावास दीनावनसमुत्सुक ।
जलरूप महादेव जलावासं कुरु प्रभो ॥

इति तटाके वा कूपे वा नदे वा लिङ्गं निक्षिपेत् ।

**Colophon:**

प्रमाथ्यब्दे च वैशाखे शुक्लपक्षे शुभप्रदे ।
सप्तम्यां गुरुवारे च पुष्यनक्षत्रसंयुते ॥
श्रीशङ्करान्वयाम्भोधिशशाङ्काय महात्मने ।
उमामहेशभक्ताय वेङ्कटाचलकृष्टये ॥
तेल्कैपल्लिकुलोत्थेन रामलिङ्गेन सादरात् ।
पार्थिवेशार्चनाविधिः लिखिता परया मुदा ॥

---

## No. 8654. पुष्पाध्यायः.
## PUṢPĀDHYĀYAḤ.

Pages, 3. Lines, 4 on a page.

Begins on fol. 10*a* of the MS. described under No. 6600.

Incomplete.

Mentions the various flowers to be used in the worship of the several deities and the merits that accrue therefrom.

**Beginning:**

जलण्डापुष्पमेकं च लिङ्गस्योपरि निक्षिपेत् ।
अमन्त्रं वा समन्त्रं वा कुलकोटिं समुद्धरेत् ॥

स्त्र(ए)लोदकेन यो लिङ्गं भक्त्या च स्नापयेत्सकृत् ।
काञ्चनेन विमानेन शिवलोके महीयते ॥

**End:**

रक्तचन्दनसिक्तं च कुङ्कुकर्पूरपूजनम् ।
(नाशयेत्) पिशुनं चैव ग्रहदोषस्य कुङ्कुमम् ॥

---

## No. 8655. पूजाविषयवचनानि.
## PŪJĀVIṢAYAVACANĀNI.

Substance, palm-leaf. Size, 10¼ × 1 inches. Pages, 85. Lines, 5 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Incomplete.

Certain quotations dealing with the manner of conducting the worship of deities.

**Beginning:**

षष्ठाद्ययोरुदात्तः स्यात् स्वरितोऽन्त्यद्वितीययोः ।
स्वरितस्तु चतुर्थ्यां तु शेषं तु निहताक्षरम् ॥

गारुडे—

निश्शङ्कं देवतागारे प्रवेशं कुरुते च यः ।
असिपत्रवने घोरे पतत्या ब्रह्मणो दिनात् ॥
पञ्चरात्रोपवासो वै पञ्चगव्येन शुध्यति ।
अप्रक्षालितपादस्तु प्रविष्टो देववेश्मनि ॥
विष्ठाकृमिर्भवेत्पापी शतजन्मसु मानवः ।

**End:**

प्रेषमन्त्रं समुच्चार्य सन्न्यासी योगमाचरेत् ।
शुचौ देशे विशुद्धात्मा वाङ्मनःकायदण्डभाक् ॥
न कुर्याद्यदि योगं यः कर्मचण्डाल एव हि ।

No. 8656. बगलापूजाविधानम्.
BAGALĀPŪJĀVIDHĀNAM.

Pages, 8. Lines, 7 on a page.

Begins on fol. 82a of the MS. described under No. 235.

Complete.

Deals with the manner of conducting the worship of Bagalā.

**Beginning :**

ईश्वर उवाच—

श्रृणु पार्वति वक्ष्यामि उपचारमनून् यथा ।
बगलामन्त्रसिद्धिस्तु षोडशैरुपचारकैः ॥
तप्तकाञ्चनसङ्काशां स्वर्णभूषणभूषिताम् ।
चतुर्भुजां पीतवस्त्रां पीतचन्द्रार्धशेखराम् ॥
पद्मासनसमासीनां किरीटेन विराजिताम् ।
एवं ध्यात्वा महादेवि कुर्यादावाहनं बुधः ॥

**End :**

ऐं ह्रीं श्रीं स्वाहा इति मन्त्रेण श्रीबगलापरमेश्वरि गन्धं पुष्पं धूपं दीपं नैवेद्यं समर्पयामीति हेतुपात्रार्चनाविधिः ॥

---

No. 8657. बगलापूजाविधानम्.
BAGALĀPŪJĀVIDHĀNAM.

Pages, 9. Lines, 10 on a page.

Begins on fol. 48a of the MS. described under No. 21.

Complete.

Similar to the above.

**Beginning :**

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ . . . . . .

श्रीबगलालक्ष्मीपरदेवताप्रीत्यर्थं सम्भवता नियमेन सम्भवद्भिर्द्रव्यैः सम्भवद्भिः पदार्थैः सम्भवद्भिरुपचारैः सम्भवाद्भिः प्रकारैः तत्कल्पोक्तविधानेन यावच्छक्यध्यानावाहनादिषोडशोपचारपूजां करिष्ये । मूलमन्त्रेण करहृदयन्यासं कुर्यात् । देवीं प्रार्थयेत् ।

**End:**

पदे पदे वा परिपूजकेभ्यस्सद्यस्स्वमेधादिफलं ददाति ।
तां सर्वपापक्षयहेतुभूतां प्रदक्षिणं ते परितः करोमि ॥

**Colophon:**

पूजाविधानं सम्पूर्णम् ॥

शान्तिः—

सम्पूजकानां परिपूजकानां जितेन्द्रियाणां च तपोधनानाम् ।
देशस्य कालस्य कुलस्य राज्ञः करोतु शान्तिं भगवान् कुलेशः ॥

---

No. 8658. बगलापूजाविधानम्.
BAGALĀPŪJĀVIDHĀNAM.

Pages, 7. Lines, 7 on a page.

Begins on fol. 131*b* of the MS. described under No 537 and 7247.

Complete.

Similar to the above. Contains only the manner of worshipping the seven Āvaraṇas or protective sheaths which are considered to surround the Dēvī.

**Beginning:**

अथ बगलामुख्यानुष्ठानमन्त्रपूजाविधिरुच्यते ।

ब्राह्मे मुहूर्ते चोत्थाय स्वगुरुं (ध्यानपूर्व)मजपां सङ्कल्प्य स्नानसन्ध्यावन्दनं कुर्यात् । तद्यथा । . . . . . . . . .

अथावरणपूजामारभते—

चतुरश्रबहिर्द्वारपूजा । ओं गं गणपति अघोराय नमः—पूर्वे, ओं वं वटुक नारसिंहाय नमः—दक्षिणे ।

**End:**

अनेन पुष्पसुगन्धपरिमलपीताक्षतपीतपुष्पादिधूपदीपनैवेद्यताम्बूलसर्वोपचारैस्सह पूजयते ।

इति सप्तमावरणम् ॥

आं ह्रीं क्रों ग्लौं ठं ऐं क्लीं श्रीं ह्रीं बगलामुखि आवेशया-
वेशय आं ह्रीं क्रों ब्रह्मास्त्ररूपिणि एहि एहि आं ह्रां क्रों मम हृदये
चिरं तिष्ठ चिरं तिष्ठ हुं फट् स्वाहा ॥

---

## No. 8659. भगवत्पूजाक्रमः.
## BHAGAVATPŪJĀKRAMAḤ.

Pages, 48. Lines, 9 on a page.

Begins on fol. 28a of the MS. described under No. 3986.

Complete.

The work consisting of 508 stanzas is attributed to Vaṅgipurēśa.

Deals with the manner of worshipping Viṣṇu. This is intended for the followers of Rāmānuja.

**Beginning:**

. . . . . राजस्य वन्दे वङ्गिपुराधिपम् ।
श्रियः पतिं जगद्योनिं प्रणम्य पुरुषोत्तमम् ॥
कथयामि यथाशक्ति तत्पूजाक्रममञ्जसा ।
ब्राह्मे मुहूर्ते सम्प्राप्ते निद्रां त्यक्त्वा प्रसन्नधीः ॥
हरिर्हरिर्हरिरिति व्याहरेद्वैष्णवः पुमान् ।

**End:**

वर्धतां वैष्णवी लक्ष्मीरक्षया भक्तिवृद्धिदा ॥
अष्टोत्तरैरनुपमैश्श्लोकानां पञ्चभिश्शतैः ।
उपचारानुपूर्वीयं रचिता परमात्मनः ॥

---

## No. 8660. भगवदाराधनक्रमः.
## BHAGAVADĀRĀDHANAKRAMAḤ.

Substance, palm-leaf. Size, 15¼ × 1½ inches. Pages, 20. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 32a. The other works herein are Puruṣasūkta 1a, Nārāyaṇasūkta 3a, Bhagavadutsavanityahōmavidhi 5a, Bhaga-

vadārādhanavidhi 15a, Bhagavadārādhanakrama 42a, Viṣṇu-ahasranāmastōtra 66a, Siddharūpa 72a.

Complete.

Similar to the above: by Rāmānujārya.

**Beginning:**

रामानुजमुनिर्जीयाद्यो हरेर्भक्तियन्त्रितः ।
कलिकोलाहलक्रीडामुषाम्नहमुपाहरत् ॥

. . . . भगवदाराधनप्रयोगं वक्ष्ये—भगवत्कैङ्कर्यैकरतिः परमैकान्ती भूत्वा भगवानेव ।

* * * *

स्वयमेव प्रीतं कारयितुमुपक्रमत इत्यनुसन्धाय तीर्थं गत्वा ।

**End:**

ततोऽर्घ्यं जलं प्रदाय भगवन्तमनुज्ञाप्य पूजां समापयेत् ॥

उपचारापदेशेनेत्यादि अज्ञानादथ वा ज्ञानादित्यादि जितन्त इत्यादि ॥

**Colophon:**

इति श्रीमद्रामानुजार्यकृतौ भगवन्नित्यार्चनविधिः सम्पूर्णः ॥

---

No. 8661. भगवदाराधनक्रमः.

BHAGAVADĀRĀDHANAKRAMAḤ.

Pages, 39. Lines, 5 on a page.

Begins on fol. 27a of the MS. described under No. 2964

Complete.

Same as the above.

**Beginning:**

प्रणामं लक्ष्मणमुनिः प्रतिगृह्णातु मामकम् ।
प्रसाधयति यत्सूक्तिः स्वाधीनपतिकां श्रुतिम् ॥

अथ परमैकान्तिनो भगवदाराधनक्रमं वक्ष्ये—

भगवत्कैङ्कर्यैकरतिः परमैकान्ती भूत्वा भगवानेव स्वशेषभूतेन . . . . . स्वात्मानं प्रीतं कारयितुमुपक्रमत इत्यनुसन्धाय तीर्थं गत्वा ।

**End:**

ततोऽर्घ्यजलं प्रदाय भगवन्तमनुज्ञाप्य पूजां समापयेत् ॥

**Colophon:**

इति श्रीमद्भगवद्रामानुजविरचितेषु भगवदाराधनं नित्यरत्नं सम्पूर्णम् ॥

---

No. 8662. भगवदाराधनक्रमः.

BHAGAVADĀRĀDHANAKRAMAḤ.

Pages, 47. Lines, 8 on a page.

Begins on fol. 42a of the MS. described under No. 8660.

Complete.

Similar to the above.

**Beginning:**

ब्राह्मे मुहूर्ते उत्थाय हरिरिति सप्तकृत्व उच्चार्य गुरुपरम्परां द्वयं चानुसन्धाय ।

कूर्मादीन् . . . विष्णुभक्तान् प्रपद्ये ॥

इति ध्यात्वा ओं वासुदेवाय नमः, ओं सङ्कर्षणाय नमः, ओं प्रद्युम्नाय नमः, ओं अनिरुद्धाय नमः ।

पुरस्तात् केशवः पातु चक्री जाम्बूनदप्रभः ।
पश्चान्नारायणश्शङ्खी नीलजीमूतसन्निभः ॥

**End:**

ओं कृतञ्च करिष्यामि भगवन्नित्येन भगवत्प्रीत्यर्थेन महाविभूतिचातुरात्म्यभगवद्वासुदेवपादारविन्दार्चनेन योगेन भगवत्कर्मणा भगवान् प्रीयतां वासुदेवः—इति विज्ञापयेत् ॥

## No. 8663. भगवदाराधनक्रमः.
## BHAGAVADĀRĀDHANAKRAMAḤ.

Pages, 10. Lines, 10 on a page.

Begins on fol. 19a of the MS. described under No. 206.

Complete.

Similar to the above. A Sanskrit translation of the work composed in Tamil by Ramyajāmātṛmuni.

**Beginning:**

प्रातस्स्नात्वा नित्यकर्म कृत्वा पादद्वयं करौ ।
प्रक्षाल्याचम्य पुरतो विष्णोर्गुरुपरम्पराम् ॥
ध्यात्वानुसन्धाय मूलमन्त्रं च शरणागतः ।
प्रणम्य दक्षिणे पार्श्वे स्थितस्स्वाचार्यचोदितः ॥
आराधने प्रवृत्तोऽस्मीत्यनुसन्धाय सादरम् ।
कूर्मादीनिति यत्पद्यं तत्सार्थमनुसन्दधत् ॥

**End:**

विश्रमस्वेति तीर्थं च प्रसादमतिपावनम् ।
स्वीकुर्यात्प्रीतिसंयुक्तः कृतार्थोऽस्मीति भावयन् ॥
भाषया रम्यजामातृमुनेराराधनक्रमः ।
श्रीशस्य दर्शितस्सोऽयं स मया च प्रदर्शितः ॥

---

## No. 8664. भगवदाराधनक्रमः.
## BHAGAVADĀRĀDHANAKRAMAḤ.

Substance, palm-leaf. Size, 13¼ × 1½ inches. Pages, 16. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance old.

Begins on fol. 1a The other work herein is Āsanamantra 9a.

Complete.

Similar to the above The Mantras referred to are taken from the Puruṣasūkta.

**Beginning:**

ज्ञानानन्दमयं देवं . . हयग्रीवमुपास्महे ॥

वेदान्तवेद्याखिलवेदमूर्ते विष्णो विरूपाक्षविधीन्द्रवन्द्य ।
विश्वेश्वराशेषविशेषरूप कवाटमुद्घाटय कञ्जनाभ ॥

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।
कुरु घण्टारवं चैव देवताह्वानलाञ्छनम् ॥

* * * *

सम्भवता नियमेन सम्भवद्भिरुपचारैः सम्भवद्भिर्द्रव्यैः पुरुषसूक्तप्रकारेण भगवत्पूजां करिष्ये ।

**End:**

उपचारापदेशेन कृतानहरहर्मया ।
अपचारानिमान् सर्वान् क्षमस्व पुरुषोत्तम ॥
आत्रेयवंशाम्बुधिपूर्णचन्द्रश्रीरामसूरेस्सुगुणाकरस्य ।
आराधनं श्रीपुरुषोत्तमस्य व्यलेखि तत्पूरुषसूक्तमन्त्रैः ॥

---

No. 8665. भगवदाराधनविधिः.

BHAGAVADĀRĀDHANAVIDHIḤ.

Pages, 8. Lines, 10 on a page.

Begins on fol. 2a of the MS. described under No. 2408.

Complete.

Similar to the above. The use of the Mantras is here explained in Telugu.

**Beginning:**

नमोऽस्मदाचार्यपरम्पराभ्यो नमो नमो भागवतव्रजेभ्यः ।
नमो नमोऽनन्तमुखामरेभ्यो नमश्श्रियै श्रीपतये नमस्ते ॥

* * * *

ओं यं वायवे नमः, ओं रं अग्नये नमः, ओं वं अमृताय नमः, अस्मद्गुरुभ्यो नमः . . . . . . . . . . . . .

कूर्मादीन् दिव्यलोकान् तदनु मणिमयं मण्टपं तत्र शेषं
तस्मिन्धर्मादिपीठं तदुपरि कमलं चामरग्राहिणीश्च ।
विष्णुं देवीर्विभूषायुधगणमुरगं पादुके वैनतेयं
सेनेशं द्वारपालान् कुमुदमुखगणान् विष्णुभक्तान् प्रपद्ये ॥

आचम्य सङ्कल्पं कृत्वा देशकालौ सङ्कीर्त्य एवङ्गुणविशेषणविशिष्टायां शुभतिथौ भगवदाज्ञा(ज्ञया)भगवत्कैङ्कर्यरूपं सम्भावितनियमेन सम्भवद्भिर्द्रव्यैस्सम्भवद्भिरुपचारैर्यावच्छक्यध्यानावाहनादिषोडशोपचारपूर्वकं भगवदाराधनं करिष्ये ।

**End :**

पादयोः—दामोदराय नमः, भूर्भुवस्सुवरों—इति दिग्बन्धः । ध्यानम्—

गोक्षीराभं पुण्डरीकायताक्षं चक्राद्यङ्गैर्भूषणैर्भूषिताङ्गम् ।
श्रीभूमिभ्यामर्चितं योगपीठे स्वस्थं वन्दे योजयेत्पौरुषेण ॥

---

## No. 8666. भगवदाराधनविधिः.

## BHAGAVADĀRĀDHANAVIDHIḤ.

Substance, palm-leaf. Size, 13¼ × 1 inches. Pages, 35. Lines, 4 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 31*a*. The other works herein are Viṣṇupūjā 1*a*, Gaulīphala 5*a*, Praśnaviṣaya 6*a*, Gāyatriyantraviṣaya 18*a*, Hanumatkavaca 23*a*, Gāyatrīvarṇārtha 25*a*, Śrīguṇaratnakōśa 28*a*, Bhagavadārādhanavidhi 49*a* and 55*a*, Bhagavadārādhanasaṅgraha 64*a*, Śaraṇāgativicāra 70*a*, Prapattiniṣṭhā 74*a*.

Complete.

Similar to the above: by Rāmānujācārya.

**Beginning :**

ततः पाणी प्रक्षाल्य उदकाञ्जलिमादाय तीर्थस्यार्घ्यमुत्क्षिप्य भगवद्वामपादाङ्गुष्ठविनिस्सृतगङ्गाजलं सङ्कल्पितपीठ आवाह्य मूलमन्त्रेणोदकमभिमन्त्र्य उदकाञ्जलिमादाय सप्तकृत्वोऽभिमन्त्र्य स्वमूर्ध्नि सिञ्चेत् ।

**End:**

मनोबुद्ध्यभिमानेन सह न्यस्य रसातले ।
कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमम् ॥
प्रदक्षिणसमेतेन ह्येवंरूपेण सर्वदा ।
अष्टाङ्गेन नमस्कृत्य उपविश्याग्रतो गुरोः ॥

इत्युक्तोऽष्टाङ्गप्रणामः शरणागतिप्रकारश्च पूर्वोक्तः । ततोऽर्घ्यजलं प्रदाय भगवन्तमनुज्ञाप्य पूजां समापयेत् ॥

उपचारापदेशेनेत्यादि, अज्ञानादथवेत्यादि, यच्चापराधमित्यादि, जितन्त इत्यादिस्तोत्रपठनं कुर्यात् ॥

**Colophon:**

इति श्रीमद्रामानुजाचार्यविरचितो भगवदाराधनविधिः समाप्तः ॥

---

No. **8667.** भगवदाराधनविधिः.

BHAGAVADĀRĀDHANAVIDHIḤ.

Pages, 18. Lines, 7 on a page.

Begins on fol. 55*a* of the MS. described under No. 8666.
Complete.
Similar to the above.

**Beginning:**

ब्राह्मे मुहूर्ते उत्थाय हरिर्हरिरिति सप्तकृत्व उच्चार्य तीर्थं गच्छेत् । आयुर्बलं—वनस्पते इत्यन्तमिति मन्त्रेण दन्तधावनं कृत्वा ।

**End:**

एवम्प्रकारेण शरणमुपगम्य ततोऽर्घ्यं दत्वा भगवन्तमनुज्ञाप्य भगवत्पूजां समापयेत् । कान्तस्त इत्यादि(ना)जितन्त इत्यादिना उपचारापदेशेनेत्यादिना स्तोत्रपठनं कुर्यात् ॥

**Colophon:**

भगवदाराधनविधिस्समाप्तः ॥

## No. 8668. भगवदाराधनविधिः.
## BHAGAVADĀRĀDHANAVIDHIḤ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 49*a* of the MS. described under No. 8666.

Incomplete.

Similar to the above.

**Beginning:**

श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवम् ।
यतीन्द्रप्रवणं वन्दे रम्यजामातरं मुनिम् ॥

प्रातःकाले समुत्थाय शौचाचमनदन्तधावनपूर्वकं स्नानादि सर्वमनुष्ठानं कृत्वा सम्यक्पादौ च प्रक्षाल्याचम्य द्वादश पुण्ड्राणि धृत्वा श्रीपतेः पुरतो गत्वा प्रणम्य गुरुपरम्परानुसन्धानपूर्वकं रहस्यत्रयञ्चानुसन्धाय திருப்பள்ளியெழுச்சி प्रबन्धमनुसन्धाय ।

**End:**

तीर्थप्रसादादिकमाचार्यपरम्पराणां प्रभूतज्ञानाधिकानां समर्प्य तच्छेषं स्वयं स्वीकर्तव्यम् । सायंकाले देहशुद्ध्यनुष्ठानपूर्वकमूर्ध्वपुण्ड्रधारणं कृत्वा भगवतः पुरो देशं गत्वा गुरुपर.

---

## No. 8669. भगवदाराधनविधिः.
## BHAGAVADĀRĀDHANAVIDHIḤ.

Pages, 37. Lines, 6 on a page.

Begins on fol. 15*a* of the MS. described under No. 8660.

Incomplete.

Similar to the above.

**Beginning:**

प्रथमं कुम्भनिर्माणं क्षालनं तु द्वितीयकम् ।
तृतीयं सूत्रवेष्टं तु चतुर्थं चाम्बुपूरणम् ॥

* * * *

एवं द्वादशभेदेन कुम्भस्थापनमाचरेत् ॥

अर्घ्यं शिरसि विन्यस्य पाद्यं पादतले न्यसेत् ।
हस्ते चाचमनं चैव गन्धं कायानुलेपने ॥

**End :**

समेवैतैर्युते तत्र तेजःपुञ्जैर्विसार्पिभिः ॥
भ्राजमानं दुरालोकं देहमण्डलनिर्गतैः ।
भासयन्तं जगत्सर्वं ध्यायन् प्रक्षीणकल्मषः ॥

---

No. 8670. भगवदाराधनसङ्ग्रहः.

BHAGAVADĀRĀDHANASAṄGRAHAḤ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 6*a* of the MS. described under No. 8666.

Complete.

Similar to the above: by Varadārya of Vatsagōtra.

**Beginning :**

सुप्रक्षाळितपाणिपादस्स्वाचान्तो यागभूमिं दक्षिणपादविन्यासपूर्वकं गच्छेत् । ओं भूं भूम्यै नम इति भूमिं सङ्गृह्य ओं यं वायवे नम इति मूलमन्त्रशिरस्कं दक्षिणहस्ते न्यस्य शोषयामीति तां विशोष्य ।

**End :**

भगवत्पादुकाभ्यां नमः- -स्वामिन् पर्यङ्कासनमलङ्कुरुष्व ।

पर्यङ्कासने—

पाद्यमंशुकगन्धस्रक्ताम्बूलं तालवृन्तकम् ।
प्रदक्षिणनमस्कारस्तोत्रैर्लक्ष्मीशतोषणम् ॥
इति नित्येन लक्ष्मीशसमाराधनसङ्ग्रहः ।
दयालुनायं वात्स्येन वरदार्येण निर्मितः ॥

---

No. 8671. मरिडीमहालक्ष्मीपूजाविधिः.

MARIḌĪMAHĀLAKṢMĪPŪJĀVIDHIḤ.

Substance, palm-leaf. Size, 6⅞ × 1⅝ inches. Pages, 27. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Lakṣmyaṣṭōttaraśatanāmāvali 15*a*, Dēvyaṣṭōttaraśatanāmāvali 21*a*, Raṅganāthastava 23*a*.

Complete.

Deals with the manner of conducting the worship of Lakṣmī and Nārāyaṇa of the shrine at Mariḍi.

**Beginning:**

उत्तिष्ठन्तु भूतपिशाचा ये ते भूमिधारकाः ।
एतेषामविरोधेन ब्रह्मकर्म समारभे ॥

* * * *

मरिडीमहालक्ष्मीदेवतामुद्दिश्य मरिडीमहालक्ष्मीप्रीत्यर्थं सम्भवद्भिः द्रव्यैस्सम्भवद्भिः पदार्थैः सम्भवद्भिरुपचारैः सम्भवता नियमेन यावच्छ क्यध्यानावाहनादिपुरुषसूक्तविधानेन षोडशोपचारपूजां करिष्ये, तदङ्गक- लशपूजां करिष्ये ।

**End:**

अन्तर्बहिस्संस्थितमद्वितीयगानन्दकन्दं कमलासमेतम् ।
क्षीराब्धिमध्ये कृतशेषतल्पमुद्रासयामीश्वरमात्मरूपम् ॥

---

No. 8672. महान्यासपूजाविधिः.

MAHĀNYĀSAPŪJĀVIDHIḤ.

Pages, 12. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 8632.

Incomplete.

Describes how the Rudrapraśna can be used for Aṅganyāsa and Karanyāsa and for bathing the image of the deity.

**Beginning:**

अथातः पञ्चाङ्गरुद्राणां नमस्ते . ते नमः ।

ओं नं कं खं गं घं ङं ओं नमो भगवते रुद्राय पूर्वाङ्गरुद्राय नमः, निधनपतये नमः, निधनपतान्तिकाय नमः, ऊर्ध्वाय नमः, ऊर्ध्व- लिङ्गाय नमः ।

**End:**

सहस्रशीर्षा पुरुषः . सन्ति देवाः—शिरसे नमः ।
अद्भ्यस्सम्भूतः . इष्टं मनिषाण । अमुं मनिषाण ।
सर्वं मनिषाण—शिखायै वौषट्.

No. 8673. महान्यासपूर्वकपूजाविधानम्.

MAHĀNYĀSAPŪRVAKAPŪJĀVIDHĀNAM.

Pages, 61. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 3664.

Complete.

Similar to the above.

**Beginning:**

अथातः पञ्चाङ्गरुद्राणां न्यासपूर्वकं जपहोमार्चनाभिषेकविधिं व्याख्यास्यामः । . . . . . . . . . . . . .

आराधितो मनुष्यैस्तु सिद्धैर्देवासुरादिभिः ।
आराधयामि भक्त्यात्मा मां गृहाण महेश्वर ॥

त्रियम्बकं यजामह इत्यैनमावाहयेत् ।

आ त्वा वहन्तु हरयस्सचेतसश्श्वेतैरश्वैस्सह केतुमद्भिः । वाताजवैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्वोम्—ईशानमावाहयामीत्यावाह्य ।

**End:**

कामधेन्वादिधेनुभ्यो नमः, कल्पकवृक्षादिसमस्तवृक्षेभ्यो नमः, त्रयस्त्रिंशत्कोटिदेवताभ्यो नमः, प्रभवादिषष्टिसंवत्सरेभ्यो नमः, चैत्रादिद्वादशमासेभ्यो नमः, तिथिनक्षत्रवारयोगकरणेभ्यो नमः, श्रीउमामहेश्वराय नमः ॥

---

No. 8674. महालक्ष्मीपूजाविधिः.

MAHĀLAKṢMĪPŪJĀVIDHIḤ.

Pages, 7. Lines, 10 on a page.

Begins on fol. 44*b* of the MS. described under No. 2409.

Complete.

Deals with the manner of conducting the worship of Mahālakṣmī.

**Beginning :**

या देवी मधुकैटभप्रमथनी या चण्डमुण्डार्दिनी
या देवी महिषासुरक्षयकरी या रक्तबिन्दुस्रवा ।
या सा शुम्भनिशुम्भदैत्यमथनी या धूम्रनिर्मूलनी
सा देवी मम रक्ष दक्षिणभुजे चण्डी जये नित्यशः ॥

* * * *

ध्यात्वैवं हृदये देवीं दुर्गामावाहयेत्सुधीः ।
सर्वदेवमये दुर्गे दुरितावनिकृन्तने ॥ ध्यानम् ।

**End :**

मन्त्रहीनं क्रियाहीनं भक्तिहीनं महेश्वरि ।
यन्मया रचिता पूजा परिपूर्णा तदस्तु मे ॥ इति क्षमापणम् ॥

**Colophon :**

महालक्ष्मीपूजाविधिस्समाप्तः ॥

---

## No. 8675. महेशमानसमहोत्सवः. MAHEŚAMĀNASAMAHŌTSAVAḤ.

Pages, 180. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 8616.

A work treating of the mode of worship in Śiva temples by Koṇḍayya of Indrakaṇṭhi family. The author is the son of Nārāyana and Añcamā and the grandson of Liṅgabhaṭṭa who lived in the Triliṅga country. He belonged to Kāśyapagōtra and was a follower of Bahvṛca Śākhā. This MS. is said to have been copied by Liṅgambhaṭṭa, the son of the author of the work.

Pūjākhaṇḍa and Stōtrakhaṇḍa are complete.

Contains the following subjects :—

*Pūjākhaṇḍa*

१. ईश्वरार्चापद्धतिः.
२. प्रासादपद्धतिः.
३. मध्याह्नपूजापद्धतिः.
४. रथस्वरूपवर्णनापद्धतिः.

५. श्रोत्रामृतस्तोत्रपद्धतिः.
६. सङ्गीतपद्धतिः.
७. परिवारदेवतापद्धतिः.
८. वारवधूपरिवारपद्धतिः.
९. सेनापद्धतिः.
१०. वृषवाहनस्तोत्रपद्धतिः.
११. सन्ध्यानर्दीपादिपद्धतिः
१२. शिवसंवादपद्धतिः.
१३. रात्रिपूजागीतधूपावसरपद्धतिः.
१४. रात्रिपूजोपहारानन्तरनाट्यवर्णनपद्धतिः.
१५. निद्राप्रबोधपद्धतिः.
१६. प्रातःकालपूजापद्धतिः.

*Stōtrakhaṇḍa.*

१. अर्धनारित्ववर्णनपद्धतिः.
२. कण्ठोपरिवर्णनापद्धतिः.
३. कण्ठाधःप्रदेशवर्णनापद्धतिः.
४. सर्वावयववर्णनापद्धतिः.
५. हरिहरवर्णनापद्धतिः.
६. विचित्रपद्धतिः.
७. बाह्यपूजानिषेधतदभ्यनुज्ञाद्वयपद्धतिः.
८. पत्रपुष्पविशेषपूजोपपत्तिपद्धतिः.
९. हरिहरब्रह्माभेदस्थापनपद्धतिः.
१०. नाममन्त्रप्रशंसापद्धतिः.
११. महादेवसेव्योपास्यत्वपद्धतिः.
१२. सदाशिवप्रसादसेव्यत्ववर्णनापद्धतिः.
१३. विभूतिरुद्राक्षधारणाप्रशंसापद्धतिः.
१४. दुष्टनिग्रहपद्धतिः.
१५. विश्वविष्टपसृष्टिसंहारसामर्थ्यसमर्थनपद्धतिः.
१६. क्षुद्रोपद्रवविद्रावणपद्धतिः

**Beginning:**

कल्याणानि क्रियात्तः कलितशशिकलामौलिराकेशकान्तिः
कान्ताकान्तार्धकायः कटिघटितकरव्यार्द्रकृत्तिः . . . ।

* * * *

ताम्बूलादिस्तवान्तानित उपरि तवाकल्प्य सर्वोपचारान्
पश्चाच्छीघ्रं समाप्य द्रुहिणमुखपरीवारदेवार्चनञ्च ।
तत्तन्नाम्नाथ वा श्रुत्यभिहितमनुभिः षड्भिरेवोपचारैः
हे कण्ठेकाल कालान्तक विविधमथ त्वामुपश्लोकयिष्ये ॥

इति प्रातःकालपूजापद्धतिः षोडशी ॥

पूर्वं पूजाप्रशंसा षडधिकदशभिः स्रग्धरावृत्तवृत्तैः
पद्यैर्माध्याह्निकी सा दशकृतशिखया त्रिंशता त्र्यम्बकस्य ।
सायाह्ने द्वाशतेन त्वथ रथविहतिर्नैशिकी चार्चनैक-
त्रिंशत्सङ्ख्यैः प्रगेऽर्चा व्यरचि च सचतुर्विंशतित्वैः क्रमेण ॥
लिङ्गाभट्टाख्यलिङ्गाभिधजनपदभागिन्द्रकण्ठ्याख्यवंश-
क्षीराम्भोधिद्विजेन्द्रोऽजनयदिह बुधं बह्वृचः काश्यपीयः ।
तस्मान्नारायणाख्यादुदयमुपगतः कोण्डयो योऽभमायां
जीयात्तत्सङ्गृहीता स्वहृदयनिहिता शम्भुपूजा जगत्याम् ॥

**Colophon:**

इति माहेशमानसमहोत्सवे पूजाखण्डं परिपूर्णम् ॥

**End:**

तत्त्वैर्नैकत्वतुल्ये नरदनुजसुराः . . . पाः
स्वामिन् तस्यावतारा विधिहरिगिरिजास्त्वासते पारमात्म्ये ।
एवं सत्यप्यमीषु त्रिषु यदधिकतैवोत्तर . . . स्य
ज्ञेयात्तद्ब्रह्मविष्ण्वोर्न हि शिवसमतान्य . . . हत्वात् ॥

**Colophon:**

इति क्षुद्रोपद्रवविद्रावणपद्धतिरियं षोडशी ॥
माहेशमानसमहोत्सवनामकोऽयं
ग्रन्थो न्यबन्धि विबुधेश्वरसेवकेन ।
नारायणाख्यतनयेन मयेन्द्रकण्ठी-
कोण्डाभिधेन विबुधश्रुतिकुण्डलेन ॥

लिङ्गाभट्टस्त्रिलिङ्गाभिधजनपदभागीन्द्रकण्ठाख्यवंश-
क्षीराम्भोधिद्विजेन्द्रोऽजनयदिह बुधं बह्वृचः काश्यपीयः ।
तस्मान्नारायणाख्यादुदयमुपगतः कौण्डयो योऽश्वमायां
जीयात्तत्सङ्गृहीता स्वहृदयविहिता शम्भुपूजा जगत्याम् ॥
तत्पुत्रेणैव लिखिता लिङ्गंभट्टेन सूरिणा ।
तादृशेन महेशस्य पूजा मानसिकी शुभा ॥

---

## No. 8676. मार्कण्डेयादिपूजा.
## MĀRKAṆḌEYĀDIPŪJĀ

Pages, 5. Lines, 14 on a page.

Begins on fol. 200*b* of the MS. described under No. 1197. Complete.

Deals with the worship of Mārkaṇḍēya and other Ṛṣis as a subsidiary ritual to Vṛṣōtsarjana.

**Beginning :**

आयुः प्रवर्धयेत्पश्चादाचार्येण प्रकल्पयेत् ।
आचार्यस्तु ततो मन्त्री आग्नेयादिषु तण्डुले ॥
मार्कण्डेयमुखानादौ पूजयेत्तु विशेषतः ।
आयुः प्रवर्धयेत्पश्चात्सम्यक् [पूजाः] पर्यन्तदेवताः ।

अथ मार्कण्डेयध्यानम्—

आयुःप्रद महाभाग सोमवंशप्रवर्धन ।
तपोधन मुनिश्रेष्ठ सर्वारोग्यप्रदो भव ॥
आयुर्देहि श्रियं देहि यशो देहि द्विषो जहि ।
पुत्रपौत्रांश्च मे देहि मार्कण्डेय नमाम्यहम् ॥

**End :**

अथादित्यस्याष्टपुरुषस्यानुवाकम्, आरोगस्यानुवाकम्, अथ वायोरेकादशपुरुषस्य, अथाग्नेरष्टपुरुषस्य जपित्वा वृषभं विसृजेदित्याह भगवान् बोधायनः ॥

No. 8677. राजश्यामलारहस्यपूजाविधिः.

RĀJAŚYĀMALĀRAHASYAPŪJĀVIDHIḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 80*b* of the MS. described under No. 537 and 7247.

Complete.

Deals with the manner of conducting the worship of Rājaśyāmalā, as mentioned in Saubhāgyamahālakṣmītantra.

**Beginning:**

पौर्वाह्णिकीं क्रियां कृत्वा न्यासानां न्यसनं ततः ।
सायङ्काले तु सम्प्राप्ते पुष्पवृक्षैरलङ्कृतम् ॥
कृत्रिमं वनमासाद्य भार्यया सहितो द्विजः ।
नानाविधानि पुष्पाणि सङ्गृह्या(त्)सर्वमङ्गले ॥

* * * *

जगन्मोहनचक्रे तां श्यामलां सर्वमङ्गलाम् ।
मल्लिकाकुट्मलैर्देवीं सम्पूज्य द(प)रया मुदा ॥

* * * *

**Colophon:**

इति श्रीसौभाग्यमहालक्ष्मीमन्त्रे लक्ष्मीनारायणसंवादे श्रीराजश्यामलारहस्यभृगुवारार्चनविधानं नाम द्वादशः कल्पः ।

**End:**

क्लीं कन्दर्पकामिनीकामगृहार्चनप्रीतायै नमः, द्रिं अनन्तकोटिब्रह्माण्डजनन्यै नमः, सौः सर्वालङ्कारसम्पूर्णायै नमः ।

एभिर्नानाविधैः पुष्पैर्जगन्मोहनसुन्दरीम् ।

---

No. 8678. रामपूजाविधानम्.

RĀMAPŪJĀVIDHĀNAM.

Pages, 18. Lines, 7 on a page.

Begins on fol. 16*a* of the MS. described under No. 6032.

Incomplete. From Agastyasaṁhitā.

Deals with the manner of conducting the worship of Rāma.

**Beginning:**

योगिनो यं समाराध्य वेदमन्त्रोक्तकर्मणा ।
उत्तरन्ति भवाम्भोधिं तं वन्दे रघुनायकम् ॥

प्रक्षालितपादपाणिराचम्य प्रणवद्वादशाभिमन्त्रितजलेन यागभूमिं संप्रोक्ष्य, तत्र प्राङ्मुख उदङ्मुखो वोपविश्य, गायत्र्या प्राणायामत्रयं कृत्वा, एवङ्गुणविशेषणविशिष्टायां शुभतिथौ सीतासहितश्रीरामचन्द्रमुद्दिश्य सीतासहितश्रीरामचन्द्रप्रीत्यर्थमावाहनादिषोडशोपचारान् पुरुषसूक्तेन मूलमन्त्रेण करिष्य इति सङ्कल्प्य ।

**End:**

गन्धपुष्पधूपदीपनैवेद्यानि तुलसीदलेन समर्प्य यथाशक्ति मूलमन्त्रं जप्त्वा प्रसन्नार्घ्यं दत्वा शङ्खं प्रक्षाल्याधारे स्थाप्य आपूर्याभ्यर्च्य पुष्पं शङ्खजलं च गृहीत्वा.

---

## No. 8679. रामपूजाविधानम्.
## RĀMAPŪJĀVIDHĀNAM.

Pages, 6. Lines, 10 on a page.

Begins on fol. 148*a* of the MS. described under No. 2061

Incomplete.

Same as the above.

---

## No. 8680. राममानसपूजाविधिः.
## RĀMAMĀNASAPŪJĀVIDHIḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 757.

Complete. From Agastyasaṁhitā.

Deals with the manner of conducting mentally the worship of Rāma.

**Beginning:**

सूत उवाच—

हृदये मानसी पूजा कीदृशी वा वद प्रभो ।
उपचारैः कतिविधैः पूज्यते रघुनन्दनः ॥

अगस्त्य उवाच—

रामं पद्मपलाशाक्षं कालाम्बुदसमप्रभम् ।
(योगासने) समासीनं चिन्तयेच्चिन्तितात्पये ॥

* * * *

पाद्यं गृहाण राजर्षे राम राजीवलोचन ।
ओं नमो भगवते वासुदेवाय तत्त्वज्ञानस्वरूपिणे श्रीती—पाद्यम् ।

**End:**

किं पुनस्सततं कुर्याद्ब्रह्मण्येव स्थितो हि सः ।
सर्वान् कामानवाप्नोति इह लोके परत्र च ॥

**Colophon:**

इत्यगस्त्यसंहितायां परमरहस्ये श्रीरामचन्द्रमानसपूजाविधानं सम्पूर्णम् ॥

---

## No. 8681. राममानसपूजाविधिः.
## RĀMAMĀNASAPŪJĀVIDHIḤ.

Pages, 6. Lines, 10 on a page.

Begins on fol. 145*a* of the MS. described under No. 2061.

Complete.

Same as the above.

**Colophon:**

इति श्रीमदगस्त्यसंहितायां परमरहस्ये पञ्चत्रिंशोऽध्यायः ॥

---

## No. 8682. राममानसपूजाविधिः.
## RĀMAMĀNASAPŪJĀVIDHIḤ.

Substance, palm-leaf. Size, 6¼ × 1 inches. Pages, 16. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Begins on fol. 44*a*. The other works herein are Gāyatrīsahasranāmastōtra 1*a*, Lakṣmyaṣṭōttaraśatanāmastōtra 32*a*, Tripurasundarīstōtra 39*a*.

This is the 35th Adhyāya of Agastyasamhitā in the Brahmāṇḍapurāṇa.

Complete.
Same as the above.

**Colophon:**

इति श्रीब्रह्माण्डपुराणे अगस्त्यसंहितायां सुतीक्ष्णागस्त्यसंवादे राममानसिकपूजाविधानं नाम पञ्चत्रिंशोऽध्यायः ॥

---

No. 8683. रामार्चनचन्द्रिका.
RĀMĀRCANACANDRIKĀ.

Pages, 232. Lines, 20 on a page.

Begins on fol. 1a of the MS. described under No. 8056.

A work in five Paṭalas about the worship of Rāma by Ānandavana, disciple of Mukundavana.

**Beginning:**

तर्तुं संसृतिसागरं त्रिजगतां नौर्नाम यस्य प्रभोः
येनेदं सकलं विभाति सततं जातं स्थितं संहृतम् ।
यश्चैतन्यघनप्रमाणविधिवेदान्तेन वेद्यो विभुः
तं वन्दे सहजप्रकाशममलं श्रीरामचन्द्रं परम् ॥

* * * *

पूर्वं चोत्तरतापनीयमखिलं कल्पं परं मारुतेः
ब्रह्मागस्त्यवसिष्ठवामसहितं कल्पं तथा संहिताः ।
तन्त्रं गाधिजजादिकं कुवलयं चालोक्य सीतादिकं
श्रीरामार्चनचन्द्रिका कविमलप्रध्वंसिका प्रोच्यते ॥
तत्तद्ग्रन्थगतैर्नानावाक्यैरेव न कल्पितैः ।
सौकर्यार्थं क्रमं सम्यक् सङ्क्षेपेण प्रदर्श्यते ॥
उच्यते प्रथमं तत्र लक्षणं गुरुशिष्ययोः ।
शान्तो दान्तः कुलीनश्च विनीतश्शुद्धवाक्छुचिः ॥
शुद्धाचारस्सुप्रसिद्धश्शुचिर्दक्षस्सुबुद्धिमान् ।
आश्रमी ध्याननिष्ठश्च मन्त्रतन्त्रविचक्षणः ॥

निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते ।
इति गुरुलक्षणम् ।

* * * *

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्मुकुन्दवनश्रीचरणशिष्यानन्दवनविरचितायां श्रीरामार्चनचन्द्रिकायां प्रथमपटलः ॥

**End:**

पटलैः पञ्चभिः प्रोक्ता श्रीरामार्चनचन्द्रिका ।
आनन्दवननाम्ना हि यतिना हरितुष्टये ॥
भागीरथ्यमृतप्रपातिशमनी दिव्यान्नसत्रप्रदा
यस्मिन् श्रीमणिकर्णिका च सुलभा यस्मिन् पुरारेः पुनः ।
काले संज्ञिकवारिधि . . . . . . मत्स्य रामाज्ञया-
स्त्वानन्दाब्धिमहोदयस्समुदिता रामार्चने चन्द्रिका ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकार्यश्रीमन्मुकुन्दवनशिष्यानन्दवनविरचितायां श्रीरामार्चनचन्द्रिकायां पञ्चमः पटलः ॥

Subjoined is a list of the subjects herein dealt with :—

प्रथमपटलस्था विषयाः—

| | |
|---|---|
| १. गुरुलक्षणम्. | ९. राशिशुद्धिः. |
| २. शिष्यलक्षणम्. | १०. मन्त्रसंस्कारः. |
| ३. स्वकुलान्यकुलभेदः. | ११. राममन्त्रोद्धारः. |
| ४. मावादिभेदः. | १२. अङ्गदेवतामन्त्रोद्धारः. |
| ५. राशिमेळनम्. | १३. राममन्त्रमाहात्म्यम्. |
| ६. नक्षत्रशुद्धिः. | १४. राममन्त्रराजार्थः. |
| ७. सुप्रबोधकालः. | १५. अधिकारनिर्णयः. |
| ८. ऋणधनशोधनम्. | १६. मासवारतिथिशुद्धिः. |

१७. कालशुद्धिः.
१८. अपवादकालः.
१९. कुण्डलक्षणम्.
२०. वेदिकालक्षणम्.
२१. स्रुक्स्रुवलक्षणम्.
२२. अग्निमुखम्.
२३. होमविधिः.
२४. दीक्षाप्रकारः.
२५. सङ्क्षेपदीक्षा.
२६. उपदेशः.
२७. उपासनचिन्ता.

द्वितीयपटलस्था विषयाः—

१. भक्तिदार्ढ्यम्.
२. धर्मनिष्ठा.
३. स्मरणम्.
४. मूत्रोत्सर्जनशौचविधिः.
५. आचमनविधिः.
६. दन्तधावनमन्त्रः.
७. भावना.
८. प्रार्थनाविधिः.
९. मन्त्रस्नानम्
१०. आसनविधिः.
११. वैष्णवाचमनम्.
१२. तिलकधारणम्.
१३. रामसन्ध्या.
१४. गुरुनतिः.
१५. दिनाद्यभागकृत्यविधिः.
१६. द्वितीयदिनभागकृत्यविधिः.
१७. तृतीयदिनभागकृत्यविधिः.
१८. चतुर्थदिनभागकृत्यविधिः.
१९. द्वारपूजा.
२०. आसादनम्
२१. मालाधारणम्.
२२. शुद्धिचतुष्टयम्.
२३. मातृकासंहाराः.
२४. जीवस्थापनम्.
२५. भूतसंहाराः.
२६. आह्लावनम्.
२७. हृदयादिन्यासः.
२८. ध्यानमन्त्रौ.
२९. पुनर्देहोत्पादनम्.
३०. भूतशुद्धिः.
३१. न्यासनिर्णयः.
३२. मातृकाऋष्यादिन्यासः.
३३. केवलमातृकाध्यानम्.
३४. अन्तर्मातृकान्यासः.
३५. केवलमातृकाध्यानम्.
३६. बिन्दुमातृकाध्याननन्यासौ.

३७. कलाषडङ्गः.
३८. कलादेव्याध्यानम्.
३९. पञ्चाशत्कलान्यासः.
४०. अष्टत्रिंशत्कलान्यासः.
४१. केशवादिमातृकाषडङ्गः.
४२. केशवादिमातृकाध्यानम्.
४३. सर्वत्रसम्पुटः.
४४. केशवादिमातृकान्यासः.
४५. श्रीकण्ठादिन्यासः.
४६. तत्त्वन्यासः.
४७. मूर्तिपञ्जरन्यासः.
४८. किरीटन्यासः.
४९. इन्द्रियन्यासः.
५०. अङ्गुलिन्यासः.
५१. हृदयादिन्यासः
५२. अक्षरन्यासः.
५३. पदन्यासः.
५४. व्यापकन्यासः.

तृतीयपटलस्था विषयाः—

१. ध्यानविधिः.
२. कलासङ्ग्रहः.
३. शङ्खप्रतिष्ठा.
४. पात्रसादनम्.
५. अन्तर्यागः.
६. पीठपूजा.
७. सप्तदशमुद्राः.
८. प्रधानपूजा.
९. दशावरणपूजा.
१०. धूपादिनैवेद्यान्तोपचाराः.
११. अग्निमुखम्.
१२. नित्यहोमः.
१३. तर्पणाभिषेकः.
१४. बलिदानम्.
१५. प्रसादस्वीकारः.
१६. दण्डप्रणामः.
१७. प्रदक्षिणम्.
१८. रामवल्लभास्तोत्रम्.
१९. गीतनृत्यम्.
२०. प्रार्थना.
२१. तीर्थधारणम्.
२२. तुळस्यर्चा.
२३. अपराधक्षमापणम्.
२४. कर्मार्पणम्.
२५. आत्मार्पणम्.
२६. प्रसादग्रहणम्.
२७. विसर्जनम्.

चतुर्थपटलस्था विषयाः—

१. सप्तमभागकृत्यविधिः.
२. अष्टमभागकृत्यविधिः.
३. शयनोपासनम्.
४. प्राणाग्निहोत्रम्.
५. शयनविधिः.
६. जपस्थानानि.
७. वर्ज्यानि.
८. स्नाननियमः.
९. कूर्मचक्रम्.
१०. आसनम्.
११. जपमालालक्षणम्.
१२. ऋतुसाधनम्.
१३. दिङ्निर्णयः.
१४. तिथिनिर्णयः.
१५. मन्त्रप्रयोगस्थानम्.
१६. द्वितीयमन्त्रः.
१७. वसिष्ठयन्त्रम्.
१८. सप्तमयन्त्रम्.
१९. सर्वयन्त्रसाधारणक्रमः.

पञ्चमपटलस्था विषयाः—

१. डोलोत्सवः.
२. वैष्णवलक्षणम्.
३. प्रतिनिधिः.
४. निवेदनमन्त्रः.
५. अष्टमीकृत्यम्.
६. उपासनाधिदेवनमन्त्रः.
७. मूर्तिलक्षणम्.
८. शङ्खप्रतिष्ठा
९. सर्वतोभद्रम्.
१०. पीठार्चनम्.
११. स्नानम्.
१२. कौसल्यार्चनम्.
१३. पितृपूजनम्.
१४. आवरणत्रयपूजा.
१५. प्रथमयामकृत्यम्.
१६. अर्घ्यमन्त्रः.
१७. दानमन्त्रः.
१८. पारणासङ्कल्पः.
१९. दशमीकृत्यम्.
२०. अकिंचनव्रतम्.
२१. अकिञ्चनव्रतोद्यापनम्.
२२. समर्थोद्यापननयः.
२३. स्वगृहनयनम्.
२४. आवाहनमन्त्रः.
२५. मदनाधिवासः.
२६. मदनारोपणम्.

२७. चैत्रकृत्यम्.
२८. चक्रादानम्.
२९. शङ्खादानम्.
३०. मुद्रादानम्.
३१. आषाढे शयनोत्सवः.
३२. पवित्रोत्पत्तिः.
३३. पवित्रलक्षणम्.
३४ पवित्राधिवासनम्.
३५. पवित्रारोपणम्.
३६. कटदानोत्सवः.
३७. आश्विनकृत्यम्.
३८. रथमहोत्सवः.
३९. त्रिपुरोत्सवः.
४०. फाल्गुनकृत्यम्.
४१. अधिमासकृत्यम्.
४२. दशमीसङ्कल्पः.
४३. एकादशीसङ्कल्पः
४४. द्वादशीसङ्कल्पः.

---

## No. 8684. रामार्चनचन्द्रिका.

## RĀMĀRCANACANDRIKĀ.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 24. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 61*a*. The other work herein is Campurāmāyaṇa 1*a*.

Up to Varaśuddhi in the first Paṭala.

Same as the above.

---

## No. 8685. रामार्चनचन्द्रिका.

## RĀMĀRCANACANDRIKĀ.

Pages, 124. Lines, 16 on a page.

Begins on fol. 1*a* of the MS. described under No. 5568.

Contains the first and second Paṭalas complete; third incomplete.

---

## No. 8686. रामार्चनचन्द्रिका.

## RĀMĀRCANACANDRIKĀ.

Substance, paper. Size, 7¾ × 6 inches. Pages, 334. Lines, 13 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains Paṭalas 1 to 5 complete.

Same as the above.

## No. 8687. रामार्चनचन्द्रिकासूचिका.

## RĀMĀRCANACANDRIKĀSŪCIKĀ

Pages, 6. Lines, 26 on a page.

Begins on fol. 137*a* of the MS. described under No. 2336.

Complete.

Gives the contents of Rāmārcanacandrikā

**Beginning:**

पटल: १

आदौ शिष्यलक्षणप्रवचनम्, ततो गुरुलक्षणकथनम्, मन्त्राणां मन्त्रिणामृणऋणिभावः, तत्र सिद्धारिकोष्ठलेखनक्रमकथनम्, तत्र कोष्ठसाधकनामाद्यन्ताक्षरस्य मन्त्राद्यन्ताक्षरयोरानुकूल्यप्रातिकूल्यपरीक्षाकथनम् ।

**End:**

चैत्रादिमासेषु रामस्य कर्तव्योत्सवकालनिर्णयः, तदुत्सवानां विधिप्रकारस्य सविस्तरकथनं च, संवत्सरोत्सवपर्यन्तसर्वोत्सवान विध्युक्तप्रकारमन्त्रतन्त्रकथनादिविशेषविधिप्रशंसाकथनम्, एतावत्पर्यन्ते प्रथमः पटल: ॥

**Colophon:**

रामार्चनचन्द्रिका सम्पूर्णा स्यात् ॥

---

## No. 8688. रामार्चनचन्द्रिकासूचिका.

## RĀMĀRCANACANDRIKĀSŪCIKĀ.

Pages, 6. Lines, 24 on a page.

Begins on fol. 105*b* of the MS. described under No. 2335.

Complete.

Same as the above.

---

## No. 8689. रामावरणपूजा.

## RĀMĀVARAṆAPŪJĀ.

Pages, 13. Lines, 9 on a page.

Begins on fol. 249*b* of the MS. described under No. 8056.

Complete.

Deals with the manner of conducting the worship of the subsidiary deities of Rāma.

**Beginning :**

अथावरणपूजा—

पूजानुज्ञां ततो लब्ध्वा तस्मिन्नङ्गान्यथायजेत् ।

ततः षट्कोणे ओं रां हृदयाय नमः हरिद्वर्णायै वरदाभयधारिण्यै नमः इत्याग्नेयकोणे, ओं लीं शिरसे स्वाहा इन्दुवर्णायै वरदाभयधारिण्यै नमः इतीशानकोणे ।

**End :**

लवङ्गजाजितकोलचूर्णकमुकखादिरम् ।
कर्पूरतुलसीपत्रं ताम्बूलं चार्पयाम्यहम् ॥

ताम्बूलनीराजनमन्त्रपुष्पम् ॥

---

No. **8690.** लक्ष्मीनृसिंहपूजाविधानम्.

LAKṢMĪNṚSIṂHAPŪJĀVIDHĀNAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 195*a* of the MS. described under No. 5661.

Complete.

Deals with the worship of Narasiṁha as associated with Lakṣmī.

**Beginning :**

एवङ्गुणविशेषणविशिष्टायां पुण्यतिथौ श्रीलक्ष्मीनृसिंहमुद्दिश्य श्रीलक्ष्मीनृसिंहप्रीत्यर्थं लक्ष्मीनृसिंहपूजां करिष्ये—

• • • •

कलशार्चनम्—

कलशस्य मुखे विष्णुः कण्ठे रुद्रस्समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणास्स्मृताः ॥
कुक्षौ तु सागरास्सर्वे सप्तद्वीपा वसुन्धरा ।

**End:**

अन्नं चतुर्विधं ज्ञेयं रसैष्षड्भिस्समन्वितम् ।
मया निवेदितं तुभ्यं गृहाण पुरुषोत्तम ॥

समस्तसम्पत्समवाप्तिहेतवः . . पुनन्तु मां ब्राह्मणपादपांसवः ॥
आपद्घनध्वान्तसहस्रभानवो . . रक्षन्तु मां ब्राह्मणपादपांसवः ॥
विप्रौघदर्शनात्सद्यः . . विप्रश्रीपादपङ्कजम् ॥

---

No. 8691. विघ्नेश्वरपूजाविधानम्.

VIGHNĒŚVARAPŪJĀVIDHĀNAM.

Pages, 72. Lines, 17 on a page.

Begins on fol. 179a of the MS. described under No. 5568

Complete.

Deals with the mode of worship of Vighnēśvara. Contains Vighnēśvarasahasranāmāvali also.

**Beginning:**

ध्यायेद्गजाननं देवं तप्तकाञ्चनसन्निभम् ।
चतुर्भुजं महाकायं सर्वाभरणभूषितम् ॥
दन्ताक्षमालापरशुं पूर्णमोदकधारिणम् ।
एकदन्तं शूर्पकर्णं त्रिणेत्रं च जटाधरम् ॥
पाशाङ्कुशधरं देवं ध्यायेत्सिद्धिविनायकम् ॥ सिद्धिविनायकाय नमः—ध्यानम् ।

**End:**

नमस्कारः—

गणाधिप नमस्तुभ्यं सततं मोदकप्रिय ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

वायनदानम्—

गणेशः प्रतिगृह्णातु गणेशो वै ददाति च ।
गणेशस्तारको भा(द्वा)भ्यां गणेशाय नमो नमः ॥

इति प्रतिग्रहणम् ॥

**Colophon:**

विघ्नेश्वरपूजाविधानं सम्पूर्णम् ॥

---

## No. 8692. विघ्नेश्वरपूजाविधिः.
## VIGHNĒŚVARAPŪJĀVIDHIḤ

Pages, 55. Lines, 22 on a page.

Begins on fol. 222*a* of the MS. described under No. 3027.
Complete.
Deals with the mode of worship of the image of Vighnēśvara.

**Beginning:**

अथ देशिकः स्नानादि कृत्वा पादौ प्रक्षाल्याचम्य मण्टपं प्रविश्य मण्टपयज[मा]नार्थं सङ्कल्प्य विघ्नेश्वरपूजापुरस्सरं पुण्याहं वाचयित्वा इन्द्रपावकयोर्मध्ये नित्यवत् शिवसूर्यं सम्पूज्य ओं हः अस्त्राय फट् इति हस्ततलपृष्ठे संशोध्य ।

**End:**

अर्चयेद्गन्धपुष्पाद्यैराराध्यं नालिकेरकम् ॥
कर्मस्वेषु गणाधीशं पूजयेद् देशिकोत्तमः ॥

आवाहोद्वासनं नास्ति व्यापकस्य शिवस्य च ।
स्मरन्ति देवमावाह्य विस्मरन्ति विसर्जनम् ॥

**Colophon:**

विघ्नेश्वरमण्टपपूजाविधिस्समाप्ता(प्तः) ॥

## No. 8693. विनायकपूजा.

## VINĀYAKAPŪJĀ.

Substance, palm-leaf. Size, 5⅜ × 1 inches. Pages, 12. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 13*a*. The other works herein are Vighnēśvaraprārthanāpadyamu 1*a*, Vighnēśvaradaṇḍakamu 2*a*, Gaṇapatyaṣṭōttaraśatanāmastōtra 9*a*.

Complete. Similar to the work described under No. 8691.

**Beginning:**

यं ब्रह्म वेदान्तविदो वदन्ति.

* * * *

तस्मै नमो विघ्नविनायकाय—

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥

* * * *

गणाधिपतिपूजाञ्च करिष्ये—

ओं गणानां त्वा गणपतिं हवामहे कविम् ।

**End:**

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
सङ्ग्रामे सर्वकार्येषु विघ्नस्तस्य न जायते ॥

---

## No. 8694. विष्णुपूजा.

## VIṢṆUPŪJĀ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 8666.

Incomplete.

Deals with the manner of conducting the worship of Viṣṇu.

**Beginning:**

यं द्रां नमः, ओं ओं नमः, ओं यं ओं नमः, ओं हृदयाय, नं शिरसे, व्यों शिखायै, नां कवचाय, रां अस्त्राय, . . . .

ओं नमो विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्म . . .
पीठात्मने नमः । ओं ओं

जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
सुब्रह्मण्य नमस्तेऽस्तु नमः पुरुषपूर्वज ॥

गायत्रीमूलमन्त्रध्यानपूर्वकं श्रीमहाविष्णुं हृदयकमलमध्ये आवाहयामि । आवाहितो भव स्थापितो भव सन्निहितो भव ॥

**End:**

नाभिदक्षिणकटिवामकटिदक्षिणजानुवामजानुदक्षिणपादवामपाददक्षिणकरवामकरमूर्धभ्रूमध्यवदनकण्ठकर्णभुजमूलहृदयकमलेषु स्थितिः ॥ मूलेन वा जपः कार्यः ॥

---

No. 8695. विष्णुपूजाक्रमः.

VIṢṆUPŪJĀKRAMAH.

Pages, 6. Lines, 6 on a page.

Begins on fol. 13*a* of the MS. described under No. 3556.
Complete.
Similar to the above.

**Beginning:**

आराधनकाले ध्यानश्लोकः—

स्वस्थितं पुण्डरीकाक्षं मन्त्रशक्तिं प्रभुं स्मरेत् ।
तत्पदाङ्गुष्ठजां गङ्गां निपतन्तीं स्वमूर्धनि ॥
तया संक्षालयेद्देहं स बाह्याभ्यन्तरं मलम् ।
तत्क्षणाद्विरजो भूत्वा जायते स्फटिकोपमः ॥

स्वामिन्! यावदाराधनपरिसमाप्ति सान्निध्यं भजस्वेति प्रार्थ्य ।

**End:**

आह्वानं चासनार्घ्यं पदसलिलमथाचामपुंसूक्तयुक्त-
स्नानं वस्त्रोपवीते मलयजकुसुमे धूपदीपौ क्रमेण ।

मध्वादिः पर्के आदावुपरि च सलिलं पायसाद्यन्नजातं
पानीयाचामपूगं परिगतिनमनोद्वासनं विष्णुपूजा ॥

---

No. 8696. विष्णुपूजाविधानम्.
VIṢṆUPŪJĀVIDHĀNAM.

Pages, 2. Lines, 14 on a page.

Begins on fol. 115*a* of the MS. described under No. 5673.

Complete.

Similar to the above.

This is a portion of Atharvaṇarahasyam.

**Beginning:**

ज्योतिश्शान्तं सर्वलोकान्तरस्थमोङ्काराख्यं योगिहृद्ध्यानगम्यम् ।
साङ्गं शक्त्यं(क्त्या)सायुधं भक्तिसेव्यं सर्वाकारं विष्णुमावाहयामि ॥
कल्पद्रुमूले मणिवेदिमध्ये सिंहासनं स्वर्णमयं सुरत्नम् ।
विचित्रवस्त्रावृतमच्युत प्रभो गृहाण लक्ष्मीधरणीसमन्वितम् ॥
गङ्गाजलसमानीतं सुगन्धं पुष्पसंयुतम् ।
पाद्यं मे प्रतिगृह्णातु वासुदेव नमोऽस्तु ते ॥

**End:**

कर्पूरवर्तिसंयुक्तं दीपमालार(म)नोरु(र)मम् ।
नीराजनं गृहाणेदं तव प्रीतिकरं शुभम् ॥ नीराजनं समर्पयामि ।

---

No. 8697. विष्णुपूजाविधिः.
VIṢṆUPŪJĀVIDHIḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 6460.

Complete.

Similar to the above.

**Beginning:**

नमः कृत्वा महाविष्णुं हरिपूजाविधानकम् ।
वक्ष्यामि विस्तरेणाद्य आयुरारोग्यमन्त्रदम् ॥

स्नात्वा नद्यां शुचिर्भूत्वा शुद्धवस्त्राणि धारयेत् ।
हरेस्समीपं गत्वाथ सङ्कल्पं सम्यगाचरेत् ॥
त्रिलोकनाथ सर्वेश ब्रह्मादिस्तुतसद्गुण ।
सौवर्णं पादुकं चेदं स्वीकुरुष्व मम प्रभो ॥ पादुकारोपणम् ।

**End:**

कोटिसूर्यप्रतीकाश कोटिकन्दर्परूपधृत् ।
प्रदक्षिणं करोम्यद्य मत्पापं हर माधव ॥ प्रदक्षिणम् ।

**Colophon:**

भगवत्पूजाविधानं प्रदक्षिणनमस्कारपर्यन्तविधिः ॥

---

No. 8698. विष्ण्वाराधनक्रमः.

VIṢṆVĀRĀDHANAKRAMAḤ.

Substance, palm-leaf. Size, 14 × 1¾ inches. Pages, 4. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 32a. The other works herein are Drāviḍaprabandha (Tamil) 1a, Ālavandārstōtra 20a, Yatirājaviṁśati 26a, Kṣamāṣōḍaśi 29a.

Incomplete.

Similar to the above.

**Beginning:**

श्रीपराशर उवाच—

विस्तरेण प्रवम्य(च्म्य)द्य विष्णोराराधनाक्रियाम् ।
उत्थाय पश्चिमे यामे आचम्य प्रयतात्मवान् ॥
उपविश्य शुचौ देशे समासीनस्सुखासने ।
आत्मानं स्वशरीरं च परेशमनुचिन्तयेत् ॥

**End:**

चतुर्भुजमुदाराङ्गमिन्दीवरदलप्रभम् ।
श्रीभूमिनीलासहितं चिन्तयेच्च सदा हृदि ॥

नृसिंहरामकृष्णेषु षाड्गुण्यपरिपूर्णितम् ।
परावस्थासु देवस्य दीपादुत्पन्नदीपवत् ॥

---

No. 8699. विष्ण्वाराधनक्रमः.

VIṢṆVĀRĀDHANAKRAMAḤ.

Pages, 22. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 7096.

Complete.

Similar to the above.

**Beginning:**

प्रातस्स्नात्वा नित्यकर्म कृत्वा पादद्वयं करौ ।
प्रक्षाल्याचम्य पुरतो विष्णोर्गुरुपरम्पराम् ॥
ध्यात्वानुसन्धान(य)मूलमन्त्रं च शरणागतिम् ।
देवस्य दक्षिणे पार्श्वे स्थितस्स्वाचार्यचोदितः ॥

**End:**

आचार्यं पुरतः कृत्वा हरेः पादौ प्रणम्य च ।
मङ्गलाशंसनादीनि पठित्वा सुखमास्यताम् ॥

---

No. 8700. वीरशैवपूजासङ्कल्पः.

VĪRAŚAIVAPŪJĀSAṄKALPAḤ.

Pages, 3. Lines, 4 on a page.

Begins on fol. 38*a* of the MS. described under No. 6600.

Incomplete.

Contains the preliminary formal utterance of place, date and purpose of the worship of Śiva to be conducted according to the rites of Vīraśaivas.

**Beginning:**

एवङ्गुणविशेषणविशिष्टायां शिवतिथौ मम धर्मार्थकाममोक्षचतुर्विधार्थ-प्रील्य(प्राप्त्य)र्थमस्मिन् ग्रामे कृतवसतिमहेश्वरशिवजङ्गमानां वेदवेदाङ्ग-पुराणसङ्गीतसाहित्यविद्यासम्पूर्तौ ।

**End :**

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव उमापते तेऽङ्घ्रियुगं स्मरामि ॥

---

No. 8701. वीरशैवलिङ्गार्चनक्रमः.
VĪRAŚAIVALIṄGĀRCANAKRAMAḤ.

Substance, palm-leaf. Size, 15 × 1½ inches. Pages, 9. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol 4*a*. The other works herein are Gurustōtra 1*a*, Trimūrtijātinirṇaya 8*b*, Śivakavaca 9*a*.

Complete.

Describes the manner of conducting the worship of Śivaliṅga as given in the Vīrāgama.

**Beginning :**

अथातस्सम्प्रवक्ष्यामि शृणुध्वं श्रद्(द्ध)या सह ।
शिवलिङ्गार्चनं वीरशैवोदितविधिक्रमम् ॥
वीरागमादितन्त्रेषु प्रोक्तं श्रीशम्भुना पुरा ।
कुमारस्योपदेशार्थं स एवात्रोच(च्य)ते मया ॥
जलस्नानाद्विशेषेण भस्मस्नानमनुत्तमम् ।
भक्तस्थले सदाचारः नियमस्थो जितेन्द्रियः ॥

**End :**

पुष्पाञ्जलिं गृहीत्वा तु मूलमन्त्रेण निक्षिपेत् ।
वीराजनमसंख्यातं सन्दध्यादिष्टमन्ततः ॥

**Colophon :**

इति श्रीवीरागमे क्रियापादे शिवपूजाविधानो नाम पञ्चविंश[ति] षट्-स्थलः ॥

क्षेत्रे सप्तपदे कृते नवपदे मध्ये लिखेत्कर्णिकां
किञ्जल्कान्वितषोडशारसहिते पद्मं तदभ्यन्तरके ।

वेदाशास्थितकोष्ठकानि मतिमान् सन्त्यज्य शिष्टेषु तत्
कोष्ठेष्वल्पसरोरुहाणि विलिखेत् स्याद्भद्र(कं)मण्डलम् ॥

---

## No. 8702. वीरशैवसम्प्रदायश्लोकाः.

## VĪRAŚAIVASAMPRADĀYAŚLŌKĀḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 1*b* of the MS. described under No. 217, wherein this has been omitted to be mentioned.

Incomplete.

Contains some stanzas dealing with the manner of conducting the worship of Śiva according to the Vīraśaiva tenets.

**Beginning :**

प्राणलिङ्गं परित्यज्य अन्यलिङ्गं विशेषतः ।
श्वानयोनिशतं गत्वा चण्डालगृहमाचरेत् ॥
मल[वि]मोचनन(क्र)त्त्वेतत् जलस्नानं षडानन ।
भस्मस्नानं तु संसारदुःखविध्वंसकारणम् ॥
हृत्पद्मं शित(व)धर्मकन्दसहितं सुज्ञाननाळं तथा
नित्यैश्वर्यदलाष्टकं शशिनिभं वैराग्यसत्कर्णिकम् ।
श्रीरुद्रेश्वरकेसरान्वितामिदं सञ्चिन्त्य तन्मध्यमे
सूर्येन्दूज्ज्वलवह्निमण्डलगतं ध्यायेचिरं चिन्मयम् ॥

**End :**

पार्थिवे च स्वयम्भूते स्फटिके रसनिर्मिते ॥
बाणलिङ्गे तथैवार्षे न चण्डोऽधिकृतो भवेत् ।
तत्र क्रतुशतं पुण्यं शम्भोर्नैवेद्यभक्षणात् ॥

---

## No. 8703. व्यासपूजाविधिः.

## VYĀSAPŪJĀVIDHIḤ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 143*a* of the MS. described under No. 2763.

Complete.

This gives the manner in which the ascetics of the Advaita school conduct the worship of Vyāsa on the full moon day of the Āṣāḍha month on which they resolve not to move about from their place of residence for four months with a view to avoid harm to insects which swarm the roads during the rainy season.

**Beginning:**

आषाढ्यां पौर्णमास्यां प्रातर्नित्यकृत्यं निर्वर्त्य क्षौरस्नानानन्तरं मठं प्रविश्य पादौ प्रक्षाल्याचम्य गन्धाक्षतादिपूजाङ्गं सन्निधाप्य . . . . . . ततः कलशाराधनं कुर्यात् । दशकलात्मने वह्निमण्डलाय नम इत्यादौ, द्वादशकलात्मने सूर्यमण्डलाय नम इति मुखं, षोडशकलात्मने चन्द्रमण्डलाय नम इति जले, आकाशादङ्कुशमुद्रया तीर्थान्याकृष्य ।

* * * *

ततो देवगणपत्योर्मध्ये श्रीशङ्कराचार्याणाम् ।

**End:**

प्रायेण प्रावृषि प्राणिसङ्कुलं वर्त्म दृश्यते ।
अतस्तेषामहिंसार्थं पक्षा वै श्रुतिचोदनात् ॥
स्थास्याम चतुरो मासान् तत्रैवासति बान्धवे ।
उक्तवन्तमिति ब्रूयुः पार्श्वस्थाश्च द्विजोत्तमाः ॥
निवसन्तु सुखेनात्र गमिष्यामः कृतार्थवान्(र्थिनः) ।
यथाशक्ति च शुश्रूषां करिष्यामो वयं मुदा ॥

अनन्तरं सहस्रं वा द्विशतं वा शतं वा ब्राह्मणान् भोजयेदित्याह भगवान् व्यासादयः ॥

**Colophon:**

व्यासपूजाविधिस्समाप्तः ॥

No. 8704. व्यासपूजाविधिः.

VYĀSAPŪJĀVIDHIḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 91*a* of the MS. described under No. 2902.

Incomplete.

Similar to the above.

**Beginning:**

आषाढ्यां पौर्णमास्यां क्षौरस्नानानन्तरं पादौ प्रक्षाल्याचम्य गुरोरनुज्ञां लब्ध्वा गन्धपुष्पादिधूपा(पूजा)ङ्गं संनिधाय प्राणायामत्रयं कृत्वा प्रणवषडङ्गन्यासपूर्वकं व्यासपूजां करिष्य इति संकल्प्य सलिलं स्पृशेत् ।

**End:**

अण्डजै रुधिरजै(श्चै)व प्राणिभिर्व्याप्यते मही ।
सूक्ष्मैः स्थूलैस्तथाव्यक्तैर्नानारूपैस्समन्ततः ॥
एतेषां रक्षणार्थाय आषाढादीन् . . . . ।

पादं निक्षिप्य दक्षिणद्वारां कृत्वा दक्षिणतो व्रजेत् । ततो जलाशयं गत्वा स्नानसन्ध्यावन्दनं कुर्यात् ॥

---

No. 8705. व्यासपूजाविधिः.

VYĀSAPŪJĀVIDHIḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 37*a* of the MS. described under No. 322.

Incomplete.

Similar to the above.

**Beginning:**

आषाढ्यां पौर्णमास्यां क्षौरस्नानानन्तरं पादौ प्रक्षाल्याचम्य गुरोरनुज्ञां लब्ध्वा गन्धाक्षतादिपूजाङ्गं निधाय प्राणायामं कृत्वा प्रणवषडङ्गन्यासपूर्वकं पूजां करिष्ये—इति सङ्कल्प्य सलिलं स्पृशेत् पीठपूजां कुर्यात् ।

* * * *

कृष्णस्य वामभागे आचार्यपञ्चकम् . . . . . . चार्याय नमः, तत्पुरस्तात्पद्मपादाचार्येभ्यो नमः ।

**End:**

धर्मसङ्करसङ्कीर्णग्रामे सोपप्लवे यतिः ।
मुहूर्तमपि नासीत यत्र धर्मपराङ्मुखाः ॥
त्रिकालमेककालं वा पूजयेत्पुरुषोत्तमम्
तेषु मासेषु केशादीन्.

---

No. 8706. व्यासपूजाविधानम्, प्रयोगसहितम्.

VYĀSAPŪJĀVIDHĀNAM WITH PRAYŌGA.

Pages, 4. Lines, 8 on a page.

Begins on fol. 162*a* of the MS. described under No. 7758.

Complete.

Similar to the above.

**Beginning:**

व्यासपूजां प्रवक्ष्यामि सम्यक् संवित्तिशुद्धये ।
कृत्वानुष्ठानमापाद्यां पूजाङ्गं संविधापयेत् ॥
प्राणायामत्रयं कृत्वा षडङ्गन्यासपूर्वकम् ।
व्यासपूजां करिष्येऽहमित्युक्त्वा सलिलं स्पृशेत् ॥

* * * *

सशिष्यं शङ्कराचार्यं वामभागे तु विन्यसेत् ॥
पद्मपादः सुरेशानः त्रोटकाचार्य एव च ।
हस्तामलकसंज्ञश्च शिष्या भाष्यकृतः स्मृताः ॥

**End:**

प्रणवानां सहस्रन्तु जपेच्छ्रवणतत्परः ।
योगाभ्यासी तथा सम्यक् समाधिस्थतंनहि ॥(?)

**Colophon:**

इति व्यासपूजाविधानं समाप्तम् ॥

व्यासपूजाप्रयोगः--

व्यासपू . . येत् ।

प्राणा . . शेत् ।

जालारभ्य . . पीठमर्चयेत् ।

* * * *

आधारशक्त्यै नमः, कूर्माय नमः . . . दुर्गायै क्षेत्रपालाय ॥

सर्वानेतान् समावाह्य तत्तन्नाम्नार्चयेत्क्रमात् ।
पश्चाद्दद्यां दन्तकाष्ठगोपीचन्दनधारकान् ॥

इति व्यासपूजाप्रयोगः ॥

---

No. 8707. शिवपूजाविधिः.
ŚIVAPŪJĀVIDHIḤ.

Pages, 14. Lines, 5 on a page.

Begins on fol. 77*a* of the MS. described under No. 5660.
Complete.
Gives the manner of conducting the worship of Śiva.

**Beginning:**

आगमार्थं तु देवानां गमनार्थं (च)राक्षसम्(रक्षसाम्) ।
कुरु घण्टारवं शान्तं देवताह्वानलाञ्छनम् ॥

* * * *

अरुणोदयतपनोदयप्रातर्मध्याह्नसायङ्कालार्धरात्रषट्कालशिवपूजया षोडशोपचारपूजां करिष्ये, तदङ्गकलशाराधनं करिष्ये—

कलशस्य मुखे रुद्रः कण्ठे विष्णुस्समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाश्श्रिताः ॥

**End:**

चैतन्यं शाश्वतं शान्तं व्योमातीतं निरञ्जनम् ।
. . . . तस्मै श्रीगुरवे नमः ॥

## No. 8708. शिवपूजाविधिः.

## ŚIVAPŪJĀVIDHIḤ.

Substance, palm-leaf. Size, 14½ × 1¼ inches. Pages, 27. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Begins on fol. 10a. The other works herein are Sūryāṣṭōttaraśatanāmāvali 1a, Bilhaṇastōtra 3a, Liṅgadhāraṇavidhi 24a, Pañcamukhastōtra 27a, Ūrdhvapuṇḍralakṣaṇa 28a, Śyāmaladaṇḍaka 31a.

Incomplete.

Similar to the above.

**Beginning:**

शिव शिव शम्भोराज्ञया प्रवर्तमानस्याद्यब्रह्मणः द्वितीयपरार्धे . . . . . . . . . . . . . . प्रातः कालादित्रिकाल-शिवपूजां करिष्ये ।

गङ्गे च यमुने कृष्णे गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

**End:**

परमात्मानं भावलिङ्गं तर्पयामि ।
ओङ्कारवदना देवि वकारायभुजद्वया ।
शिकारदेहमध्या च नमकारपदद्वया ॥
पञ्चाक्षरपरा विद्या सतारा लिङ्गरूपिणी ।

---

## No. 8709. शिवपूजाविधानम्.

## ŚIVAPŪJĀVIDHĀNAM.

Pages, 7. Lines, 6 on a page.

Begins on fol. 50a of the MS. described under No. 5987.

Complete.

Similar to the above.

**Beginning:**

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ पार्थिवेश्वरमुद्दिश्य पार्थिवेश्वर-प्रीत्यर्थं पार्थिवेश्वरपूजां करिष्ये—मम शिवपूजार्थं दुरितक्षयकारकाः। ओं नमो भगवते अशेषतीर्थालवाले शिवजटाजूटे गङ्गे गङ्गाम्बिके स्वाहा—ह्रीं शिवाय गौर्यै नमः मृदं हरामि।

**End:**

आवाहनं न जानामि न जानामि विसर्जनम्।
पूजाविधिं न जानामि क्षमस्व परमेश्वर॥
जलरूप जलवास . . . वासं कुरु नमोऽस्तु ते॥

**Colophon:**

इति शिवपूजाविधानं सम्पूर्णम्॥

---

## No. 8710. शिवपूजाविधानम्.
## ŚIVAPŪJĀVIDHĀNAM.

Pages, 12. Lines, 4 on a page.

Begins on fol. 21*a* of the MS. described under No. 6005.

Incomplete.

Similar to the above.

**Beginning:**

अपवित्रो(त्रः) पवित्रो वा सर्वावस्थां गतोऽपि वा।
यस्स्मरेद्गिरिजाधीशं स बाह्याभ्यन्तरशु(श्शु)चिः॥

आसनमन्त्रस्य पृथिव्यं(व्याः)मेरुपृष्ठ ऋषिः, जगती छन्दः, सुतल-कूर्मो देवता, मम अतलब्रह्मासने विनियोगः।

**End:**

सर्वे समुद्रसरितां तीर्थानि जलदा नदाः।
का(आ)यन्तु शिवपूजार्थं सान्निध्यं कुरुतानुगैः।
सर्वकामदुघे देवि सर्वतीर्थफलं लभेत्॥

## No. 8711 शिवपूजाविधिः.
## ŚIVAPŪJĀVIDHIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 31*a* of the MS. described under No. 6005.

Incomplete.

Same as the above.

---

## No. 8712 शिवपूजाविधानम्.
## ŚIVAPŪJĀVIDHĀNAM.

Substance, palm-leaf. Size, 7½ × 1¼ inches. Pages, 52. Lines, 5 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Complete. With Kanarese Tīka.

Similar to the above.

**Beginning:**

पापी कोपी परिभ्रष्टः नास्तिको वेदपाठकः ।
दुर्जनस्य(श्च)दुराचारी दुश्शीलश्चाप्यदीक्षितः ॥
प्रमादाद्दर्शनं कुर्यात् सा पूजा निष्फलं(ला)भवेत् ।
प्रमादादर्चनं काले अस्य(आसा)द्य बहुभिर्नरः ॥
श्रीमत्पञ्चाक्षरं मन्त्रं जपेत् ध्यात्वा शिवं नरः ।

**End:**

महत्वा लिङ्गरूपेण महत्ता जङ्गमेन च ।
द्विविधेन समुद्भूता प्रसादाय नमो नमः ॥

**Colophon:**

शिवपूजाविधानं समाप्तम् ॥

## No. 8713. शिवपूजाविधिः.

## ŚIVAPŪJĀVIDHIḤ.

Substance, palm-leaf. Size, 13¾ × 1½ inches. Pages, 3. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 4a. The other works herein are Śivāṣṭōttara-śatanāmāvali a, Āndhrapadyamulu 2b, Bhasmadhāraṇamahāmantra Mahārāṣṭragaṇitānupūrvi 8a.

Wants beginning.

Similar to the above.

**Beginning:**

त्रिपुरान्तकाय त्रिकालाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ।

सर्वमङ्गलमाङ्गल्यं सर्वपावनपावनम् ।
सर्वतीर्थफलं सद्यः शम्भोः पादाम्बुधारणात् ॥

**End:**

वन्दारुजनगेहमन्दार सच्चिदानन्दाकृता(ते) शतानन्दविनुत इन्दुधरमौले जनवृन्दहृदयाम्बुजमिलिन्दाय मद्भावलिङ्गाय ते ।

---

## No. 8714. शिवपूजाविधिः.

## ŚIVAPŪJĀVIDHIḤ.

Substance, palm-leaf. Size, 6 × 1½ inches. Pages, 5. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

This mode of worshipping god Śiva is of Purāṇic origin and hence may be adopted by other than the twice born.

**Beginning:**

देवदेवेश देवेश त्रिणेत्रं चन्द्रशेखरम् ।
व्याघ्रचर्मधरं देवमष्टमूर्तिधरं शुभम् ॥
मृगटङ्कधरं शम्भुं वरदाभयपाणिन(क)म् ।
त्रयीमूर्तिं पञ्चवक्त्रं नीलकण्ठमुमापतिम् ॥ ध्या[य]या[य]मि ।

त्रिशूलिनं विरूपाक्षं पञ्चास्यं नीलकण्ठ(न्धर)म् ।
कपालिनं चन्द्रमौलिं सर्वाभीष्टप्रदायकम् ॥ आवाहयामि ।

**End:**

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन रक्ष रक्ष महेश्वर ॥

**Colophon:**

पूजाविधिस्सम(ा)प्त[ह]ः ॥

---

## No. 8715. शिवपूजाविधिः.

## ŚIVAPŪJĀVIDHIḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 8*a* of the MS. described under No. 366

Complete.

Similar to the above.

**Beginning:**

धृतविभूतिरुद्राक्षः प्रयतो लिङ्गधारकः ।
पञ्चाक्षरजपोद्योगी शिवलिङ्गं समर्चयेत् ॥

नाशिवस्य शिवोपास्तिर्घटते जन्मकोटिभिः ।
शिवस्यैव शिवोपास्तिरिति नानाश्रुतिस्थितिः ॥

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।
तत्र घण्टारवं कुर्यात् देवताह्वानलाञ्छनम् ॥

**End:**

शिवायेति शिवार्पणम् । मन्त्रसमर्पणे वा स मन्त्रनायको जयति । इष्टलिङ्गे इति मन्त्रेण वा मूलमन्त्रेण वा नैवेद्यं समर्पयामि ॥

**Colophon:**

इति शिवपूजाविधिस्समाप्तः ॥

## No. 8716. शिवपूजाविधिः. ŚIVAPŪJĀVIDHIḤ.

Pages, 12. Lines, 5 on a page.

Begins on fol. 8a of the MS. described under No. 7834

Complete.

Similar to the above.

The MS. is dated Sunday the tenth day of the bright fort night of Adhika Śrāvaṇa in the year Kālayukti.

**Beginning:**

श्रीमल्लिकार्जुनं देवं चिद्घनं चेन्नसंज्ञकम् ।
गुरुभक्तेश्वरं . . गुणातीतमुपास्महे ॥

कामिकागमे—

अवचा(वाच्या)त्मस्वरूपाय शिवभावप्रदायिने ।
नमस्सद्गुरुनाथाय षट्स्थलब्रह्ममूर्तये ॥

* * * *

पादयोः पाद्यं हस्तयोरर्घ्यं मुखे आचमनम् । अभिषेकमन्त्रः—

नमस्ते अस्तु भगवन् विश्वेश्वराय त्रियम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय रुद्राय नीलकण्ठाय सर्वेश्वराय सदाशिवाय श्रीमहादेवाय नमः ।

**End:**

लिङ्गाचारस्सदाचाराश्शिवाचारस्तथैव च ।
गणभृत्याचारकाश्च पञ्चाचाराः प्रकीर्तिताः ॥

* * * *

---

## No. 8717. शिवपूजाविधिः. ŚIVAPŪJĀVIDHIḤ.

Substance, palm-leaf. Size, 15⅝ × 1⅝ inches. Pages, 34. Lines, 11 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1a. The other works herein are Basavēśastōtra 18a, Śivapūjāvidhi 23a, Bhavānīvacanālu 41a, Mahānyāsa 43a, Namaśśivāyagadya 45a.

Complete.

Similar to the above.

**Beginning:**

शिवार्यो नमः, ओं हं अनन्तशक्तिधाम्ने ज्योतीरूपाय शिवास्त्राय फट् . . . . . . . . . . . . . .

शिवपूजापरं मुक्त्वा शिवलोके महीयते ।
अरुणोदयवेलायां करोति शिवपूजनम् ॥
अरुणत्रयनिर्मुक्तं यस्त्वन्ते ब्रह्म तत्परम् ।
उत्तमं बहुनक्षत्रं मध्यमं लुप्तका(ता)रकम् ॥
कनिष्ठं भानुवेलायामन्नार्थं निष्फलं भवेत् ।

**End:**

शिवाचारसदाचारलिङ्गाचारन तत्परम् ।
गणाचारभृत्याचारपञ्चाचाराः प्रकीर्तिताः ॥

पञ्च सूतकानि—

जातिजन्मरजोच्छिष्टं प्रेतकर्म तथैव च ।
पञ्चसूतमिति ख्यातं वीरशैवविवर्जितम् ॥

---

## No. 8718. शिवपूजाविधिः.
## ŚIVAPŪJĀVIDHIḤ.

Substance, palm-leaf. Size, $6\frac{3}{4} \times 1$ inches. Pages, 28. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 2a. The other works herein are Namaśśivāṣṭaka 1a, Āndhragānamu 17a.

Similar to the above.

**Beginning:**

शम्भवे नमः, शङ्कराय नमः, शान्ताय नमः, शाश्वताय नमः, शिवाय नमः, स्थाणवे नमः, भवाय नमः, उमापतये नमः ।

**End:**

ओं चरलिङ्गाय स्वाहा । ओं प्रसादलिङ्गाय स्वाहा । ओं महालिङ्गाय स्वाहा । मध्ये मध्ये पानीयं समर्पयामि । उत्तरापोऽशनं समर्पयामि । ताम्बूलं समर्पयामि ॥

No. 8719. शिवपूजाविधिः.

ŚIVAPŪJĀVIDHIḤ.

Pages, 34. Lines, 11 on a page.

Begins on fol. 23*a* of the MS. described under No. 8717

Complete.

Similar to the above. Śivāṣṭōttaraśatanāmastōtra is given at the end of the Pūjā as a necessary portion of it.

**Beginning**:

ओं पृथिव्या मेरुपृष्ठ ऋषिः, कूर्मो देवता, सुतलं छन्दः, आसने विनियोगः—इति भूतशुद्धिः ।

देहशुद्धिः—

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेद्विरिजाधीशं सबाह्याभ्यन्तरश्शुचिः ॥
आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।
कुरु घण्टे रवं तत्र देवताह्वानलक्षणम् ॥

अस्मद्गुरुभ्यो नमः ।

* * * *

मुच्यते सर्वपापेभ्यः स शिवैक्यपदं व्रजेत् ।
षडक्षरन्यासमिदं सारात्सारतरं स्मृतम् ॥
ततो लिङ्गार्चनविधिरुच्यते शृणु पुत्रक ।
श्रीशिवाय नमः ।
लिङ्गमध्ये महादेवस्साक्षादेव व्यवस्थितः ।
अनुग्रहाय लोकानां तस्माल्लिङ्गं प्रपूजयेत् ॥
लिङ्गमध्ये जगत्सर्वं त्रैलोक्यं सचराचरम् ।
लिङ्गबाह्यात्परं नास्ति तस्माल्लिङ्गं प्रपूजयेत् ॥

**End**:

बिल्वपत्रैः पुनस्तैर्वा पुष्पैश्च तुलसीदलैः ।
तिलाक्षतैर्यजन्देवं जीवन्मुक्तो न संशयः ॥

नाम्नामेषां पशुपतेरेकमेकापवर्गदः ।
अन्येषां च विशिष्टानां फलं वक्तुं न शक्यते ॥

**Colophon:**

इति श्रीगौरीनारायणसंवादे शिवाष्टोत्तरशतदिव्यनामस्तोत्रं सम्पूर्णम् ॥

---

## No. 8720. शिवरात्रिपूजा.
## ŚIVARĀTRIPŪJĀ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 55*a* of the MS. described under No. 3691.

Incomplete. Contains only the stanzas to be repeated while giving the water-offering in connection with the worship of Śiva on the Śivarātri day.

**Beginning:**

नमश्शिवाय सोमाय सर्वपापहराय च ।
शिवरात्रौ मया दत्तमिदमर्घ्यं गृहाण भो ॥
मया कृतान्यशेषाणि पापानि नुद शङ्कर ।
गृहाणार्घ्यमुमाकान्त शिवरात्रौ प्रसीद मे ॥

**End:**

नमश्शिवाय शान्ताय कारणत्रयहेतवे ।
निवेदयामि चात्मानं त्वं गतिः परमेश्वर ॥

---

## No. 8721. शिवालयपूजाक्रमः.
## ŚIVĀLAYAPŪJĀKRAMAḤ.

Substance, palm-leaf. Size, 14 × 1⅜ inches. Pages, 276. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Incomplete.

A collection from various Āgamas on the subject of worship to be conducted in a Śiva temple.

**Beginning:**

इति ध्यात्वाभ्यर्च्य हृदयादीनां धेनुमुद्रां नेत्रयोर्गोविषाणमस्त्रस्य . . . . मुद्रां च प्रदर्शयार्चयेत्। तदनु पूर्वादिदिग्दलाग्रेषु ओं सं सोमाय नमः, ओं बुं बुधाय नमः, ओं (ब्रां बृ)हस्पतये नमः, ओं भं भार्गवाय नमः।

**End:**

जीर्णं दग्धं धृतं स्थूलमाखुदष्टं सरन्ध्रकम्।
देवस्वं दुष्क्रियायुक्तं वस्त्राण्येवं परित्यजेत्॥
पटदेवाङ्गचित्राणि विचित्राणीतराणि च।
सितानि सूक्ष्मवस्त्राणि प्रशस्तानि पितामह॥
न्यायागतानि स्निग्धानि दक्षप्रियाणि दृढानि च।

---

## No. 8722. शैवाराधनक्रमः.

## ŚAIVĀRĀDHANAKRAMAḤ.

Substance, palm-leaf. Size, 7⅛ × ⅞ inches. Pages, 11. Lines, 4 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 3*a*. The other works herein are Śriśailasaṅkalpa 1*a*, Śaivaśrāddhaprayōga 8*a*

Incomplete.

Contains only the Kalaśapūjā

**Beginning:**

ओं पृथिव्या मेरुपृष्ठ ऋषिः, कूर्मो देवता, सुतलं छन्दः, आसने विनियोगः। अनन्तासनाय नमः।

* * *

अस्मभ्यं निरतशिवानन्दार्थमातृकानित्यकिरणावरणपरब्रह्मस्वरूपवीरमाहेश्वराराधनविधानेन अद्य करिष्ये। तदङ्गकलशाराधनं करिष्ये।

कलशस्य मुखे रुद्रः कण्ठे विष्णुस्समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥

**End:**

सर्वोपचारपूजां समर्पयामि । अनेन वरुणकलशदेव्याराधनेन सुप्रीता सु(प्र)सन्ना वरदा भवन्तु(तु) ॥

---

## No. 8723. श्यामलापूजापद्धतिः.

## ŚYĀMALĀPŪJĀPADDHATIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 103*a* of the MS. described under No. 673.

Complete.

Deals with the manner of conducting the worship of Śyāmala, a manifestation of Śakti.

**Beginning:**

त्रिकोणपञ्चकोणाष्टदलषोडशदलबाह्याष्टदलवृत्तभूपुरं विलिख्य त्रिपञ्चाष्टदलं विलिख्य . . . . . . . . . . . . .

तत्र त्रिकोणेषु ऐं रत्यै नमः, ऐं रतिश्रीपादुकां पूजयामि तर्पयामि नमः, ऐं प्रीत्यै नमः, ऐं मनोद्भवाय नमः । पुनः तत्र ऐं सप्तस्वराय नमः, सप्तस्वरश्रुतिभ्यो नमः, ऐं रागेभ्यो नमः, ऐं रागिभ्यो नमः ऐं रागिणीभ्यो नमः ।

**End:**

एवं ध्यात्वा महादेवीं सोपचारैस्समर्चयेत् ॥
प्रतिमायां पटे पात्रे श्रीपरागेतिपुस्तके ।
कन्यामूर्ध्नि तथा खड्गे यन्त्रे वामलदर्पणे ॥

**Colophon:**

इति श्यामलापूजाविधानं सम्पूर्णम् ॥

## No. 8724. श्रीविद्यामानसिकपूजा.
## ŚRĪVIDYĀMĀNASIKAPŪJĀ.

Page, 1. Lines, 19 on a page.

Begins on fol. 62*b* of the MS. described under No. 2886, wherein this has been mentioned as Tripurasundarīmānasikapūja.

Complete.

Gives the stanzas to be muttered for conducting mentally the worship of Tripurasundarī.

**Beginning :**

कल्याणोज्ज्वलकार्मुकोद्यतकरामानन्दमन्दस्मितां
कारुण्याङ्कुशपञ्चबाणकलितां कन्दर्पदर्पोज्ज्वलाम् ।
काम्याकर्षणदिव्यपाशसुभगां बालार्ककोटिप्रभां
कादिक्षान्ततनुप्रविष्टहृदयां ध्यायेत् शिवां शाम्भवीम् ॥

**End:**

श्रीङ्कारोन्नतदिव्यमन्त्रविलसच्छ्रीङ्कारनादात्मिके
श्रीविद्ये प्रणतार्तिहारिणि परे श्रीशम्भुपत्नीश्वरि ।
श्रीविद्याङ्कितचक्रराजनिलये श्रीदेवि सौभाग्यदे
श्रीमातस्त्रिपुरे सदेशि विमले विश्वात्मिके रक्ष माम् ॥

**Colophon :**

इति श्रीविद्यामानसिकपूजा सम्पूर्णा ॥

---

## No. 8725. सरस्वतीपूजाविधानम्.
## SARASVATĪPŪJĀVIDHĀNAM.

Substance, palm-leaf. Size, 16¾ × 1¼ inches. Pages, 19. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

Gives the manner of conducting the worship of Sarasvatī, the goddess of learning.

**Beginning :**

तदेव लग्नं . - . सर्वेभ्यो महाजनेभ्यो नमः ।

पृथिव्याः । श्रीपरमेश्वरप्रीत्यर्थम् एवङ्गुणविशेषणविशिष्टायां शुभतिथौ श्रीमहालक्ष्मीमहासरस्वतीमुद्दिश्य महालक्ष्मीमहासरस्वतीप्रीत्यर्थं महालक्ष्मीमहासरस्वतीपूजारम्भकाले आदौ निर्विघ्नपरिसमाप्त्यर्थं श्रीगणाधिपतिमुद्दिश्य गणाधिपतिप्रीत्यर्थं सम्भवद्भिरुपचारैः सम्भवद्भिः पदार्थैश्च सम्भवता नियमेन ध्यानावाहनादिषोडशोपचारपूजां करिष्ये । श्रीगणाधिपतये नमः ध्यानावा—यामि ।

**End :**

अचलात्मजा च दुर्गा कमला त्रिपुरेति भेदिता जगति ।
या सा त्वमेव वाचामीश्वरी सर्वात्मना प्रसीद मम ॥
यस्य स्मृत्येति क्षमार्पणम् ॥

**Colophon :**

इति सरस्वतपूजाविधानम् ॥

---

## No. 8726. सरस्वतीपूजाविधानम्.
## SARASVATĪPŪJĀVIDHĀNAM.

Pages, 5. Lines, 11 on a page.

Begins on fol. 11*a* of the MS. described under No. 8198.
Complete.
Similar to the above.

**Beginning :**

नमस्कृत्य जगत्पूज्यां शारदां विशदप्रभाम् ।
सितपद्मासनां देवीं त्र्यक्षरां शशिभूषणाम् ॥

इति सङ्कल्प्य ।

आवाह्य पूजयेद्देवीं विद्यापुस्तकमण्डले ।
शुचिरम्मण्डलं कृत्वा विशालां लिप्तभूमिकाम् ॥

तत्र निक्षिप्य पीठं तु छत्रं विशदवाससा ।
अन्यजालमशेषं तु तत्र निक्षिप्य पूजयेत् ॥

**End:**

शशिकोटिलसज्जटाकलापा नवचन्द्रद्युतिवन्दनीयदेहा ।
शरदिन्दुमरीचिचारुचैर्विपुलं नो विदधातु शर्म वाणी ॥

**Colophon:**

श्रीसरस्वतीपूजा सम्पूर्णा ॥

---

No. 8727. सरस्वतीपूजाविधानम्.
SARASVATĪPŪJĀVIDHĀNAM.

Pages, 5. Lines, 4 on a page.

Begins on fol. 27*a* of the MS. described under No. 8195.

Pūjā only complete.

Similar to the above.

**Beginning:**

वन्दे त्रिभुवनीं दुर्गां साक्षसूत्रकमण्डलुम् ।
वरदाभयपाणिं च दुर्गां दुर्गार्तिनाशिनीम् ॥ ध्यायामि ।

यासापद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी . . . .
सर्वमाङ्गल्ययुक्ता ॥

आवाहयामि ।

**End:**

यस्य स्मृत्या च . . . सुप्रीतास्सुप्रसन्ना वरदा भवन्तु ॥
इति पूजाविधानं संपूर्णम् ॥

**Colophon:**

कथा—अश्वयः.

---

No. 8728. सरस्वतीपूजाविधानम्.
SARASVATĪPŪJĀVIDHĀNAM.

Pages, 8. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 6460.

Complete.

Similar to the above.

**Beginning :**

अथो वदामि वाग्देव्याः पूजां सर्वसमृद्धिदाम् ।
सर्वदा पूजयेद्देवीं भारतीं सर्वमातरम् ॥

* * * *

विद्यात्मानमशेषलोकजननीं देवीमिमामिष्टदा-
मार्द्राकल्पविभूषणां त्रिणयनां वन्देऽनवद्यां शुभाम् ।
भक्त्या नम्रसुरासुरेन्द्रमकुटप्रत्युप्तरत्नाङ्कुर-
च्छायारञ्जितपादपीठनिकटामिष्टार्थदां शाश्वतीम् ॥
सरस्वत्यै नमः आवाहनम् ।

**End :**

पुस्तकजपपटहस्ते वरदाभयचिह्नचारुबाहुलते ।
कर्पूरामलदेहे वागीश्वरि चोदयाशु मम चेतः ॥
इति प्रार्थनम् ॥

---

## No. 8729. सरस्वतीपूजाविधानम्.

## SARASVATĪPŪJĀVIDHĀNAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 68*a* of the MS. described under No. 5661.

Complete.

Gives the manner of conducting on the occasion of Navarātri the worship of Sarasvatī for four days from the day of the bright fortnight in the month of Āśvija which is associated with the asterism Mūla to the day associated with Śrāvaṇa.

**Beginning :**

शृणु पार्वति वक्ष्यामि भारतीपूजनं महत् ।
आश्विने मासि सम्प्राप्ते शुक्लपक्षे शुभे दिने ॥
मूलादौ पूजयेद्देवीं श्रवणान्ते विसर्जयेत् ।

* * * *

आयामशेषविद्यानामारूढां हंससुत्तमम् ।
आवाहयामि देवि त्वामायुरारोग्यवृद्धये ॥ आवाहनम् ।

**End:**

या कुन्देन्दुतुषारहारधवला या शुद्धवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैस्सदा पूजिता
सा मां पातु सरस्वती भगवती निश्शेषजाड्यापहा ॥

**Colophon:**

इति सरस्वतीपूजाविधानं सम्पूर्णम् ॥

---

## No. 8730. सूर्यनारायणपूजा.
## SŪRYANĀRĀYAṆAPŪJĀ.

Pages, 8. Lines, 23 on a page.

Begins on fol. 165*b* of the MS. described under No. 446.

Complete.

Deals with the manner of conducting the worship of Nārāyaṇa who is conceived here as being present in the middle of the Sun.

**Beginning:**

एवङ्गुणविशिष्टे शुभमुहूर्ते श्रीसूर्यनारायणमुद्दिश्य श्रीसूर्यनारायणप्रीत्यर्थं यावच्छक्त्यषोडशोपचारपूजां करिष्ये । तदङ्गकलशाराधनम्—

कलशस्य मुखे विष्णुः कण्ठे रुद्रस्समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणास्स्मृताः ॥

**End:**

विनौषधैर्विना वैद्यैर्विना पथ्यपरिग्रहैः ।
कालेन निधनं प्राप्तस्सूर्यलोके महीयते ॥

श्रीसूर्यनारायणमुद्दिश्य श्रीसूर्यनारायणप्रीत्यर्थमनया पूजया सप्तत्यर्घ्यैः सप्ततिनमस्कारैः व्यशीतिसाष्टाङ्गनमस्कारैश्च श्रीसूर्यनारायणस्सुप्रीतो वरदो भवतु ॥

## No. 8731. सूर्यनारायणपूजा.

## SŪRYANĀRĀYAṆAPŪJĀ.

Pages, 26. Lines, 9 on a page.

Begins on fol. 33*a* of the MS. described under No. 5683.

Complete.

Similar to the above.

**Beginning:**

यथाविधि भूशुद्धिभूतशुद्ध्यादीन् कृत्वा तत्र प्राणानायम्य देशकालान् सङ्कीर्त्य एवङ्गुणविशिष्टायां शुभतिथौ श्रीसूर्यनारायणमुद्दिश्य श्रीसूर्यनारायणप्रीत्यर्थं तृचकल्पोक्तप्रकारेण तृचन्यासपूर्वकं मण्डलोल्लेखनं पीठपूजां प्रधानदेवतापूजां त्रिवरणदेवतापूजामङ्गदेवतापूजां प्रसन्नार्घ्यं महासौरेणादित्यहृदयेन नमस्कारं श्रीतृचेन महार्घ्यप्रदानं करिष्ये ।

**End:**

इति मन्त्रेण पादाभ्यां मुखं निर्मृज्य हꣳसश्शुचिषदिति मन्त्रेण सूर्यमवलोकयेत् । एवं चतुर्विंशतिवारमर्घ्यं दद्यात् । प्रत्यहं द्वादशब्राह्मणभोजनं कुर्यात् ॥

**Colophon:**

इति कल्पं सम्पूर्णम् ॥

---

## No. 8732. सूर्यनारायणपूजा.

## SŪRYANĀRĀYAṆAPŪJĀ.

Pages, 20. Lines, 5 on a page.

Begins on fol. 73*b* of the MS. described under No. 6152 and not on 71*b* as mentioned therein; this is mentioned there as Sūryapūjā.

Complete.

Similar to the above.

**Beginning:**

अथ सूर्यमण्डलस्य मध्ये अष्टदलकमले सूर्यनारायणं ध्यायेत् ।

सूर्यमण्डलमध्यस्थं सप्ताश्वं सप्तरज्जुकम् ॥

द्विभुजं पद्महस्ताब्जं दक्षिणे वरदाभयम् ।
बिभ्राणं हेमदीसाङ्गं केयूराङ्गदभूषितम् ॥
प्रसन्नवदनं ध्यायेद्देवं स्वामीष्टसिद्धये ।
भूः सूर्यमावाहयामि, भुवः सूर्यमावाहयामि, सुवः
सूर्यमावाहयामि, भूर्भुवस्सुवः सूर्यमावाहयामि ।

**End:**

नमस्ते ध्वान्तनाशाय नमस्ते ज्ञानरूपिणे ।
नमस्त्रैलोक्यनाथाय सूर्यदेवाय ते नमः ॥ सूर्यनारायणाय प्रदक्षिणम् ।
नमस्ते देवेश नमस्ते सर्वकामद ।
नमस्ते पद्महस्ताय नमस्ते देवरूपिणे ॥ नमस्कारः ।

**Colophon:**

पूजाविधानं सम्पूर्णम् ॥

---

7. (b) PŪJĀ (JAINISM).

---

## No. 8733. अधिवास्यपूजाविधानम्.
## ADHIVĀSYAPŪJĀVIDHĀNAM.

Substance, palm-leaf. Size, $13\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 176. Lines, 5 on a page. Character, Kanarese. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Āpōśanavidhi 89*a*, Jinastōtra (Kanarese) 90*a*, Ṣōḍaśakarmanāmāni 93*b*, Jināṣṭōttaraśatanāmāvali 94*a*, Jainagōtrapravaraviṣaya 100*a*.

Incomplete.

This contains the Pūjā, Stōtra, Mantra and Yantra relating to the various deities worshipped by the Jainas.

**Beginning:**

अधिवास्यपूजाविधानम्—
श्रीमज्जिनेन्द्रकथिताय सुमङ्गलाय लोकोत्तमाय शरणाय विनेयजन्तोः ।
धर्मायताय वचनासहशुद्धितोऽहं स्वर्गापवर्गफलदाय नमस्करोमि ॥

ओं ह्रीं श्रीं क्षं वः स्वाहा—पुष्पाञ्जलिः ।
ओं—अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्परमात्मानं सबाह्याभ्यन्तरश्शुचिः ॥

ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः—असि आ उ सा म(मे)सर्वाङ्गशुद्धिं कुरु स्वाहा ।

अपवित्रः पवित्रो वा सुस्थितो दुस्थितोऽपि वा ।
ध्यायेत्पञ्चनमस्कारं सर्वपापैः प्रमुच्यते ॥

ओं णमो अरहन्ताणं, ओं सिद्धाणं, ओं णमो आआरियाणं, ओं णमो ऊवज्झाआणं, ओं णमो णमो सव्वसाहूणं इति लघुपञ्चनमस्कारः ।

ध्यानम्—
अद्याभवत्सफलता नयनद्वयस्य देव त्वदीयचरणाम्बुजवीक्षणेन ।
अद्य त्रिलोकतिलक प्रतिभासते मे संसारवारिधिरयं चुळकप्रमाणम् ॥
अद्य मे क्षाळितं गात्रं नेत्रे च विमले कृते ।
ज्ञातोऽहं धर्मतीर्थेषु जिनेन्द्र तव दर्शनात् ॥

End:

आत्मविद्यां पूजय ओं ह्रीं णमो अरहन्ताणं, ओं ह्रीं णमो सिद्धाणं, ओं ह्रीं णमो आआरियाणं, ओं ह्रीं णमो ऊवज्झाआणं, ओं ह्रः णमो ळोवसव्वसाहूणं, अरिमारीचोररावलघोरोपसर्गं विणाशय हुं फट् स्वाहा ॥

---

## No. 8734. आर्हतयतिपूजा.

### ĀRHATAYATIPŪJĀ.

Substance, palm-leaf. Size, 11¼ × 1⅜ inches. Pages, 2. Lines, 7 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Begins on fol. 29*a*. The other works herein are Bhūpālastōtra 1*a*, Dṛṣṭāṣṭaka 4*b*, Jinastōtra 5*b*, 38*b* and 49*b*, Prākṛtastōtra 8*b* and 43*b*, Śāntyaṣṭaka 9*b* and 23*b*, Jainasāmayikavrata 10*b*

Siddhabhaktikāyōtsarga (Prākṛta) 12*a*, Siddhabhakti 13*b*, Jainavandana (Prākṛta) 15*a*, Caityavandana 17*a*, Jinarājastōtra 20*a*, Tīrthakarastōtra 21*a*, Pañcagurubhakti 23*a*, Yōgabhakti (Prākṛta) 24*b*, Ācāryabhakti 27*b*, Śrutabhakti 30*a*, Jainavāgdēvatāpūjā 34*b*, Cāritrabhakti 34*b*, Nandīśvarabhakti 37*a*, Vardhamānacandrastōtra 40*a*, Ahamādibhakti 46*b*, Samantabhadrastuti 48*a*, Jinanāthapañcaka 50*a*, Jinasahasranāmastōtra 59*b*, Viṣāpahārastava 68*a*, Ekībhāvastuti 70*a*, Svapnastava 74*a*, Jinastōtra (Kanarese) 79*a*, Jainācāryanāmāni 83*a*.

Complete.

This gives the manner of conducting the worship of the Jaina ascetics.

**Beginning:**

हैमभृङ्गारनिर्वान्तपूरया वारिधारया ।
श्रीखण्डागरुकर्पूरमिश्रया गन्धगर्भया ॥
अक्षतैः सौरभैः क्षिप्तकुन्दकोरकविभ्रमैः ।
पुष्पैश्चम्पकपुन्नागमल्लिकाबकुलादिभिः ॥
नि नै वेद्यैर्वानवद्यैर्वा सुधासारसमान्विषा ।
दीपैः कर्पूरनिर्माणवर्तिकाग्रविनिर्गतैः ॥

यमनियमनिधीनामर्चयित्वा यतीना-
मपरिमितगुणानामङ्घ्रिपद्मानि भक्त्या ।
तदनु सकलभव्यप्राणिकर्मोपशान्त्यै
शुचिमुपरचयामो वारिभिः शान्तिधाराम् ॥

**End:**

ये नित्यं व्रतमन्त्रहोमनिरता ध्यानाग्निहोत्राकुलाः
षट्कर्मस्खल(मैंकर)तास्तपोद्मधनाः साधुक्रियासाधवः ।
शीलप्रावरणा गुणप्रहरणाश्चन्द्रार्कतेजोऽधिकाः
मोक्षद्वारकवाटपाटनभटाः प्रीणन्तु मां साधवः ॥

गमणं समाहि मरणं जिणगुणसंपत्तिहोमज्झं ।

No. 8735. कलिकुण्डपूजा.

KALIKUṆḌAPŪJĀ.

Substance, palm-leaf. Size, 14¼ × 1¼ inches. Pages, 3. Lines, 6 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Begins on fol. 9a. The other works herein are Pañcaparamēṣṭhipūjā 1a, Árhatanāmastōtra 2b, Vṛṣabhagadya 3a, Candraprabhagadya 3b, Nāgabalipūjā 4a, Padmāvatipūjā 5b, Navagrahapūjā 7a, Madhyāhnikasaṅkalpa 8a, Jainapuṣpāñjali 11a, Pārśvanāthamālāmantra 11b, Bṛhatsiddhacakrakramamantra 13a, Gaṇadharavalayacakramantra 13b, Jinasahasranāma 15a, Jainahōmōtsavapūjā 22a, Jinapādapūjā 41a, Yakṣayakṣīpūjā 42a, Jainācāryastuti 43a, Jainamahābhiṣēkapūjā 44a, Siddhacakrapūjā 53a, Siddabhaktividhāna 55a, Jinēndrapūjā 57a, Sarasvatīpūjā 62a, Tīrthaṅkarastuti 63a, Ratnatrayārādhanavidhi 64a, Siddhaparamēṣṭhipūjā (Prākṛta) 65a, Brahmadēvastuti 66a, Siddhaparamēṣṭhiprārthanā 68a, Jinapañcacāmarastōtra 70a, Jinastuti 71b.

Complete.

Deals with the manner of conducting the worship of Kalikuṇḍadaṇḍasvāmin, a Jaina saint.

**Beginning:**

. . . खिलकल्याणमालोद्वेलोदयाश्रये ।
कलिकुण्डमखण्डात्मभिक्षुमारोपयाम्यहम् ॥

ओं ह्रीं श्री अर्हन् कलिकुण्डदण्डस्वामिन् अतुलबलवीर्यपराक्रम अत्रावतर सं वौषट् । ओं ह्रीं श्री अर्हन् कलिकुण्डदण्डस्वामिन् अतुलबलवीर्यपराक्रम अत्र तिष्ठ ठ ठ सं वौषट् हूं स्वाहा—स्थापनम् । ओं ह्रीं श्रीं कलिकुण्डदण्डस्वामिन् अतुलबलवीर्यपराक्रम संनिहितो भव वषट् स्वाहा—संनिधीकरणम् ।

**End:**

मन्त्रपुष्पम् । ओं ह्रीं श्रीं क्लीं अर्हन् कलिकुण्डदण्डस्वामिन् अतुलबलवीर्यपराक्रम आत्मविद्यां रक्ष । परविद्यां छिन्द । परमन्त्रान् भिन्द । स्त्रां स्त्रीं स्त्रूं स्त्रौं स्त्रः हुं फट् स्वाहा ॥

## No. 8736. क्षेत्रपालपूजा.

## KṢĒTRAPĀLAPŪJĀ.

Substance, palm-leaf. Size, 14 × 2 inches. Pages, 2. Lines, 8 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Begins on fol 1a. The other works herein are Vāstudēvatāpūjā 2r, Vimānaśuddhi 3a, Jinālayābhiṣēkādipūjā 7b, Jainamantrayantrapūjā 16b, Jinayajñakalpa 25a, Jinasaṁhitā 37a, Jinakriyāsaṁskāra 42a, Jinayantrārcanakrama 45a.

The first leaf is wanting.

Incomplete

Deals with the manner of worshipping Kṣētrapāla or the guardian deity of a place.

**Beginning:**

(ओं ह्रीं क्षेत्रपा)लाय गन्धानुलेपनं करोमि स्वाहा । ओं ह्रीं क्षेत्रपालाय कौसुम्भवस्त्रवेष्टनं करोमि स्वाहा । ओं ह्रीं क्षेत्रपालाय नैवेद्यं समर्पयामि स्वाहा । (ओं ह्रीं क्षेत्रपाला)य इदमर्घ्यं पाद्यं जलं गन्धमक्षतं पुष्पं दीपं धूपं चरुं बलिं फलं स्वस्तिकं यज्ञभागं ददामहे प्रतिगृह्यतां प्रतिगृह्यतामिति स्वाहा ।

**End:**

ओं ह्रीं क्षेत्रपालाय गुडार्पणं करोमि स्वाहा । ओं ह्रीं क्षेत्रपालाय पुष्पमालारोपणं करोमि स्वाहा ओं श्री क्षेत्र . . . .

---

## No. 8737. जिनपादपूजा.

## JINAPĀDAPŪJĀ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 41a of the MS described under No. 8735

Complete.

Deals with the manner of worshipping the feet of Jina.

**Beginning:**

. . . . भव्यतोयैर्गाङ्गेयमुक्तोज्ज्वलकुम्भपूर्णैः ।
शीतांशुशीतैर्भवतापहारैः संपूजयामो जिनपादपद्मौ ॥
ओं ह्रीं नमः परमेष्ठिभ्यः स्वाहा जलम् ।
काश्मीरिकालागरुपुष्पकेन्दुव्यामिश्रितानुत्तमगन्धसारैः ।
तापापनोदैः सुरभीकृताशैः संपूजयामो जिनपादपद्मौ ॥
ओं ह्रीं अर्हन्नमः परमात्मकेभ्यः स्वाहा गन्धः ।

**End:**

देवेन्द्रवृन्दमणिमौलिसमर्चिताङ्घ्रेः देवादिदेवपरमेश्वरकीर्तिभाजः ।
पुष्पायुधप्रमथनस्य जिनेश्वरस्य पुष्पाञ्जलिर्विरचितोऽस्तु विनेयशान्त्यै ॥
ओं ह्रीं हं ध्यातृभिरभीप्सितफलदेभ्यः स्वाहा ॥ पुष्पाञ्जलिः ।

---

## No. 8738. जिनपूजाक्रमः.
## JINAPŪJĀKRAMAḤ.

Substance, palm-leaf. Size, 7¼ × 1¼ inches. Pages, 19. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 73a. The other works herein are Jinasahasranāmastōtra 1a, Bhaktāmarastōtra 14a, Bhūpālastōtra 21a, Viṣāpaharaṇastōtra 26a, Kalyāṇastava 31b, Jainadharmōpadēśa (Maṇipravāla) 38a, Jainēndrayajñavidhi 42a, Saṅkalpapuṇyāhavācana 51a, Tīrthakarapūjā 58a, Pārśvanāthamantrapūjā 68a, Tīrthakarayajñakrama 83a, Padmāvatīsahasranāmastōtra 91a, Brahmayakṣastōtra 108a, Brahmayakṣaśataka 110a, Śabaramantra (Tamil) 114a, Śrījvālinīstōtra 118a.

Incomplete.

Deals with the manner of conducting the worship of Jinas.

**Beginning:**

वृषं वृषभसेनाद्याः सिंहसेनादयो जिनम् ।
शंभवं चारुषेणाद्या वज्रनाभिपुरःसराः ॥

* * * *

श्रीहस्तिनागनगराधिपविश्वसेनप्रेमाकुलैरावनिचारुरत्नः ।
एणाङ्कचक्रेश्वरतीर्थनाथः त्वां पूजयामो वरशान्तिनाथः ॥
ओं ह्रीं शान्तिजिनदेव अत्रावतर स्वाहा ।
श्रीमत्कुण्डपुराधिनाथविलसत्सिद्धार्थभूवल्लभः
प्रेमार्द्रो प्रियकारिणी प्रियसुतः संप्रार्थ्यते सन्मतिः ।
यत्रास्योल्लतकेतनः कनकरुग्मातङ्गसिद्धायिनी
माणिक्याभरणाभिरञ्जितपदप्रोत्फुल्लपङ्केरुहः ॥
ओं ह्रीं वर्धमानजिनदेव अत्रावतर स्वाहा ॥

End :

जयरामारमणस्य सुग्रीवस्य च सूनुकम् ।
पुष्पदन्तं यजे यज्ञे पुष्पदन्तसमप्रभम् ॥
ओं ह्रीं पुष्पदन्तजिनदेव ।
दिक्कालाद्यनभिज्ञानः चिरं कुर्वन् जपं स्तवम् ।
षट्कर्मणां न चाप्नोति मन्त्रसिद्धिं कदाचन ॥

---

## No 8739. जिनयज्ञकल्पः.
## JINAYJÑAKALPAḤ.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 31. Lines, 7 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Begins on fol. 16. The other works herein are Pañcadaśatithidēvatārcana 1a, JaināBhiṣēkādividhāna.

Similar to the above. This work is said to have been composed by Āśādhara.

The subjects treated of herein are—

| | |
|---|---|
| रत्नवृष्टिस्थापनम्. | परिचर्यास्थापनम्. |
| पीठपूजा. | निष्क्रमणकल्याणस्थापनम्. |

| | |
|---|---|
| जिनकल्याणस्थापनम्. | मन्त्रन्यासविधानम्. |
| तिलकादानविधानम्. | स्वस्त्ययनदानम्. |
| अष्टचत्वारिंशत्संस्कारमालारोपणम्. | समवसरणस्थापनम्. |

**Beginning:**

अथ विविक्तदेशस्थः प्रतिष्ठाचार्यकुञ्जरः ।
प्रतिष्ठाविषये कुर्यात्परिकर्मेदमाहतः ॥
प्रागेकां शुभसचार्यां प्रातिहार्यादिशालिनीम् ।
परीक्षाय सुरम्यार्चां प्रतिष्ठेयं(यां) निरूपयेत् ॥

* * * *

रत्नवृष्टिस्थापनम् –

सार्वर्तुकानि वरवस्त्रफलप्रसूनशय्याशनासनविलेपनमङ्गलानि ।
तत्तत्क्रियोपकरणानि तदीप्सितानि तीर्थेश मातुरुपदीकुरुताज्जिनेशः॥

**End:**

अप्यङ्गुष्ठमितामनेन विधिना जैनीं प्रतिष्ठाप्य ये
शक्त्या तां प्रतिमां भजन्ति विधिवन्नित्याभिषेकादिभिः ।
तेऽर्हद्भक्तिदृढानुरञ्जितधियो मुक्त्वा शिवाशादर-
श्रावण्योऽभ्युदयावलीरनुभवन्त्यात्यन्तिकीं निर्वृतिम् ॥

**Colophon:**

इत्याशाधरविरचिते प्रतिष्ठासारोद्धारे जिनयज्ञकल्पनाम्नि जिनप्रतिष्ठाविधानीयो नाम चतुर्थोऽध्यायः ॥

---

No. **8740.** जिनयज्ञकल्पः.
JINAYAJÑAKALPAḤ.

Pages, 24. Lines, 8 on a page.

Begins on fol. 25*a* of the MS. described under No. 8736

Incomplete.

Deals with the manner of conducting the worship of Jinas.

**Beginning:**

जिनान् नमस्कृत्य जिनप्रतिष्ठा शास्त्रोपदेशव्यवहारदृष्ट्या ।
श्रीमूलसङ्घे विधिवन्(व्य)बुद्धान् भव्यान् प्रवक्ष्ये जिनयज्ञकल्पम् ॥

* * * *

जिनानां यजनं यज्ञस्तस्य कल्पः क्रियाक्रमः ।
तद्वाचकत्वाच्च जिनयज्ञकल्योऽयमुच्यते ॥

अथातस्तीर्थोदकाधानविधानमनुवर्णयिष्यामः—

दत्वा पद्माकरायार्घ्यं वास्तुदेवाय चावनिन् ।
संमार्ज्य वायुभिर्मेघैः प्रोक्ष्य पूताग्निनोरगान् ॥

**End:**

द्रां द्रीं हं सः स्वाहा । आचमनम् । ओं भूः भुवः सुवः असि आदेसार्हन् । प्राणायामं करोमि स्वाहा । त्रिरुचार्य प्राणाना(यम्य) ।

---

## No. 8741. जिनयन्त्रार्चनक्रमः.

## JINAYANTRĀRCANAKRAMAḤ

Pages, 2. Lines, 8 on a page.

Begins on fol. 45*a* of the MS. described under No 8736.

Incomplete.

The manner of conducting the worship of the mystic diagram is given here. This is considered to have the power of ensuring, by means of the Mantras repeated by the worshipper, the accomplishment of his desired objects.

**Beginning:**

स्वयंभुवं महादेवं ब्रह्माणं पुरुषोत्तमम् ।
जिनेन्द्रचन्द्रमानम्य वक्ष्ये यन्त्रार्चनक्रमम् ॥
सिषाधयिषुणा विद्यामविघ्नेनेष्टसिद्धये ।

* * * *

स्वाहेति स्नानमन्त्रोऽयं मन्त्रविद्भिः प्रकीर्तितः ।
एवं स्नानपवित्राङ्गो धौतवस्त्रपरिग्रहः ।
स्थित्वा संमार्जितकान्तप्रदेशे देशसंयमी ॥

End:

प्राग्भागे शिरसो मूर्ध्नि दक्षिणे पश्चिमे तथा ।
वामे चेत्येष विन्यासक्रमो वारे द्वितीयके ॥
भुजयुग्मे च नाभौ च पार्श्वयुग्मे तृतीयके ।
कवचाख्यं तनून्यासं कुर्यान्मन्त्रेण मन्त्रवित् ॥
ओं ह्रीं णो अर्हत्ताणं हृदयाय न . . . . . . . . .

---

No. 8742. जिनसंहिता (कर्णाटकटिप्पणसहिता).

JINASAMHITA (WITH KANARESE MEANING).

Substance, palm-leaf. Size, 12¾ × 1⅝ inches. Pages, 250. Lines, 5 on a page. Character, Kanarese. Condition, good. Appearance, old.

Incomplete.

Begins on fol. 8*a*. The other work herein is **Yakṣayakṣilakṣaṇa** (Kanarese) 1*a*.

A treatise dealing with the manner of worship to be conducted in Jina temples. This is attributed to Mahāvīra or Vardhamāna. He is stated to have taught this work to the king of Magadha in Vipulādri. The author of the Kanarese commentary is Vādi Kumudacandramunīndra, son of Māghanandi-Siddhānta-Cakravartin. The commentator calls the work also by the name of Pratiṣṭhākalpa.

The following is a list of the subjects dealt with in the work:—

१. पूज्यपूजकपूजकाचार्यपूजाफलप्रतिपादनम्.
२. त्रैवर्णिकाचारविधिः.
३. सकलीकरणविधिः.
४. ध्वजारोहणविधिः.
५. अङ्कुरार्पणविधिः.
६. विमानशुद्धिः.
७. होमविधिः.
८. वेदिकाविधानम्.
९. अभिषेकमण्डपविधानम्.

Beginning:

श्रीमाघनन्दिसिद्धान्तचक्रवर्तितनूभवः ।
कुमुदेन्दुरहं वच्मि प्रतिष्ठाकल्पटिप्पणम् ॥

विज्ञानं विमलं यस्य भासते विश्वगोचरम् ।
नमस्तस्मै जिनेन्द्राय सुरेन्द्राभ्यर्चिताङ्घ्रये ॥

* * * *

एवं जिनगुणस्तोत्रकृतमङ्गलसत्क्रियः ।
संग्रहीष्यामि भव्येभ्यो हिताय जिनसंहिताम् ॥
शास्त्रावतारसंबन्धः प्रथमं प्रतिपद्यते ।
श्रेयोऽर्थिनः समाधाय चेतः शृणुत धीधनाः ॥
इति स श्रूयते वीरश्चरमस्तीर्थनायकः ।
विपुलाद्रौ सभां दिव्यामध्युवास कदाचन ॥
तत्रासीनं तमभ्येत्य वन्दित्वा मगधेश्वरः ।
उपेत्य गणभृज्ज्येष्ठमप्राक्षीज्जिनसंहिताम् ॥
चराचरजगद्बन्धुस्ततस्तां जिनसंहिताम् ।
भगवान् गौतमः स्वामी मागधं प्रत्यबूबुधत् ॥
ततः प्रभृत्यविच्छिन्नसर्गपर्वक्रमागता ।
मयाऽधुना यथोक्तेन संहिता संप्रकाश्यते ॥
मागधप्रश्नमुद्दिश्य गौतमः प्रत्यवोचत ।
इतीदमनुसंधाय प्रबन्धोऽयं निबध्यते ॥
संगतं हितमेतस्या भव्यानामिति संहिता ।
जिनसंबन्धिनी सेयं नाम्ना स्याज्जिनसंहिता ॥
हितार्थिनो ये जिनसंहितामिमां
पठन्तु ते श्रद्दधतः सहादरम् ।
प्रकाशितां विश्वपदार्थदर्शिभिः
प्रमाणभूतैर्वृषभैः कवीश्वरैः ॥
पूज्यं पूजार्हमर्हन्तं प्राप्त्यपायादिसंपदम् ।
प्रणिपत्य प्रवक्ष्यामि पूजासारसमुच्चयम् ॥

पूज्यो जिनपतिः पूजा पुण्यहेतुर्जिनार्चना ।
फलं साभ्युदया मुक्तिः भव्यता पूजकः स्मृतः ॥

* * * *

प्रशस्तलक्षो यदि पूजयेत्पुमान्
जिनेन्द्रमिन्द्रार्चितपादपङ्कजम् ।
पुरं च राष्ट्रं च नृपश्च वर्धतां
स्वयं जिनः कारयताच वर्धताम् ॥

**Colophon:**

इति श्रीमाघनन्दिसिद्धान्तचक्रवर्तितनूभवचतुर्विधपाण्डित्यचक्रवर्तिश्रीवादिकुमुदचन्द्रमुनीन्द्रविरचिते जिनसंहिताटिप्पणे पूज्यपूजकपूजकाचार्यपूजाफलप्रतिपादनं समाप्तम् ॥

**End:**

अथैवं वेदिकाविधानं परिसमाप्य तत्तन्मालामन्त्रैः पञ्चोपचारविधिना वेदिकायां लिखितदलकोष्ठनिवासिदेवान् पञ्चगुरुमुख्यान् समाहूय सस्थाप्य संनिधीकृत्य संपूज्य वेदिकामलंकृत्य ॥

**Colophon:**

इति श्रीमाघनन्दिसिद्धान्तचक्रवर्तिसुतचतुर्विधपाण्डित्यचक्रवर्तिश्रीवादिकुमुदचन्द्रपण्डितदेवविरचिते प्रतिष्ठाकल्पटिप्पणे वेदिकाविधानं समाप्तम् ॥

* * * *

ओं केवलावबोधार्को द्योतयत्यखिलं जगत् ।
यस्य तत्पादपीठाग्रे दीपान् (संदीप)याम्यहम् ॥

---

### No. 8743. जिनसंहिता.
### JINASAMHITA.

Pages, 11. Lines, 8 on a page.

Begins on fol. 37*a* of the MS. described under No. 8736.

Up to the end of Śaucavidhi.

Same as the above. Contains the text only.

## No. 8744. जिनालयाभिषेकादिपूजा.
## JINĀLAYĀBHIṢEKĀDIPŪJĀ.

Pages, 18. Lines, 8 on a page.

Begins on fol. 7b of the MS. described under No. 8736.

Incomplete.

Contains the manner of conducting the Abhiṣēka or the ceremonial bathing of Jina's images in Jaina temples.

**Beginning:**

गङ्गाप्रभृत्यखिलतीर्थनदीतटाक-
कासारिकूपसकलार्णवतोयपूर्णैः ।
दामां सुवर्णकलशैरभिषेचयामि
संसारदुःखपरितापनिवारणानि(च) ॥

* * * *

स(रि)त्तीर्थाम्बुधाराभिर्मन्यसस्याभिवृद्धये ।
कृत्रिमाकृतिमान् सर्वान् पूजयामि जिनालयान् ॥

**End:**

तां पूजां त्रिजगत्प्रमोक्षिजगतीकालत्रयीवर्तिनीं
सिद्धीं सिद्धवधूसमागमसुखस्याद्धानुमोदामहे ॥
इत्यन्वहं कृतपुरश्चरणः शरण्यां
भक्त्याभिषिच्य परमार्चति यो जिनार्चा(म्) ।

---

## No. 8745. जिनेन्द्रपूजा.
## JINĒNDRAPŪJĀ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 57a of the MS. described under No. 8735.

Complete.

Similar to the above.

**Beginning:**

श्रीमन्मन्दरमस्तके शुचिजलैर्धौते सदर्भाक्षते
पीठे मुक्तिवरं निधाय रचितं तत्पादपुष्पस्रजा ।

इन्द्रोऽहं निजभूषणार्थममलं यज्ञोपवीतं दधे
मुद्राकङ्कणशेखरानपि तथा जैनाभिषेकोत्सवे ॥

ओं ह्रीं स्वस्तये श्रीपीठमारोपयामि स्वाहा । ओं ह्रीं हं क्षं ठ श्रीपीठस्थापनं करोमि स्वाहा ॥

* * * *

इन्द्राग्न्यन्तकनैर्ऋतोदधिमरुद्यक्षेशशेषोडुपा-
नाहूतान्निजवाहनायुधवधूयुक्तान् सुसंस्थाप्य तान् ।
अर्घ्यैस्स्वस्तिकयज्ञभागचरुकैरोंभूर्भुवस्स्वःस्वधा-
स्वाहा चेत्यभिमन्त्रितैः प्रतिदिशं संतर्पयामः क्रमात् ॥

दशलोकपालकदेवताह्वानम् ।

**End:**

भव्यानां भुवनैकरामममहिमाभाजां सपर्याविधेः
कर्तॄणां परिपालकाखिलक्षितिभृतां राज्ञां यतीनां तथा ।
देशग्रामपुराकराभिजनतासंसेव्यविश्वंभरा-
चक्रस्याप्यखिलेन्द्रवन्दितवपुः शान्तिं प्रकुर्याज्जिनः ॥

ओं ह्रीं स्वस्ति भवतु जगतां शान्तये शान्तिधारां निष्पादयामि शान्तिकृद्भ्यः स्वाहा ॥

---

## No. 8746. जैनपूजा.

## JAINAPŪJĀ.

Substance, palm-leaf. Size, $3\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 24. Lines, 5 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Begins on fol. 22*b*. The other works herein are Jinastōtra 1*a*, Śāntyaṣṭaka 5*b*, Samantabhadrastōtra 8*a*, Jainasuprabhāta 11*a*, Svapnastava 13*b*, Vardhamānastava 15*b*, Candraprabhastōtra 17*a*, Vṛṣabhāṣṭaka 17*b*, Jainācāryanāmāni 19*a*, Nirvāṇabhakti 35*a*, Vāstudēvatāpūjā 41*a*, Jvaraśāntiyantrapūjā 45*b*, Ṣaṭkarmastava 48*b*, Sarasvatipūjā 52*b*.

Complete.

Contains the manner of worshipping the 24 Tīrthaṅkaras.

**Beginning:**

श्रीमत्सो(च्छ्री)पद्मभावनापरिलसत्पूजाविधानं महत्
भूतानागतवर्तमानजिनपां द्वासप्तति भक्तितः ।
मुक्तिश्रीपरिरम्भनिर्भरपरीरम्भान्नमस्कृत्य ते (त)
द्वे(ब)क्ष्येऽहं मम हत्सरोजनिवहं(हे) तेषां पदं(द) प्राप्तये ॥
विधियज्ञप्रतिज्ञानाय प्रतिमोपरि पुष्पाक्षतं क्षिपेत् ।

* * * *

भूतादिकालोदितभव्यपुण्यादाराधिना यन्त्रसुरेन्द्रवृन्दचैं ।
तां(तान्) पञ्चकल्याणविभूतिभाज(जः) तीर्थकरान् सांप्रतमर्चयामि ॥
ओं निर्वाणाद्यतीतकालचतुर्विंशतितीर्थकरपरमदेवेभ्य अत्र एहि ।
आह्वानस्थापनसंनिधीकरणम्—
मरुत्तरङ्गिणीजलैर्मरुत्वतीन्द्रवन्दितान् ।
नतीततीर्थनायकानतीतसंस्कृतीन् यजे ॥ जलम् ।
सुगन्धसारचर्चयाँ सुगन्धचन्द्रमिश्रया।
नतीततीर्थनायकानतीतसंस्कृतीन् यजे ॥ चन्दनम् ।

**End:**

अर्हदाचार्यभक्तिबहुश्रुतप्रवचनभक्तिभावस्य का(म)परिहाणमार्गप्र भावनाप्रवचनवत्सलत्वामिति तीर्थकरार्थषोडशकारणेभ्यः पूर्णार्घ्यं निर्वपामि स्वाहा ॥

**Colophon:**

समाप्तम् ॥

---

## No. 8747. जैनपूजाविधानम्.
## JAINAPŪJĀVIDHĀNAM.

Substance, palm-leaf. Size, 13 × 1⅜ inches. Pages, 60. Lines, 5 on a page. Character, Kanarese. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Vastupadanyāsavidhi 31*a*, Candraprabhāgadya 75*a*, Jainācāryapraśaṁsā 81*a*,

Sarvacaityālayapūjā 85*a*, Sarvadēvatājayamālā 94*b*, **Yakṣidēvatārcana** 96*a*, Pañcamaṇḍalārādhanavidhāna 99*b*.

Incomplete.

Describes the manner of worshipping the images of Jinas.

**Beginning:**

श्रीआदिनाथाय नमः ।

संकल्प्याभिषवं विशोध्य भुवमास्थाप्यात्र दर्भान् पुटान्
पीठं बिम्बमिहार्हतं जिनमुपास्याष्टासनादिक्रमैः ।
दिक्पालान् परिपूज्य सज्जलमुखेनान्यैः कषायोदकैः
संस्नाप्यान्ववतार्य कोणकलशैर्गन्धोदकैः स्नापयेत् ॥

विधियज्ञप्रतिज्ञापनाय पुष्पाञ्जलिः . . . . .

जिनानामपि सिद्धानां महर्षीणां समर्चनात् ।
पाठात् स्वस्त्ययनस्यापि पुनः पूर्वं प्रसादयेत् ॥

पुनः प्रसाविविधानसूचनार्थमर्चनपीठाग्रतः पुष्पाञ्जलिं क्षिपेत् ।

**End:**

सिद्धपरमेष्ठिने नमः स्वाहेत्यादि । अथ कर्णिकायानर्चादिशि आचार्यपरमेष्ठिपूजा ।

कुमततिमिरसूर्यान् सारगाम्भीर्यधैर्यान्
परहितनिजकार्यान् पञ्चभेदोद्धचर्यान् ।
विनयवन[वि]विधीयान् पूजयाम्याहतार्यान्
मुनिजनपरिवार्यान् श्रीमदाचार्यवर्यान् ॥

---

## No. 8748. जैनमन्त्रयन्त्रपूज.
## JAINAMANTRAYANTRAPŪJĀ.

Pages, 14. Lines, 8 on a page.

Begins on fol. 16*b* of the MS. described under No. 8736.

Complete.

Deals with the manner of conducting the worship of Jinas with the aid of Mantras and Yantras (mystic diagrams).

**Beginning:**

निष्ठाप्यैवं जिनानां सवनविधिमनुप्राच्यभूभागमन्यं
पूर्वोक्तैर्यन्त्रमन्त्रैरिह भुवि विधिनाराधनापीठयन्त्रम् ।
कृत्वा सच्चन्दनाद्यैर्वसुदलकमलं कर्णिकायां जिनेन्द्रान्
प्राच्यां संस्थाप्य सिद्धानितरदितिगुरून्मन्त्ररूपान् विधाय ॥
जैनं धर्मागमार्चानिलयमपि विदिश्यत्र मध्ये लिखित्वा
बाह्ये कृत्वाथ चूर्णैः प्रविशदशदकैः पञ्चकृन्मण्डलानाम् ।
तत्र स्थाप्यास्तिर्यीशा ग्रहसुरपतयो यक्षयक्षीः क्रमेण
द्वारेशा लोकपाला विधिवदिह मह यन्त्रतो व्याह्वियन्ते ॥

**End:**

स्फुरिततरतनुश्रीः ह्रीलसद्भूस्युपेता
धृतिमतिविजयाः सत्कीर्तिलक्ष्मीश्च पश्चात् ।
विधुतविविधभूषाविद्रुमद्योतदेहाः
जिनपतिसवनेऽस्मिन् व्याह्वये दिक्पुरन्ध्रीः ॥
ओं ह्रीं क्रों वाराहे श्रीह्रीधृतिद्युतिमातिकीर्तिबुद्धिलक्ष्म्य आगच्छत ।
यस्यार्थे क्रियते पूजा तस्य शान्तिर्भवेत्सदा ।

**Colophon:**

कलशाभिषेकस्नपनयन्त्रपूजा समाप्ता ॥

---

## No. 8749. जैनमहाभिषेकपूजा.

### JAINAMAHABHIṢEKAPŪJĀ.

Pages, 17. Lines, 5 on a page.

Begins on fol. 44*a* of the MS. described under No. 8735.

Complete.

Gives the manner of conducting the ceremonial bathing of the image of Jina: by Pūjyapāda

**Beginning:**

आचम्यार्हन्तमादावहमपि विहितस्नानशुद्धिः पवित्रैः
तोयैः सन्मन्त्रयन्त्रैर्जिनपतिसवनाम्भोभिरप्यात्तशुद्धिः ।
आचम्यार्घ्यं च कृत्वा शुचिधवलदुकूलान्तरीयोत्तरीयः
श्रीचैत्यावासमानौम्यवनतिविधिना त्रिः परीत्य क्रमेण ॥
द्वारं चोद्घाट्य वक्त्राम्बरमपि विधिनिर्वापयाल्यां च शुद्धिं
कृत्वाहं सिद्धभक्तिं बुधनुतसकलीसत्क्रियां चादरेण ।
श्रीजैनेन्द्रार्चनार्थं क्षितिमपि यजनद्रव्यपात्रात्मशुद्धिं
कृत्वा भक्त्या विशुद्ध्या महमहमधुना प्रारभेयं जिनस्य ॥

**End:**

पुण्याहं घोषयित्वा तदनु जिनपतेः पादपद्मार्चितां श्री-
शेषां सूरार्पं मूर्ध्ना जिनपतिनिलयं त्रिः परीत्य विशुद्ध्या ।
आनम्येशं विसृज्यामरगणमपि यः पूज्यते पूज्यपादः
प्राप्नोत्सेवासु सौख्यं भुवि दिवि विबुधा देवनं दीपितश्रीः ॥

**Colophon:**

इति श्रीपूज्यपादविरचितः जैनमहाभिषेकः समाप्तः ॥

---

## No. 8750. जैनवाग्देवतापूजा.

## JAINAVĀGDĒVATĀPŪJĀ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 32b of the MS. described under No. 8734.

Complete.

Describes the manner of conducting the worship of the goddess, presiding over the Jaina learning.

**Beginning:**

श्रीमत्पुण्यधुनीप्रवाहधवलां स्थूलोच्चलच्छीकरै
रालीनालिकुलानि कल्मषधियैवोत्सारयन्ती मुहुः ।
नीलाम्भोरुहचारुसितोदरलसद्भृङ्गारवालंकृतां
वार्धारां श्रुतदेवतार्चनविधौ संपादयाम्यादरात् ॥

श्रीमन्नन्दनचन्दनद्रुमभवश्रीखण्डसारोद्भवैः
सद्यः पीडितवाल्यकुङ्कुमरसैः कर्पूरसंमिश्रितैः ।
वाग्देवीमभितोद्गमाद्भिरखिलैर्मत्तालिझंकारितै
र्यव(य)ज्मि श्रु(तदेवतामभिमतैर्गन्धैर्मनोनन्दनैः ॥

* * *

श्रीमद्भिः कलधौतपात्रविहितैः पीयूषपिण्डोपमैः
पुण्यानामिव राशिभिश्चरुवरैरामोदवद्भिर्भृशम् ।
प्राज्यक्षरिवृतप्रभूतदधिभिः संमिश्रितैः पावनैः
वाग्देवीं तु सुरासुरैरपचितां जैनेश्वरीं प्रार्चये ॥

End:

जिनेन्द्रवक्त्रप्रतिनिर्गतं वचो यतीन्द्रभूतिप्रमुखैर्गणाधिपैः ।
श्रुतं धृतं तैश्च पुनः प्रकाशितं द्विषट्प्रकारं प्रणमाम्यहं श्रुतम् ॥

* * *

गमणं समाहि मरणं जिणगुणसंपत्तिहोउमज्झं ॥

---

## No. 8751. जैनसामयिकव्रतम्.
## JAINASĀMAYIKAVRATAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 106 of the MS. described under No. 8734.

Complete.

This Vrata consists in taking up a vow to regard all beings equally; and the manner of conducting the Pūjā in relation to it is also given.

**Beginning:**

भगवन् नमोऽस्तु ते । एषोऽहं देववन्दनां कुर्याम् । अथ सामयिकस्वीकारः ॥

नमोऽस्तु धूतपापेभ्यः सिद्धेभ्योऽपि पदे पदे ।
सामायिकं प्रपद्येऽहं भवभ्रमणसूदनम् ॥

समता सर्वभूतेषु संयमः शुभभावनः ।
आर्तरौद्रपरित्यागः तद्धीः सामायिकव्रतम् ॥

साम्यं मे सर्वभूतेषु वैरं मम न केनचित् ।
आशाः सर्वाः परित्यज्य समाधिमहमाश्रये ॥
सिद्धं संपूर्णभव्यार्थं सिद्धेः कारणमुत्तमम् ।
प्रशस्तदर्शनज्ञानचारित्रप्रतिपादकम् ॥
नरेन्द्रमकुटाश्लिष्टपादपद्मांशुकेसरम् ।
प्रणमामि महावीरं लोकत्रितयमङ्गलम् ॥

End:

आश्रित्य स्नपनं विशोध्य तदिलां पीठं(ठ्यां) चतुःकुम्भयुक्-
कोणायां सकुशश्रियां जिनपतिं न्यस्यान्तमाप्ते(प्ये)ष्टदिक् ।
नीराजाम्ब(म्बु)रसाज्यदुग्धदधिभिः सिक्त्वा कृतु(कृतो)द्वर्तनं
सिक्तं कुम्भजलैश्च गन्धसलिलैः संपूज्य नुत्वा स्मरेत् ॥
शीताम्भोभिः सुगन्धैः प्रविशदशदकैः हारिपुष्पैर्वराज्ञैः
सद्दीपैश्चारुधूपैर्मधुरतरफलैश्चार्चयामो जिनेन्द्रम् ।
कुर्मः पुष्पाञ्जलिं तं प्रतिभमर(टपट)हायैस्ततः पूजयामः
पाथोभिः पातयामस्तदनु त्रिजगतां शान्तये शान्तिधाराम् ॥

---

## No. 8752. जैनहोमोत्सवपूजा.

### JAINAHÔMÔTSAVAPÛJÂ.

Pages, 38. Lines, 5 on a page.

Begins on fol. 22*a* of the MS. described under No. 8735.

Complete.

Gives the manner of conducting the worship subsidiary to the Jaina ritual called Hômôtsava.

**Beginning:**

श्रीशान्तिनाथममरासुरमर्त्यनाथ
भास्वत्किरीटमणिदीधितिधौतपादम् ।
त्रैलोक्यशान्तिकरणप्रवणं प्रणम्य
होमोत्सवाय कुसुमाञ्जलिमुत्क्षिपामि ॥

ओं ह्रीं श्रीं क्ष्वीं भूः स्वाहा । होमप्रस्तावनपुष्पाञ्जलिः ।

भेरीगम्भीरनादप्रवितत्तकहलाशङ्खडक्कामृदङ्ग-
प्रध्मातध्वानघण्टाझणझणरवसज्झर्झरादीप्रघोषैः ।
रङ्गद्दङ्गातरङ्गोद्भवतुमुलरवाशक्ति (क्ति)तैः क्षुभ्यदभ्भि-
ध्वानानेकैः प्रगर्जद्धनरवसदृशैः श्रीजिनाङ्घ्री यजामः ॥

ओं ह्रीं वाद्यमुद्घोषयामि स्वाहा । पुष्पाक्षतविक्षेपणाह्लादकेन बहिर्वाद्यमुद्घोषणम् ।

**End:**

औदासीन्यसुशक्तिसंयतमतिक्रोधाद्विभावोल्लस
ज्जीवव्रातविकारदोषहननं कर्मक्षयोत्पादकम् ।
देवेन्द्रादिनमस्क्रियासमुचितं संसारदुःखापहं
साक्षान्मोक्षसुखप्रदं प्रविमलं चारित्रमर्चामहे ॥

अर्हत्सिद्धाः सूरयः पाठकेन्द्राः
सर्वेऽप्येते साधवः साधुवन्द्याः ।
सम्यग्दृष्टिज्ञानचारित्रयुक्ताः
श्रेयः कुर्वन्त्वर्चिताः सज्जनानाम् ॥ पूर्णार्घ्यम् ॥

---

## No. 8753. जैनाभिषेकादिविधानम्.
## JAINĀBHIṢEKĀDIVIDHĀNAM.

Pages, 11. Lines, 7 on a page.

Begins on fol. 17*b* of the MS. described under No. 8740.

Incomplete.

Gives the manner of conducting the ceremonial bath of the images of Jina.

**Beginning:**

अथातोऽभिषेकादिविधा(ना)न्यनुसूत्रयिष्यामः—

तद्यथा—

आश्रित्य स्नपनं विशोध्य तदिलां पीठ्यां चतुःकाग्युक-
कोणायां सकुशश्रियां जिनपतिं न्यस्यान्तमाप्येष्टदिक् ।

नीराज्या(जा)म्बुरसाज्यदुग्धदधिभिस्सिक्त्वा कृतोद्वर्तनं
सिक्तं कुम्भजलैश्च गन्धसलिलैः संपूज्य नुत्वा स्मरेत् ॥

इत्यभिषेकविधानम् ।

* * * *

जिनपूजार्थं समाहूता देवास्सर्वे विहितमहामहाः स्वस्थानं गच्छत जः इति विसर्जनमन्त्रोच्चारणेन यागमण्डले पुष्पाञ्जलिं विकीर्य देवान् विसर्जयेत् ।

**End:**

पूर्वस्यां दिशि ध्वजमवस्थाप्य शतं देवतामित्थं प्रतिष्ठयेत् । . .
सर्वाह्णयक्ष अत्र तिष्ठ ठ इत्यादि.

---

No. 8754. जैनाराधनाविधिः.

JAINĀRĀDHANAVIDHIḤ.

Substance, palm-leaf. Size, 13¾ × 1¾ inches. Pages, 62. Lines, 5 on a page. Character, Kanarese. Condition, good. Appearance, old.

Begins on fol. 64*a*. The other works herein are Śāntihōmōtsavavidhi 1*a*, Grahastōtra 40*a*, Maṅgalastōtra 42*b*, Sthānasaptakanirūpaṇa 45*b*, Vivāhaprayōga 47*a*, Tīrthakarapūjāvidhāna 94*b*.

Complete.

The manner of worshipping the image of Jina is given here.

**Beginning:**

रागादिदोषरहितं सुरराजवन्द्यं
नत्वा जिनेशमखिलामलयोगिसेव्यम् ।
पुष्पाञ्जलिं जिनमुखे वयमुत्क्षिपामः
श्रीमूलसङ्घवरभव्यजनप्रशान्त्यै ॥

ओं परमब्रह्मणे नमो नमः । स्वस्ति, जीव, नन्द, वर्धस्व, विजयस्व, अनुशाधि, पुनीश(हि), पुण्याहं माङ्गल्यं पुष्पाञ्जलिं स्वाहा ।

* * * *

जिनेन्द्रयागवेलायां पूजाद्रव्यैर्जलादिकैः ।
ईशानदिङ्मुखे नित्यं वास्तुदेवं यजाम्यहम् ॥

**End:**

ओं ह्रीं श्रीं क्लीं ऐं अर्हमिदं पुष्पाञ्जलिं प्रार्चनमिदं गृहीष्वम् । नमोऽर्हद्भ्यः स्वाहा ।

शक्रचक्रधराहीन्द्रार्चिताङ्घ्रियुगाम्बुजः ।
पायादपायाद्भव्यौघं श्रीपतिः श्रीजिनः सदा ॥

आशीर्वादः ॥

---

No. 8755. जैनेन्द्रयज्ञविधिः.
JAINENDRAYAJÑAVIDHIḤ.

Pages, 18. Lines, 7 on a page.

Begins on fol. 42*a* of the MS. described under No. 8738.

Complete.

Contains the manner of conducting the worship of Mahāvīrācārya.

**Beginning:**

श्रीमज्जिनेन्द्रमभिवन्द्य जगत्त्रयेशं
स्याद्वादनायकमनन्तचतुष्टयार्हम् ।
श्रीमूलसङ्घसुदृशां सुकृतैकहेतुः
जैनेन्द्रयज्ञविधिरेष मयाभ्यधायि ॥

* * * *

ओं ह्रां ह्रीं ह्रूं ह्रौं ह्रः असि आ उ सा । ओं नमोऽर्हते भगवते श्रीमते पवित्रतरं जलेन मम हस्तशुद्धिं करोमि स्वाहा ।

ओं ह्रां जलेन मम सर्वाङ्गशुद्धिं करोमि स्वाहा । ओं ह्रां जलेन मम पूजापात्रशुद्धिं करोमि स्वाहा । ओं ह्रां जलेन मम पूजाद्रव्यशुद्धिं करोमि स्वाहा ।

**End:**

पानीयैर्जिनराजमज्जनकृतैर्गन्धैर्जिनेन्द्रार्चितैः
स्रग्भिः श्रीजिनपूजिताभिरर्हत्पादार्चितैरक्षतैः ।
हव्यैः श्रीजिनपादपीठमहितैर्दीपैस्तमश्छेदिभिः
धूपैर्गुग्गुलुसंभवैर्बहुफलैः क्षेत्राधिपो मान्यते ॥
प्रासाम्यङ्घ्रिविधिर्जटामकुटवान् नीलाञ्जनाभः सदा
हैमं पात्रमसिं गदां च डमरुं बिभ्रच्चतुर्भिः करैः ।
नम्रो नागविभूषणस्त्रिणयनः श्रीजिनपूजार्चितः
सिन्दूराङ्कितमौलिरिष्टफलदः क्षेमं क्रियात् क्षेत्रपः ॥
आशीर्वादः ॥

---

## No. 8756. ज्वरशान्तियन्त्रपूजा.
## JVARAŚĀNTIYANTRAPŪJĀ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 45*b* of the MS. described under No. 8746.

Complete.

Deals with the drawing and sanctification of a Yantra (mystic diagram) which is considered to have the power of curing one of severe fever and freeing one from danger of any kind.

**Beginning:**

हंसावृताभिधानं मलवरषष्ठस्वरान्वितं कूडम् ।
बिन्दुयुतं स्वरपरिवृतमष्टदलाम्भोजमध्यगतम् ॥
तेजोऽर्हं सोमसुधा हंस स्वाहेति दिग्दलस्य विलिखेत् ।

* * * *

श्रीपार्श्वनाथस्सहितं करोति दाहज्वरे लेपितमन्त्रखण्डे ।
तदालिख्यापायत्कांस्यभाजने महादाहज्वरगस्तं तत्क्षणेनोपशाम्यम् ॥

**End:**

बहिरर्चयेत् समन्तात् गन्धाक्षतकुसुमचरुकाद्यैः ।
क्रूरारिमारिशाकि[नी]न्युरगनवग्राहपिशाचचोरभयम् ।
अपहरति तत्क्षणादिह तत्सलिलद्रवसमासिक्तः ॥

## No. 8757. तीर्थकरपूजा.
## TĪRTHAKARAPŪJĀ.

Pages, 20. Lines, 7 on a page.

Begins on fol. 58*a* of the MS. described under No. 8738.

Complete.

Contains the manner of worshipping the 24 Tīrthaṅkaras.

**Beginning:**

आदिनाथोऽस्तु वः स्वस्ति स्वस्ति स्तादजितेश्वरः ।
शंभवो भविता स्वस्ति भूयात् स्वस्त्यभिनन्दनः ॥

* * * *

स्वस्तिमन्तं स्वयं वश्वत् सन्तु स्वस्त्ययनं जिनाः ।
एतत्सप्तकं पठित्वा पुष्पाञ्जलिं क्षिपामि स्वाहा ॥

**End:**

द्वासप्तति तीर्थकृतां त्रिकाले त्रिषष्टिसङ्ख्यां पुरुषोत्तमानाम् ।
त्रिलोकसाम्राज्यरमाधिपानां पुष्पोत्तरार्घ्यैर्महयामि देवान् ॥

ओं ह्रीं त्रिकालत्रिलोकभव्यजनमहितद्वासप्ततितीर्थकरपरमदेवेभ्यः महार्घ्यं निर्वपामि स्वाहा ॥

---

## No. 8758. तीर्थङ्करयजनक्रमः.
## TĪRTHAṄKARAYAJANAKRAMAḤ.

Pages, 10. Lines, 7 on a page.

Begins on fol. 83*a* of the MS. described under No. 8738.

Incomplete.

Similar to the above.

**Beginning:**

येऽमी संप्रति कालभव्यजनता हृष्टामरेन्द्रैर्मुदा
कल्याणे वृषभादयो जिनवराः संपूजितास्तानिह ।
त्रैलोक्याधिपतीन् यजाम्यतिशयोपेतांश्चतुर्विंशतिं
शान्त्यर्थं जगतां चराचरगुरूंस्तीर्थकरान् सांप्रतम् ॥

* * * *

ओं श्री वृषभ अजितवर्तमानकालचतुर्विंशतितीर्थकरपरमदेवान् स-
लिलमलयजशतककुसुमसांनाय्यप्रदीपधूपफलस्तवकशान्तिधाराद्यष्टमङ्गलद्र-
व्यैराराधयामि स्वाहा । ठकारवलयाभ्यन्तरे च सोमयमवरुणधनदजिन-
वेदिद्वारपालनियुक्ताः स्वस्वमिहेत्यनुयोगं कुर्वस्मिन्.

**End:**

यद्दुं कुक्कटसर्पगात्रिफणकोत्तंसा द्विषां यात्तषट्-
पाशादी सदसत्कृते च धृतशङ्खास्यादिदोश्चयष्टगा ।
तां शान्ता व(म)रुणां स्फुरच्छृणिसरोजन्माक्षमालाम्बरां
पद्मस्थां नवहस्तकप्रमुनुतां यायज्मि पद्मावतीम् ॥

* * * *

भगवन् दुर्मार्गविनाशन परसन्मार्गपरिपालक यक्षेश्वर स्वाहा ॥

---

No. 8759. तीर्थकरपूजाविधानम्.

TĪRTHAKARAPŪJĀVIDHĀNAM.

**Pages,** 63. Lines, 5 on a page.

Begins on fol. 94*b* of the MS. described under No. 8754.

Incomplete.

Similar to the above.

**Beginning:**

अथा(ष्ट)दलकमलपत्रे पूर्वदिशि सिद्धपरमेष्ठिपूजाविधानम् ।

आह्वानं स्थापनं चारु संनिधीकरणं मुदा ।
कुर्वे श्रीसिद्धनाथस्य गन्धतण्डुलपुष्पकैः ॥

ओं ह्रीं अर्हं अनाहतविद्यायै लसिंआऊपसिद्धपरमेष्ठिन्नत्रैहि । सं
वौषट् । अत्र स्वस्थाने तिष्ठ तिष्ठ ठ ठ मम संनिहितो भव ।

**End:**

तोयैर्गन्धाक्षताद्यैर्भवभयहरणं पूजयित्वा जिनेन्द्रं
यन्त्रं धृत्वा जिनाह्वे(ह्ने) व(म)नुसहितशतैः श्वेतपुष्पैः प्रधानैः ।
जैनं मुद्रां च धृत्वोत्तरदिगभिमुखः सुश्रु(धु) पद्मासनस्था(स्थः)
पार्श्वध्यानावलम्बी कुरु परमजपं लभ्यते कार्यसिद्धिम् ॥

* * * *

यः सत्केवलबोधबोधितजगद्रागादिदोषारिजि-
द्गीर्वाणादिनरेन्द्रवन्द्यकलिकुण्डोद्दण्डपार्श्वप्रभुः ।
भक्त्या येऽनुपठन्ति तस्य जयमालां तां सुभव्याः सदा
ते यान्त्यक्षयमाप्तचारुकमलाकृत्वाष्टकर्मक्षयम् ॥

**Colophon:**

इति कलिकुण्डजयमाला ॥

---

No. 8760. नवग्रहपूजा.
NAVAGRAHAPŪJĀ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 7a of the MS. described under No. 8735.

Complete.

Gives the manner of performing the worship of the nine Grahas commencing with the sun.

**Beginning:**

प्राचीश्चतस्रोदीचीश्चाग्नेमास्त(ग्नेः प्राक्त)ण्डुलं लिखेत् ।
नवान्तराय जायन्ते गृहस्थानाग्नि(नि)तेषु वै ॥
मध्ये वृत्तं रवेरिन्दोराग्नेय्यां चतुरश्रकम् ।
याम्ये त्रिकोणं भौमस्य रौद्रे सौम्यस्य बाणवत् ॥

* * * *

आदित्याय रक्ताय रक्ताम्बरवासाय रक्तच्छत्रध्वजरथपताकाशोभिताय आरूढं मेरुं दिव्यं प्रदक्षिणं कृत्वा आवाहये । ग्रहमण्डलं प्रविशामि । काश्यपगोत्रकलिङ्गदेश आदित्यमावाहयामि ।

**End:**

केतुश्चित्रश्चित्राम्बरवासाय जैमिनिगोत्रमध्यदेशकेतुमावाहयामि ।

**Colophon:**

इति आदित्यादिनवग्रहपूजा समाप्ता ॥

## No. 8761. नागबलिपूजा.

## NĀGABALIPŪJĀ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 4a of the MS. described under No. 8735.

Complete.

Gives the manner of conducting the worship of the eight Nāgas as a preliminary ceremony to marriage.

**Beginning:**

माङ्गल्यवाद्योदितदिव्यनादैः श्रीमज्जिनाशीर्वचनैर्जयेति ।
श्रीनागबल्यर्थमुदारभूमौ सद्गन्धपुष्पाञ्जलिमुत्क्षिपामि ॥

* * * *

गङ्गादितीर्थोद्भववारिसिक्तां कर्पूरकाश्मीरसुगन्धलिप्ताम् ।
पुष्पौघसद्गन्धवतीं धरित्रीं श्रीनागबल्यर्थमिहार्चयामि ॥

* * * *

मध्येऽष्टपत्राम्बुरुहेऽष्टनागान् तत्कर्णि(र्णि)कायां च विचित्रकुम्भम् ।
संस्थाप्य ब्रह्माणमिहात्र मध्ये बाह्ये दिगीशानपि चाष्टसंस्थान् ॥
प्रशस्तदर्भान् परमानुरागात् स्वीकृत्य विघ्नप्रशमाय साग्रान् ।
विधिप्रदेशे बहिरष्टदिक्षु क्षिपामि सन्नागबलीविधाने ॥

**End:**

श्रीमद्विवाहोदितशास्त्रमार्गविधानविघ्नौघनिवारणार्थम् ।
वधूवराद्युत्तमसत्फलार्थं सर्वान् दिगीशान् परिपूजयामि ॥

---

## No. 8762. पञ्चदशतिथिदेवतार्चनम्.

## PAÑCADAŚATITHIDEVATĀRCANAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 1a of the MS. described under No. 8739.

Wants beginning.

Gives the manner of conducting the worship of the deity presiding over each lunar day of the bright or dark fortnight.

**Beginning:**

. . . . . . न्दितपद्मशिम् ॥ पन्नग ।
. . . खड्गपरमङ्कुशमक्षमालां कशां दधानं डमरुं तथैव ।

* * * *

शूलं कपालं च दधत्त्रिणेत्रः सिंहाधिरूढो नवमीदिनेशः ।
बालार्कसङ्काशतनुप्रकाशः श्रीविश्वमाली भवतु प्रपूज्य(:) ॥

विश्वमाली ।

**End:**

पिण्डाशिनी पञ्चदशीदि(ने)शः कोदण्डबाणाभ्रदपाशहस्तम (?)।
वेदण्डपत्रं कमनीयगात्रं शशाङ्कवर्णं महयामि यज्ञे ॥

पिण्डाशिनी ।

इत्थं योग्यमहोपचारविधिना यज्ञांशसंप्रीणित-
प्राणित्राणितदर्हदाङ्घ्रिनखरज्योतिस्फुरन्मौलिकाः ।

* * *

. . . . . गृह्णन्तु पूर्णाहुतिम् ॥ पूर्णाहुतिः ।

**Colophon:**

इति पञ्चदशतिथिदेवतार्चनम् ॥

---

## No. 8763. पञ्चपरमेष्ठिपूजा.
## PAÑCAPARAMEṢṬHIPŪJĀ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 8735.

Incomplete.

How the five Brahmans generally recognised by the Jains should be worshipped is given here.

**Beginning:**

ओं ह्रूं नमः सूरिभ्यः पञ्चेन्द्रियविषयरहितेभ्यः पञ्चविधाचार-निरतेभ्यः जलं निर्वपामि स्वाहा ।

ओं ह्रौं नमः पाठकेभ्यः व्रतसमितिगुप्तियुक्तेभ्यः कषायाति(दि)-रिपुवर्गजितृभ्यः जलं निर्वपामि स्वाहा । ओं ह्रः नमः साधुभ्यः मूलो-त्तरगुणावित्तेभ्यः परम[द]दत्तचित्तेभ्यः जलं निर्वपामि स्वाहा । गन्ध इत्यादि । ओं ह्रीं नमः पञ्चपरमेष्ठिभ्यः ह्रां ह्रीं ह्रूं ह्रौं ह्रः सर्वशान्ति कुरु अर्घ्यं निर्वपामि स्वाहा । शान्तिधारापुष्पाञ्जली इत्यादि ।

**End:**

स्याद्वादप्राज्यराज्यप्रतिभटरहिताः स्वाम्यवत्सार्वभौमाः
येऽर्हन्तो ये च सिद्धा निजसुखनिय(ल)या निष्ठितार्था निरन्ताः।
पञ्चाचारैकताना गणवरवृषभा ये च ये पाठकेन्द्राः
ये मान्याः साधुसिंहास्तदखिलपरमश्रीगुरूनर्घ(र्हे)यामि ॥
अर्घ्यम् ॥

शान्तिं चक्रुरनन्तसंसृतिमहादावोग्रदावानल-
ज्वालाजाल्दुरन्तदुःखविपदस्तेषां परेषामपि ।
ये कुर्वन्ति च सर्वलोकमहितास्तेषां गुरूणामहं
पञ्चानां रचयामि पादपुरतः श्रीशान्तिधारामिमाम् ॥
शान्तिधारा ।

कमलवकुलवा(मा)लोत्फुल्लकल्हारमल्ली-
कुमुदकुरवकोद्यद्यूथिकाकेतकीनाम् ।
मरुवकदमनानां मञ्जरीं प्रोक्षिपामो
वरचरणपुरस्तात् पञ्चधा श्रीगुरूणाम् ॥ पुष्पाञ्जलि(:) ।

---

## No. 8764. पञ्चमण्डलाराधनविधानम्.

## PAÑCAMAṆḌALĀRĀDHANAVIDHĀNAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 99*b* of the MS. described under No. 8747.

Complete.

Gives the manner of conducting the worship of the guardian Jinas who are placed in five sheaths around the principal object of worship.

**Beginning:**

अथ पञ्चमण्डकस्थापितदिक्पालार्चनम् ।

श्रीमत्सर्वजनीनजैनसवनप्रत्यूहविध्वंसन-
प्रोद्भूतामतिमप्रभावविहतप्रख्यातपूजार्चित ।

स्वस्वातध्यपरिच्छदान् दशदिशामन्यान् प्रघृष्यामितान्
दिक्पालान् जगदेकपालकविनान् धीशाध्वरे व्याह्वये ॥

**End:**

शिलां विशालां लवणेन विद्धां सूत्रेण बद्धां सगुडां सले(ले)पाम् ।
भोगाघपुंक्षैं दुरितौघपिष्ठे वेद्याः पुरस्ताद्विनिवेशयामि ॥
ओं सर्वजनानन्दकारिणे सौभाग्यवति तिष्ठ स्वाहा ।
स्वच्छैः फलैरेनां शिलामर्चये ॥

**Colophon:**

इति पद्ममण्डलाराधनविधानं संपूर्णम् ॥

---

No. 8765. पद्मावतीपूजा.

PADMĀVATIPŪJĀ.

Pages, 3. Lines, 5 on a page.

